नां प्रणमामि बृहस्पतिम् ५ दधिशङ्खतुषाराभं दैत्यानां परमं गुरुम् सर्वशास्त्र
प्रवक्तारं भार्गवं प्रणमाम्यहम् ६ नीलाञ्जनसमाभासं रविपुत्रं यमाग्रज
म् छायामार्त्तण्डसम्भूतं नमस्यामि शनैश्चरम् ७ अर्द्धकायं महावीर्यं चन्द्रा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दित्यविमर्दनम् सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ८ पलालधूमसङ्काशं तारका
ग्रहमस्तकम् रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ८ इति व्यासमुखोत्पन्नं ये पठंति
समाहिताः दिवा वा यदि वा रात्रौ शान्तिस्तेषां भविष्यति १० ऐश्वर्यमतुलं चैव पुत्रपौत्रं
पुष्टिवर्द्धनम् नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ११ बालशान्तिकरं प्रोक्तं मन्त्रमृ
त्युविनाशनं ग्रहनक्षत्रजाः पीडा तस्करग्निसमुद्भवाः १२ ताः सर्वा प्रशमं यान्ति व्या
सोक्तेन संशयः सूर्यः सोमो यमश्चन्द्रः कुजश्च पदवीं सन्मंगलं मंगलः सद्बुद्धिं च बुधो गु
रुश्चगुरुतां शुक्रः शुभं शनिः राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं
प्रीतिकरा भवन्तु मम ते सर्वे नुकूलाग्रहाः १३ आयुश्च वित्तं च तथा कुरुष्व च धर्मार्थ्य ना
भावकुपुत्रतां च शत्रुक्षयं राज्यसुपूज्यतां च तुष्टा ग्रहाः क्षेमकरा भवन्तु १४ इति
स्तोत्रं पठित्वा ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च गुरु
श्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु इति च पठित्वा पुष्पाञ्जलिं
समर्पयेत् ततो ग्रहवेद्युपरि नारिकेल फलपुष्पद्रव्यसहितं वितानं समर्प्य वेदी
समीपे सूर्यादीनां यथोक्तबलीन्दद्यात् सूर्याय गुडौदनबलिं सोमाय घृतपा
यसबलिं भौमाय क्षीरगुडं घृतादिमुत्करिकाद्यं संभावम् क्षीरौदनं बुधाय घृ
तौदनं बृहस्पतये दध्योदनं शुक्राय कृशरान्नं शनैश्चराय अजर्मांसं राहवे सुरा घट
कोदनं वा चित्रौदनं केतवे अन्नम्भः पायसबलिं दद्यात् यथोक्तबलयो भवे आदि
त्यादिभ्यो पायसबलिं तदभावे दध्यक्षतबलिं केचिन्मते होमान्ते बलिदानम् क

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्म्मान्तिचवलिदानम् तत्रयासम्भवंकुर्य्यात् इतिग्रहस्थापनपूजनविधिः अथसाचा
र्य्योयजमानः ऋत्विक्सदस्यद्वारपालादीनांवरणंकुर्य्यात् तत्रसंकल्पः अद्येहत्यादि
अमुकोहं अमुककर्म्मणि अस्मिन्गृहयोगे ऋत्विक्कर्म्मकर्तुं ऋत्विक्सदस्यद्वा
रपालादीनां पूजनपूर्वकंवरणंकरिष्ये इतिसंकल्प्य ऋत्विग्भ्योगोत्रंदत्वा गन्ध
द्वारेतिगंधं नमोस्त्वनन्तादिति अक्षतपुष्पैःसम्पूज्य वरणंकुर्य्यात् अभिगंधाक्ष
ताद्भिः अस्मिन्गृहयज्ञकर्म्मणि ऋत्विक्कर्म्मकर्तुं स तत्रासदस्यकर्म्मकर्तुं न
थाद्वारपालत्वेन त्वामहंवृणे वृतोस्मीति वृत्युक्तिः अथ ऋत्विगादीनां
प्रार्थना ऋग्वेदःपञ्चपत्रासौ गायत्रीसोमदेवतः अभिगोत्रक्तविप्रेन्द्र ऋत्विक्क
म्ममरेवभव ममास्मिन्यज्ञे त्वंऋग्वेदीभव अहंभवालीतिप्र- मन्त्रपाठः ॐ अग्निमी
ले. कातराकोयजुर्वेदस्त्रैकुभोरुद्रदेवतः भारद्वाजस्तविप्रेन्द्र ऋत्विक्कम्ममरेवभ
वृ ममास्मिन्यज्ञेयजुर्वेदीभव अहंभवा. मन्त्रपाठः इमेत्वा. सामवेदस्तपिंगा
क्षो जगतःसूर्य्यदेवतः कश्यपपुत्रविप्रेन्द्र ऋत्विक्कम्ममरेवभव ममास्मि
न्यज्ञेत्वंसामवेदीभव अहंभवा. ॐ अग्नआयाहि. बृहन्नेत्रोर्थर्ववेदोऽनुष्टुभो
रुद्रदेवतः वैरवानसस्तविप्रेन्द्र ऋत्विक्कम्म मरेवभव ममास्मिन्यज्ञेत्वंअथर्ववेदी
भव अहंभ. मन्त्रपाठः ॐ आनोदेवी. ऋग्वेदंस्थापयेत्पूर्वं यजुर्वेदं दक्षिणे
पश्चिमेसामवेदं उत्तरेचाथर्वणम् ततःगायत्रीजपाद्यंगोगोत्रमंत्रादिजपपा

त्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ठार्थं अन्यान् ब्राह्मणान् वृणुयात् अथ कुशकण्डिका दक्षिणतो ब्रह्मासनम् त
त्र ब्रह्मोपवेशनम् आत्मासने यजमानासनं अग्नेरुत्तरतः आसनद्वयं कल्पयि-
त्वा प्रणीतापात्रम् सव्यहस्तकरणं जलेनापूरणम् दर्भैराच्छादनम् ब्रह्मा मुखा
वलोकनम् प्रथमासनेनिधाय आलभ्य द्वितीयासनेनिदध्यात् दिशादिशं प्रा
गग्रैः कुशैः परिस्तरणम् पुरस्तात् दक्षिणतः उत्तरतः पश्चात् अर्धवन्तिवस्तूत्वा
सादयेत् पवित्रच्छेदनानि त्रीणि कुशतृणानि ६ पवित्रसाग्रे अनन्तर्गर्भे प्रोक्ष
णीपात्रम् आज्यस्थाली चरुस्थेत् चरुस्थाली सम्मार्जनकुशाः पञ्च उपयमन
कुशास्त्रिपृथुतमः त्रयोदशपर्वणान्यग्राण्याः समिधस्तिस्रः पालाशः प्रादेशमा
त्राः स्रुवः खादिरः गव्यमाज्यम् व्रीहितण्डुलाः पूर्णपात्रं अर्धपञ्चाशदधिक श
तद्वयमुष्टिमितं २५६ वक्त्रोक्तपुरुषाहारपरिमितं कर्मोपयोगिनी दक्षिणा वेद
वा एतानि वस्तूनि उत्तरपृष्ठ्यास्थापयेत् त्रिभिर्दर्भैः ६ छेद्यो प्रादेशमात्रे पवि
त्रे कृत्वा पात्रान्तरेण हस्तेन वा प्रणीतोदकेन वा प्रणीतोदकेन पवित्रप्रोक्ष
णात् पवित्राभ्यां मज्जयस्थालीं सम्प्रोक्ष्य तथा चरुस्थालीं सम्मार्जनकु
शात् उपयमनकुशात् समिधः स्रुवम् आज्यम् पूर्णपात्रं दक्षिणाञ्च सम्प्रोक्ष्य
अग्निं प्रणीतयोर्मध्ये अग्नेश्चरोः पार्श्वे स्थापयेत् निरुपाज्यमधिश्रयेत्
चरुं दर्भैर्वेष्टयेत् उपरि पदोपरि आज्यं ब्रह्माधिश्रयेति चरुमाचार्यः अद्ध

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्नेते चरवाज्येवा ज्वलदुल्मुके समनक्त्वा स्रुवमथोमुखं प्रतप्य सम्मार्ज्जन कु
शैः अग्रतो मूलपर्य्यन्तं मूलतोऽग्रपर्य्यन्तं सम्मार्ज्य पुनः प्रतप्य करणं सम्मार्ज्य
दक्षिणतः कुशोपरि निदध्यात् आज्यमुद्धास्य उत्तरतः स्थापयित्वा पश्चात्तनीय पू
र्वपवित्राभ्यामुत्पूय अग्रेसत्र पदव्यतिरसनं कृत्वा उपयमनकुशानादाय वामे
करे कृत्वा तिसृभिर्घृताक्तैः समिधः पर्य्युक्षस्वाहुतिं जुहुयात् ॐ समिधाग्निं दुव
स्वत घृतैर्बोधयतातिथिम् अस्मिन्हव्या जुहोतनः स्वाहा समिद्धाग्नये इदं न मम ॥ घृतेनवर्द्धयामसि बृहच्छो चा
हुतनः १ ॐ अग्नेजातवेदसे तन्त्वासमिद्भिरङ्गिरः घृतेनवर्द्धयामसि बृहच्छो चा
सविष्ठ्य २ ॐ उत्तत्वाग्नेहविष्मतीं घृताचीं यन्तु हर्य्यश्व जुषस्व समिधो मम स्वा
हा ३ ततः प्रोक्षणाजुदकेन सपवित्रेणादक्षिणा कुल्मुके गृहीतेन दुग्धानाघृतं पर्य्य
न्तं सम्प्रोक्ष्य पवित्रे प्रणीतायां निदध्यात् संस्रवधारणार्थं पात्रं प्रणीतान्यामे
ध्येनिदध्यात् अग्निं प्रतिगृह्य एतन्तइति अमुकनामाग्नेः क्षत्रप्रतिमृतो वर
दोभव ध्यानम् ॥ ॐ तदवाग्निस्तदादित्य तदवायुस्तदुचन्द्रमाः तदेवशुक्रं तद्ब्र
ह्म ताआपः सप्रजापतिः १ सैवनिमेमावज्रीरविद्युतः पुरुषाहधिः नैनमूर्ध्वं न
तीर्य्यङ्नमध्ये परिजग्रभत् २ नतस्य प्रतिमा अस्ति यस्य नाममहद्यशः हिर
ण्यगर्भ इत्येष मामाहिंसीदित्येषा अस्मान्नजातइत्येषः ३ एषोहिदेवः
प्रदिशोनुसर्वा पूर्वोहिजातः सउगर्भे अन्तः सएवजातः सजनिष्यमाणः प्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिजनातिष्ठतिसर्वतोमुखः ४ ॐ चत्वारिशृङ्गास्त्रयोऽस्यपादाद्वेशीर्षे सप्त
हस्तासोऽस्यत्रिधाबद्धो वृषभोरोरवीति महोदेवोमर्त्यां ँऽ आविवेश ५ ॐ
अग्निं प्रज्वलितंवन्दे जातवेदंकृताग्रनम् सुवर्णवर्णमत्नं समिद्धं सर्वतोमुखम्
इतिध्यात्वा आवाहयेत् ॐ वैश्वानरोनऽऊतयेऽआप्रयातु रथक्तः अग्निक
वेयेनवाहसा ॐ सप्तते अग्नेसमिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधामप्रियाणि
सप्तहोत्राः सप्तधात्वा सप्तयोनीरापृणस्वघृतेनस्वाहा २ इत्यावाह्य अमु
काग्नयेनमः इतिनाममन्त्रेण पाद्यादिनीराजनान्तं सम्पूज्य रेखाः जिह्वापूजयेत्
यथा पूर्वरेखायां ॐ ब्रह्मणेनमः मध्यरेखायां ॐ विष्णवेनमः उत्तररेखायां
ॐ रुद्रायनमः ततोग्निजिह्वापूजनम् ॐ रक्तायैनमः श्वेतायैनमः पीतायै नी
लायै धूम्रायै ज्वालिन्यै विस्फुलिङ्गिन्यैनमः इतिसप्तजिह्वाः सम्पूज्य पु
ष्पाञ्जलिः ॐ अग्निज्वालान्वितंभव्यमजाक्षं महोजसं शक्तिहस्तं वेद
मन्त्रे रावाह्य पूजयेत्तदधी पूजयित्वोपचारैस्तु कृतिकार्य्यप्रसन्नतः
स्वाहानामहाभाग शक्तिहस्तजगन्मय ज्वालाकुलाननाहीन हेम्नतापक
सुंदर मेवज्यसर्वजठर संस्थसर्वस्य पावक सर्वसंपत्करायाज्य तापपापारि
हारक छागवाहनसर्वादि सर्वव्याधिविनाशन देववक्त्रदेवानाम् कुलन्वर्ण
शिवाप्रिय कद्रलोचनसौम्याम सुवर्णगनकाम्बर धूमध्वजधरेयेय्ये कार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कादिक्कतालज वेदगीतविशालाक्ष विद्याधराणामर्चितः ज्ञानसाधनजोगेज्य योगि
नांगतिदायक पापनाशन पापोर कार्य्यसाधनोत्तक मुनिमान्यतमोनांग कारणति
भयवर्जितः वैश्वानर महाभाग सर्वलक्षणलक्षितः नमस्तुभ्यं नमस्तुभ्यं नमस्तु
भ्यं नमो नमः अनुकूलसदामह्यं भवसर्वप्रवर्तकः कर्म्मणा मनसा वाचा पत्नीमित
वपादयो इति पुरोडाशं समर्प्य द्रव्यत्यागसंकल्पः अद्येहामुकोहं अमुकहो
मकर्म्मणायज्ञे तत्र प्रजापतिमिन्द्रमग्निं सोममग्निं वायुं सूर्य्यमग्नी वरुणावग्नी
वरुणावग्निं वरुणं सवितारं विष्णुं विश्वान्मरुतः स्वर्क्षान्वरुणमदितिं प्रजापति
मग्निं स्विष्टकृतं चाज्येनाहुतं यज्ञेनाहुतं एतद्धोमद्रव्यं तत्तद्देवताभ्यो मयापरित्यक्तं ॐ
तत्सद्यथादेवतमस्तु इतिसंकल्प्य दक्षिणंजान्वाच्य वृद्धमणान्वारब्धो मनसा
प्रजापतिं ध्यात्वा आघारान्ताभागौ जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये
इतित्यागंविधाय कुशगोलंपात्रान्तरे निक्षिपेत् ॐ इन्द्राय स्वाहा इदमिन्द्राय
ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इतिहुत्वा न
नः पृक्तो होमंविधाय भूरादिहोमं कुर्य्यात् ॐ भूः स्वाहा इदमग्नये ॐ भुवः
स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्य्याय त्वन्नोअग्नइति वामदेवऋषि
स्त्रिष्टुप्छन्दः अग्निवरुणौदेवते सर्वप्रायश्चित्तहोमे विनियोगः ॐ त्वन्नो अग्ने
वरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाः यजिष्ठोयहितमः सोमुचानो वि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्वाहुतीनां सिप्रमुग्ध्यः समत्स्वाहा इदमग्नीवरुणाभ्यां सत्वन्नोऽग्ने इति वामदे
वऋषिस्त्रिष्टुप् छन्दः अग्निवरुणौ देवते सर्वप्रायश्चित्तहोमे विनियोगः ॐ सत्वन्नो
अग्ने वमो भवो नेदिष्ठो अस्या उषसो व्युष्टौ अव यक्ष्वनो वरुणं रराणो वीहि
मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां अयाश्चाग्ने इति प्रजापति
ऋषिस्त्रिर्विराट् छन्दः अग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ॐ अयाश्चाग्नेऽस्य
नभिशस्तिपाश्च सत्वमित्वमया असि अथा नो यज्ञं वहास्यथा नो धेहि भेषज
ं स्वाहा येते शतमिति शुनःशेप ऋषिस्त्रिष्टुप् छन्दः वरुणासवितृविष्णुविश्वेदेवा
मरुतः स्वर्का देवता सर्वप्रायश्चित्तहोमे विनियोगः ॐ येते शतं वरुण ये सहस्रं यज्ञी
याः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः
स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्यः स्वर्केभ्यः उदुत्तमं मि
ति शुनःशेप ऋषिस्त्रिष्टुप् छन्दः वरुणो देवता सर्वप्रायश्चित्तहोमे वि ॐ उदुत्तमं
वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय अथा वय मादित्य व्रते तवानागसो
अदितये स्याम स्वाहा इदं वरुणायादित्ये ॐ अग्नये प्रजापतये स्वाहा इदमग्न
ये प्रजापतये ॐ अग्नेर्नस्त्विष्टकृते स्वाहा इदमग्नेर्नस्त्विष्टकृते ततः संस्रवप्राशनम्
पवित्रप्रतिपत्तिः प्रणीतविमोकः बर्हिर्होमः ब्रह्मणो पूर्णपात्रदानम् अमुकहा
मुकोर्हं अमुककर्मणः साङ्गफलसाङ्गुणाय अपूर्णपूर्णाभ्यां

प्राप्तये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदं पूर्णपात्रं सद्रव्यं ब्रह्मणोतुभ्यं सम्प्रददे ॐ तत्तालमम इति दत्वा मन्त्रपाठः ॐ
अक्रन्कर्म्मकर्म्मकृतः सहवाचामयोभुवा देवेभ्यः कर्म्मकृत्वा तं प्रेतसंचाभुक्तः
पूर्णाहुतिं कुर्यात् यजमानेन्वारम्भकाभ्यः ब्राह्मणाभ्यो घृतं दद्यात् आचार्य्यो
होमं कुर्य्यात् स्रुवं स्रुपूजितं नारिकेलपूगीफलादि फलवस्त्रसहितं कृत्वा ॐ स्रुव
श्चमे चमसाश्चमे वायव्यानि चमे द्रोणकलशश्चमे ग्रावाणश्चमे धीषवणे चमे द
नभृद्वमऽ आधवनीयश्चमे वेदिश्चमे बर्हिश्चमे अवभृथश्चमे स्वगाकारश्चमे यज्ञेन
कल्पन्ताम् इति मन्त्रेण स्रुवं सम्पूज्य सङ्कल्पः अद्येहामुकोहं अमुककर्म्माङ्गं होम
कर्म्मणः साङ्गफलप्राप्त्यन्यूनातिरिक्तपरिपूर्त्यर्थं मृडनामानो पूर्णाहुतिहोमं क
रिष्ये मृडानंदिवऽ इति भारद्वाजऋषिस्त्रिष्टुप्छन्दो महादेवो मृडनामा
नो पूर्णाहुतिहोमे विनियोगः ॐ मृडानंदिवोऽ अतिमृडिव्याधेश्वानरमृतऽ आ
जातमग्निं कविं सम्राजमतिथिं जनानां मासन्नापात्रं जनयन्तदेवाः स्वाहा
१ ॐ सदस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं सनिं मेधामयासिषं स्वाहा २ ॐ
यामेधां देवगणा पितरश्चोपासते तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ३
ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः मेधामिन्द्रश्च वायुश्च मेधां धाता
ददातु मे स्वाहा ४ ॐ पूर्णादर्व्विपरापतसुपूर्णा पुनरापत वसेव विक्रीणावहा इष
मूर्ज्जं शतक्रतोः स्वाहा ५ एभिर्मन्त्रैः पूर्णाहुतिहोमं विधाय अग्निपूजनं कुर्य्यात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अङ्गुमेधांयशः प्रज्ञां विद्यां पुष्टिं वर्चस्त्रियम् आयुष्यं द्रव्यमारोग्यं देहि मे हव्यवा
हनः ॐ तनूपाऽअग्नेसितन्वं मे पाहि ॐ आयुर्दाऽअग्नेस्यायुर्मे देहि वर्चोदाऽअ
ग्नेसिवर्चो मे देहि अग्ने यन्मे तन्वा ऊनं मऽआपृणा ॐ मेधाम्मे देवः सविताऽआदधा
तु ॐ मेधाम्मे देवी सरस्वती आदधातु ॐ मेधामश्विनौ देवावधत्ताम्पुष्करस्रजौ
ॐ अङ्गानि चमऽआप्यायन्ताम् इति सर्वाङ्गान्युपस्पृशेत् वाक्चमऽआप्यायताम्
इति मुखं प्राणाश्चमऽआप्यायन्ताम् इति नासिकाभ्याम् चक्षुश्चमऽआप्यायताम्
इति नेत्रयोः श्रोत्रञ्चमऽआप्यायताम् इति श्रोत्रयोः यशोबलञ्चमऽआप्याय
ताम् इति बाह्वोः ततस्त्र्यायुषकरणं भस्मना ॐ त्र्यायुषञ्जमदग्नेः इति ललाटे
ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् ॐ यद्देवेषु त्र्यायुषम् इति दक्षिणांसे
ॐ तन्नोऽअस्तु त्र्यायुषम् इति हृदि त्र्यायुषमिति सर्वैरामन्त्रैः सर्वाङ्ग-
मात्मभिः ततो होमसाङ्गदक्षिणासंकल्पः अद्येत्यादि अमुकाहे अमुके
कर्मनिमित्तकहोमकर्मणः साङ्गफलप्राप्त्यर्थं च इमां कृष्णवर्णां
दक्षिणां अग्निदैवत्यां कृष्णवर्णनिष्क्रयीभूतद्रव्यया आचार्य्याय तुभ्यं संप्र
ददे तथाभूयसीं दक्षिणां अन्येभ्यो ब्राह्मणेभ्यो विभज्य दद्यात् ॐ तत्सत् त
थाभूतयोपपन्नेनान्नेन ब्राह्मणांश्च भोजयिष्ये ततोऽग्निं विसर्जयेत् गच्छ ग
च्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर यत्र ब्रह्मादयो देवा तत्र गच्छ हुताशन भो
भोयज्ञ महाभाग सर्वकर्मप्रसाधक कर्मान्तरेषु सम्प्राप्तेषु मानिष्ये कुरुष्व सादरम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यान्तु देवगणाः सर्वे पूजामादाय मामकीम् इष्टकामसमृद्ध्यर्थं पुनरागमनाय
च ॐ यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा एतत्ते यज्ञो यज्ञपतेस
हसूक्तवाकः सर्ववीरस्तेजस्वत्स्वाहा ॐ यामस्कन्दाग्निरिन्द्रो ब्रह्मा देवो बृहस्प
तिः सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभं इत्यग्निं विसर्जयित्वा दक्षिणां दत्वा
अभिषेकतिलकरक्षाबंधनघृतच्छायामंत्रपाठादिकं कारयेत् इति कुशाकण्डि
का अथ कुशाकण्डिकापयोगसंग्रहः तत्र प्रथमं अग्निनामानि अथातः सम्प्रव
क्ष्यामि यथोक्तं पद्मयोनिना ब्राह्मणानां हिताय च संस्कारेषु भाजितम् १
लौकिकः पावकोह्यग्निः प्रथमः परिकल्पितः अग्निस्तु मारुतो नाम गर्भाधाने
भिधीयते २ पुंसवने चान्द्रमसः शुङ्गाकर्म्मणि शोभनः सीमन्ते मङ्गलो नाम प्र
गल्भो जातकर्म्मणि ३ नाम्नि वै पार्थिवो ह्यग्निः प्राशने तु शुचिः स्मृतः सम्यग्ना
माथचूडे तु व्रतारम्भे समुद्भवः ४ व्रतमध्ये हरिर्नाम व्रतान्ते राजपुत्रकः गोदाने
सूर्य्यनामा च केशान्ते ह्यग्निरुच्यते ५ वैश्वानरो विसर्गे तु विवाहे योजकः
स्मृतः चतुर्थ्यां शिखीनाम धृतिरग्निस्तु सामनि ६ आवसथ्ये भवोज्ञे
यो वैश्वदेवे तु पावकः ब्रह्मयज्ञे गार्हपत्याद्याः दीक्षायां दक्षिणास्तथा ७ विष्णु
हवनीयस्य अग्नेः क्रोधत्रयोनयः लक्षहोमे वह्निनामा कोटिहोमे कृताशनः ८
प्रायश्चित्तविधिश्चैव पाकयज्ञे तु साहसः देवानां हव्यवाहस्तु पितॄणां कव्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाहनः ८ पूर्णाकृत्यामृडो नाम शानिकेवरदस्तथा पौर्णमासीकेवलदश्चैव क्रोधाग्नि
ध्यानि चारिके १० पञ्चार्थकामदो नाम वनदाहनवर्द्धनः कोपोत्पन्नजाठराग्निः स्या
त्क्रव्यादोमृतभक्षणो ११ समुद्रवाडवोग्रोमः सर्वसंवर्तकोभवेत् एतेऽग्नयः समा
ख्याता त्रिंशल्लक्षसंज्ञकाः १२ अथाग्निजिह्वा कालीकरालीच मनोजवाच
सुलोहितावेव सुधूम्रवर्णा स्फुलिङ्गिनीचैव स्फुरादीप्तिमतीच लोलायमानाइति
सप्तजिह्वाः १ अविदित्वानुजोऽप्यग्निं होमेनदविचक्षणः नकृतंनचसंस्कारो
नचकर्म्मफलंभवेत् २ सप्तजिह्वाः स्फुरन्त्येता कृताशनमुखास्थिताः याभिर्ह
व्यंसमश्नाति कृतंसम्यग्द्विजोत्तमैः ३ सप्तजिह्वाः प्रमाणात् प्रादेशमिहकीर्त्तितम्
प्रमाणं चतुरस्रंच वर्त्तुलंमुखमंडलम् ४ कराली धूमिनीश्वेता लोहिताचासिता
तथा स्फुरणीपद्मरागीच सप्तैताः परिकीर्त्तिताः ५ करालीं स्वांस्यश्नाति धूमि
नीमस्करास्तथा श्वेतांनागाः समश्नंति पिशाचालोहितांतथा ६ सितामश्नंति
गंधर्वाः स्फुरणीन्तु यमस्तथा पद्मरागीतुविख्याता दिव्याजिह्वाकृताशने ७ त
स्मात्होमेनित्यं स्फुरमिद्धेकृताशने विधूमेलेलिहानेच होतव्यंतत्रसिद्धये
नधूमानतथाज्वाला विमुद्धाप्रतिरोचिषः प्रभयाभाति यैवेव भगवांस्तत्रनिवृ
ति ८ इत्यग्निनामानिजिह्वानामानिच अथेतरकारिकायां ध्रुवधारणावि
धिः चतुरङ्गुलंपरित्यज्य मडङ्गुलमथापिवा करणामूलमाश्रित्य धारयेत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

खमुद्रया १ अग्निः सोमस्तथा सूर्यो रुद्रश्चैव प्रजापतिः सूर्यश्चैव यमश्चैव क्रमेणैव
न्तिसर्वदा २ भुवोग्रवसते हि विभागश्चतुरङ्गुलः अग्निस्थाने भिसंतापः सोमस्थे
शउदाहृतः ३ सूर्ये पत्रविनाशः स्यात् रुद्रे रोगभयं भवेत् प्रजापतौ प्रजावृद्धि र्यमे मृ
त्युभयं भवेत् ४ यमभागं त्यजेन्मूलं मोडशाङ्गुलमग्रतः प्रजाभागे भुवो धार्य्य सर्व
कर्मप्रसिद्धये ५ इति भुवधारणाविधिः अथ द्रव्यप्रमाणम् कर्षमात्रं घृतं होमे
भुक्तिमात्रं पयः स्मृतम् उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः १ तत्समं
मधुदुग्धान्न मस्तमात्रं उदाहृतम् यवाः पृष्टतिमात्राः स्युर्नाजास्युर्मुष्टिमात्र-
काः २ पृथुकाः तत्प्रमाणाः स्युः शक्तवो तथोदिताः गुडं पलार्द्धमानं स्यात् शर्करा
पितथामता ३ ग्रासार्द्धं चरुमानं स्यात् दिक्षु पर्वावधिः स्मृतः एकैकं पत्रपुष्पादि
तथापूपानि कल्पयेत् ४ कदलीफलनारिङ्ग फलान्येकैकशो विदुः मातुलुङ्ग च
तुःखण्डं पनसं दशधोक्तम् ५ अमृधानारिकेलानि खण्डितानि विदुर्बुधाः
त्रिधाकृतं बिल्वफलं कपित्थं खण्डितं त्रिधा ६ उर्वारुकफलं होमे कथितं ख
ण्डितं त्रिधा फलान्यन्यानि खण्डानि समिधः स्युर्दशाङ्गुलाः दूर्वाङ्कुरत्रयं होमे
गुडूचीचतुरङ्गुला व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि ८ स्तरार्द्धलास्यु
स्तदर्द्धांशाः कोद्रवा मुष्टिसम्मिताः गोधूमारक्तकणमा विहिता मुष्टिमानतः ८
स्निग्धास्युलूकमात्राः स्युः ग्रामपास्तत्समास्मृताः भुक्तिप्रमाणा लवणा मरीचान्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पिविंशतिः १० पुरंवरस्यानंस्या द्रामठंतत्समंस्मृतम् चन्दनागुरुकस्तूरी कर्पूरं कुङ्कुमंतथा तिन्तिडीबीजमानानि समुद्दिष्टानिदेशिकैः ११ इतिद्रव्यप्रमाणम् अथ द्रव्यग्रहणमुद्रालक्षणम् होममुद्रास्त्रयः प्रोक्ता मृगीहंसीवसूकरी विनामुद्रा कृतोहोमः सर्वोभवतिनिष्फलः १ सूकरीकरसङ्काची मृगीमुक्तकनिष्ठिका हंसीस्यात्तर्जनीमुक्ता त्रिधामुद्राः प्रकीर्त्तिताः २ शान्तिकेचमृगीज्ञेया हंसी पोष्टिकाकर्मणि अभिचारेसूकरीस्याद्विद्वेषोच्चारनादिषु ३ मुद्राहीनंतुयोमोहाद्धोतुमिच्छतिमूढधीः यजमानंतथात्मानं पातयेच्च विनिश्चितम् ४ इतिमुद्रालक्षणम् अथाज्यलक्षणम् मन्त्रैरालोडितंयच्च पवित्राभ्यांचसंस्कृतम् अपद्रव्यविहीनंतु तदाज्यमिदुरुतमिति अथसमीपकाष्ठानिब्रह्मपुराणे पालाशाश्वत्थन्यग्रोधप्लक्षैवकङ्कोदुम्बराःसमीचोदुम्बरोबिल्व श्चन्दनंसरलस्तथा शालश्चैवदारुश्च खदिरश्चत्रयोदशः इतिकुशकण्डिकापद्धतौसमिद्ग्रह अथग्रहणागेहोमविधिः आचार्योहोमवेदीसमीपमागत्य ब्रह्मणोपवेशनादि पर्य्युक्षणान्तकर्म्मकृत्वा प्रतन्तेति अग्निंप्रतिकृत्वा अमुकनामाग्नेकप्रतिष्ठितो वरदोभवेति प्रतिमृष्य ध्यानावाहनादिनीराजनान्तं समभ्यर्च्य तथाआदित्यादिनवग्रहाणांक्रमणागनेयोयथा कथितः पिङ्गलोधूम्रकेतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाठरसञ्ज्ञकः शिखीचहाटकमेव महातेजाहुताशनः रोहितमेवविशोनारव्या
दीनां कुताशनेति ॐ भूर्भुवःस्वः कपिलनामाग्नेइदागच्छ ॐ भूः पिङ्गलनामाग्ने
ॐ भूः धूम्रकेतुनामाग्ने ॐ भूः जाठरनामाग्ने ॐ भूः शिखिनामाग्ने ॐ भूः हाटक
नामाग्ने ॐ भूः महातेजोनामाग्ने ॐ भूः हुताशननामाग्ने ॐ भूः रोहितनामा
ग्ने आदित्यादि नवग्रहाणां समिधोजुहुयात् समिधस्तु अर्कः पलाशः खदि
रस्त्वपामार्गोऽपि पलः उदुम्बरः शमीदूर्वा कुशाश्च समिधः कर्मार समि
त्लक्षणाः प्रादेशमात्राः अव्यङ्गाः घृताक्तोटाघविहीनाः सशिखाः सपत्राः क
निष्ठाग्रस्थूलाः दधिमधुघृताक्ताग्राह्याः अर्काद्यभावे पालाशयज्ञ दूर्वास
ग्राम्यभावे खदिरोग्राह्य इति केचित् अधिदेवतादीनां पालाशयज्ञ दूर्वास
मिधस्तु दूर्वात्रमपरिमिताग्राह्या एवं कुशसमिधोऽपि कुशात्रमपरिमिताः
होमे मुद्रालक्षणं कुर्यात् द्रव्यत्यागसंकल्पः अथ ग्रहनवग्रहयोगनाहं केशे
नत्र प्रजापतीन्द्राग्नि सोमेभ्यः अग्नियमसवितृ सोमभौम बुधबृहस्पति भृ
क्रशनैश्चर राहुकेत्वीश्वरोमास्कंदग्रहमविघ्नग्रहमेन्द्रजमकाल चित्रगुप्ता
न्यापोधरा विघ्नेन्द्राणी प्रजापतिसर्प ब्रह्मविनायकदुर्गा वायु आका
शाभिभ्यः इन्द्रादिदशदिक्पालेभ्यश्च समिदर्वाज्य तिलादिक्रमेः प्रत्येक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेधृत्तर शताघमृ ऋषिविंशति संख्यया वा शेमेणास्विष्टकृतं चाज्येनाहुंस
से इदमाज्यं समिद्वद्वोज्य तिलादिद्रव्यं च मयापरित्यक्तं तत्तदेवताभ्यो
यथादेवतमस्तु इति द्रव्यत्यागं विधाय होमविधिः ऋषिछंदो देवतानि नाम
द्रव्यं च देवताः नमस्कारमंत्रकालिन संधेतमसि मन्त्रति नमुक्तकेशाङ्गुष्ठान्त
निपातिकाङ्गुलिः उत्तानेन हस्तेन हंगुष्ठाग्रेणपीडितं संहतांगुलिभातस्तु पो
ग्यतोजुहुयाद्धविः पृथक्क्रमेणहोममन्त्राः आकूतेनेति हिरण्यस्तूपऋषि
स्त्रिष्टुप्छंदः सविताद्देवता सवितृप्रीतये कपिलाग्नौ अमुकसंख्यया अर्क
समिद्धोमविनियोगः ॐ आकूतेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यं
च हिरण्येनसविताराथेनादेवोयाति भुवनानि पश्यन् स्वाहा इदंसवित्रे इ
मंदेवायेति गौतमऋषिस्त्रिष्टुप्छंदः सोमोदेवतासोमप्रीतये पिङ्गलाग्नौ
अमुकसंख्यया पत्नी० ॐ इमंदेवा असपत्नं सुवध्वं महतेक्षत्राय
महतेज्यैयाय महतेजानराज्यायेन्द्रस्येन्द्रियाय इमममुष्यपुत्रममुष्यै
पुत्रमस्यैविशएषवोमीराजासोमोस्माकंब्राह्मणानांराजा स्वाहा
इदंसोमाय अग्निर्मूर्धेतिविरूपाद्यऋषि गायत्रीछंदः भौमोदेवताभौम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रीतये धूम्रकेत्वग्नौ खदिरसमिद्धोमे विनियोगः ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः
पृथिव्या अयम् अपाꣳ रेताꣳसि जिन्वति स्वाहा इदं भौमाय उदुत्तमेति पर
मेष्ठी ऋषिस्त्रिष्टुप् छन्दो बुधो देवता बुधप्रीतये जाठराग्नौ अमुकसंख्यया अपा
मार्गसमिद्धोमे विनियोगः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय
जीवा मयं च अस्मिन्नसत्यक्षे अधि उत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत स्वा
हा इदं बुधाय बृहस्पतऽइति ऋत्समद ऋषिस्त्रिष्टुप् छन्दो बृहस्पतिर्देवता बृह
स्पतिप्रीतये त्रिष्वग्नौ अमुकसंख्यया पिप्पलसमिद्धोमे विनियोगः ॐ बृह
स्पते अतियदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छव स ऋतप्रजा
ततदस्मासु द्रविणेधेहि चित्रम् स्वाहा इदं बृहस्पतये अन्नात्परिस्रुतो रसं
प्रजापतऽइति सरस्वतीन्द्रा ऋषयः अतिजगती छन्दः शुक्रो देवता शुक्रप्रीतये
हृत्काग्नौ अमुकसंख्यया उदुम्बरसमिद्धोमे विनियोगः ॐ अन्नात्परिस्रुतꣳ
रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रं
मध्यमिन्द्रस्येन्द्रियमिदं पयो मृतं मधु स्वाहा इदं शुक्राय शन्नो देवीरिति
भृग्वङ्गिरा ऋषिर्गायत्री छन्दः शनिर्देवता शनिप्रीतये महातेजोग्नौ अमु
कसंख्यया शमीसमिद्धोमे विनियोगः ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेशाम्यो रभिः स्वयन्तुनः स्वाहा इदं शनये कयानश्चित्रइति वामदेवऋषिर्गाय
त्री छन्दो राहुर्देवता राहु प्रीतये हुताशनाग्नौ दूर्वासमिद्धोमे विनियोगः ॐ कयानश्चि
त्र ३ आभुवदूती सदावृधः सखाकयाशचिष्ठया वृता स्वाहा इदं राहवे केतुकृण्वन्
नितिमधुच्छन्दऋषि गायत्री छन्दः केतुर्देवता केतुप्रीतये रोहिताग्नौ शमीकसं
ग्रहाकुशसमिद्धोमे विनियोगः ॐ केतुंकृण्वन्नकेतवे पेशोमर्य्या अपेशसे
समुषद्भिरजायथाः स्वाहा इदं केतवे एभिर्मन्त्रैः स्वाहान्तैः समिद्धोमं व्रज्यन
वैकृतानि तिलाज्येन च यथासंख्यमानवग्रहहोमं विधाय देवताविपर्य्ययेप्रा
यश्चित्तं होमद्रव्यविपर्य्ययेप्रायश्चित्तं न कुर्य्यात् अथाधिदेवतानां पालाश
समिद्धोमः कार्य्यः त्र्यम्बकमितिवशिष्ठऋषिरनुष्टुप्छन्दो रुद्रोदेवता रु
द्रप्रीतये पालाः ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् उर्वारुकमिवबं
धनान्मृत्योर्मुक्षीयमामृतात् स्वाहा इदं रुद्राय ग्रीष्मतइति उत्तरनारायण
ऋषिस्त्रिष्टुप्छन्दः उमादेवता उमाप्रीतये पलाः ॐ ग्रीष्मोवसन्तः शरदौ
पत्नीसंवत्सरोहोरात्रे पार्श्वेनक्षत्राणि रूपमश्विनौ व्यात्तम् इष्टन्निषाणामुम्म
इषाण सर्वलोकम्मइषाणस्वाहा इदं उमायै यदक्रन्दइतिभार्गवऋषि
रग्निर्दीर्घतमसत्रिष्टुप्छन्दः स्कन्दोदेवता स्कन्दप्रीतये पलाः ॐ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् श्येनस्य पक्षा हरिणस्य
बाहू उपस्तुत्यं महि जातं ते अर्वन् स्वाहा इदं स्कन्दाय सहस्रशृङ्गायेत्यस्य
नाराशंस्यृषिः त्रिष्टुप् छन्दः पुरुषो देवता पुरुषप्रीतिकरणं ॐ सहस्रशृङ्गो
जातवेदाः सहस्राक्षः सहस्रपात् सभूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलं
स्वाहा इदं पुरुषाय ब्रह्मणे ब्रह्मज्ञानमिति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः
ब्रह्मदेवता ब्रह्मणः प्रीतिकरणं ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः
सुरुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
वि वः स्वाहा इदं ब्रह्मणे सोमाय इति परमेष्ठी ऋषिर्जगती छन्दः
इन्द्रो देवता इन्द्रप्रीतिकरणं ॐ सोमाय रुद्रः समरोमभद्भिः सोमं पिब
हृत्सु पूतो विचक्षणः ऋजीषिन्नूतये तव समृधो वृत्रहन्तम अयं कृणुष्व विश्ववित्
न इन्द्रो मरुत्वते स्वाहा उपयामगृहीतोऽसि विश्वेभ्यस्त्वेत्येनं योनिरिन्द्रायत्वा मरुत्वते स्वाहा
इदमिन्द्राय असियमभूति भार्गवजमदग्निर्दीर्घतमसऋषिः त्रिष्टुप्
छन्दो यमो देवता यमप्रीतिकरणं ॐ असियमो अस्यारित्रो अर्वन्
न सृतितोऽसुरेन वृत्तं असिसोमेन समया विपृक्तः आहुतं त्रीणि दिवे
न सृतितोऽसुरेन वृत्तं असिसोमेन समया विपृक्तः आहुतं त्रीणि दिवे
वंधनानि स्वाहा इदं यमाय पित्रे अत्यादुदस्मर्याः कार्मिरसीति दध्यङ्ङाथ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घेणाऋषिरनुष्टुप्छन्दः कालोदेवता कालप्रीतये पत्ना० ॐ कार्मिरसिसमुद्र-
स्यत्वाक्षित्याऽ उन्नयामिसमापोऽअद्भिरग्मतः समोषधीभिरोषधिः स्वाहा इदं
कालाय वित्रावसो इतिपरमेष्ठी ऋषिर्जगतीछंदः ध्वित्रगुप्तोदेवता चित्रगुप्त
प्रीतये पत्ना० ॐ इध्मानास्त्वाशतं हिमाऽउमन्तं समिधीमहीं वयस्वंतो
वयस्कृतं सहस्वंतसहस्कृतम् अग्नेसपत्नदम्भनः प्रदधोसोऽअदाभ्यं
चित्रावसोस्वस्तितेपारमशीय स्वाहा इदं चित्रगुप्ताय अथदेवतानांपात्ना
शसामिद्भिः होमः कार्य्यः अग्निंदूतमिति कण्वोमेधातिथिर्ऋषिर्गायत्रीछं
दोऽग्निर्देवता अग्निप्रीतये पत्ना० ॐ अग्निंदूतंपुरोदधे हव्यवाहमुपब्रुवे देवाँ
आसादयादिह स्वाहा इदमग्नये अप्सवंतरितिबृहस्पतिर्ऋषिर्भुरिक्छंदः
आपोदेवताः पात्ना० ॐ अप्सवंतरमृतमप्सुभेषजमपामुत प्रशस्तिभिरश्वा
भवतवाजिनः देवीरापोयोवऽ ऊर्म्मिप्रतूर्त्तिः ककुद्मान्वाजसोमो नाम वा
जश्छमेत्स्वाहा इदमद्भ्यः स्योनापृथिवीतिमेधातिथिर्ऋषिर्गायत्रीछंदः
पृथिवीदेवता पृथिवीप्रीतये पत्ना० ॐ स्योनापृथिवीनोभवानृक्षरानिवेशि
नीयच्छानः शर्म्मसप्रथाः स्वाहा इदं पृथिव्यै इदं विष्णुरिति कण्वोमेधाति
थिर्ऋषिर्गायत्रीछन्दः विष्णुर्देवता विष्णुप्रीतये पत्ना० ॐ इदं विष्णुर्विचक्र

रामः
२७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेत्रेधानिदधेपदम् समूढमस्यपाꣳ सुरे स्वाहा इदं विष्णवे त्रातारमिन्द्रमितिगायत्रे
ऋचमित्रिष्टुप्छन्दः इन्द्रोदेवता इन्द्रप्रीतये पला० ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ
हवेहवे सुहवꣳ शूरमिन्द्रम् हुवामिशक्रमुग्रमुग्रमिन्द्रꣳ स्वस्तिनो मघवाधा
त्विन्द्रः स्वाहा इदमिन्द्राय अदितेऽनुमन्यस्वेति दध्यङ्ङाथर्वणऋचमित्रिष्टुप्छन्दः इ
न्द्राणीदेवता इन्द्राणीप्रीतये पला० ॐ अदितेऽनुमन्यस्वेति इन्द्राणीजीवः पूषा
सिद्धर्मायदीक्ष्वस्वाहा इदमिन्द्राणीये प्रजापतइति हिरण्यगर्भऋचमित्रिष्टुप्
छन्दः प्रजापतिर्देवता प्रजापतिप्रीतये पला० ॐ प्रजापतेनत्वेतान्यन्योविश्वा
रूपाणिपरिताबभूवयत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ स्यामपतयोरयीणाम्
स्वाहा इदं प्रजापतये नमोस्तुसर्पेभ्यइति देवाः ऋचमेकानुष्टुप्छन्दः
सर्पोदेवताः सर्पाणांप्रीतये पला० ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु
येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः स्वाहा इदं सर्पेभ्यो ब्रह्मयज्ञा
नमिति प्रजापतिऋचमित्रिष्टुप्छन्दः ब्रह्मोदेवता ब्रह्मणः प्रीतये पला० ॐ
ब्रह्मयज्ञानम्प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः सबुध्न्याऽउपमाऽ
अस्यविष्ठाः सतश्चयोनिमसतश्चविवः स्वाहा इदं ब्रह्मणे अग्निविनायका
दीनाम् गणानान्त्वेति प्रजापतिऋचमित्रिष्टुप्छन्दः विनायकोदेवता विनाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कप्रीतये पत्ना० ॐ गणानान्त्वागणपति ँ हवामहे प्रियाणान्त्वाप्रियपति
ँ हवामहे निधीनान्त्वानिधिपति ँ हवामहे वसोममम आहमजानिगर्भधम
मात्वमजासिगर्भधम् स्वाहा इदं विनायकाय जातवेदसे इति कश्यप ऋषि
स्त्रिष्टुप् छन्दो दुर्गादेवता दुर्गाप्रीतये पत्ना० ॐ जातवेदसेसुनवामसोममर
तीयतोनिदहाति वेदः सनः पर्षदतिदुर्गाणि विश्वानावेवसिन्धुं दुरितात्य
ग्निः स्वाहा इदं दुर्गाये वातोवामेनेति गंधर्वऋषि त्रिष्टुप् छन्दो वा
तोदेवता वायुप्रीतये पत्ना० ॐ वातोवामनोवागंधर्वोः सप्तविंशतिः तेऽग्र
ऽग्नेऽश्वमजुक्रमीतेऽस्मिन्नवमादधः स्वाहा इदं वायवे क्रध्वा ऋ
स्मेति प्रजापति ऋषि अनुष्टुप् छन्दः आकाशोदेवता आकाशप्रीतये पत्ना०
ॐ क्रध्वाऽअस्मसमिद्धो भवन्मूर्द्धाः भुक्रोगोचिष्टव्यग्नेः घृतमाः सुप्रती
कस्वस्तनोः स्वाहा इदमाकाशाय आवाङ्गोति मध्यातिथि ऋषि गायत्री
छन्दः अश्विनौदेवते अश्विनोः प्रीतये पत्ना० ॐ आवाङ्गामधुमत्म
धिना सृनृतावती तयाजज्ञाभिमीयताम् उपयामगृहीतोस्यश्विभ्यां
त्वमेतेनो निर्म्माथिभ्यान्त्वा स्वाहा इदमश्विभ्याम् क्षेत्राधिपतये वास्तो
ष्पतये च बलिदानमेव कुर्य्यात् नतु होमम् ततइन्द्रादिदिक्पालानां पाला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शसमिद्भिस्तिस्रो जघन्यो होमः त्रातारमिन्द्रमिति भार्गवऋग्भिस्त्रिष्टुप्छन्दः इन्द्रो
देवता होमवि० ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ह्व
यामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय त्र
मिन्द्रतमिति विरूपास ऋग्भिस्त्रिष्टुप्छन्दो निर्ऋतिर्देवता अग्निप्रीतये होमवि० ॐ
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे देवाँ आ सादयादिह स्वाहा इद
मग्नये अग्निर्यमऽइति भार्गवयमदग्निर्दीर्घतमस ऋग्भिस्त्रिष्टुप्छन्दः
यमो देवता यमप्रीतये होमवि० ॐ अग्निर्यमो अग्निर्यमादिभ्यो अर्वन्त स्तृतो
ऽक्रमन व्रतन अग्निर्मोमन मम मा विपृक्ष आ हेत्रीणि दिवि बन्धनानि स्वा
हा इदं यमाय एजेतनिर्ऋतेऽइति वरुणऋग्भिर्जगती छन्दो निर्ऋतिर्देवता
निर्ऋतिप्रीतये होमवि० ॐ एजेतनिर्ऋते भागस्तं जुषस्व स्वाहा अग्निनेत्रेभ्यो
देवेभ्यः पुरःसदभ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासदभ्यः स्वाहा वि
श्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सदभ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वामदेव
त्रेभ्यो देवेभ्य उत्तरासदभ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्य उपरिसदभ्यो
ध्रुवसदभ्यः स्वाहा इदं निर्ऋतये इमं मे वरुणेति ध्रुवः शफऋग्भिर्गाय

Kirtikant Sharma Collection, Najafgarh

CG-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वतीछन्दो वरुणोदेवतावरुणप्रीतये पत्ना० ॐ इमम्मेवरुणश्रुधी हवमद्याचमृ
डय त्वामवस्युराचकेस्वाहा इदंवरुणाय वातोवामनोवेतिगंधर्वो ऋषभ ऋ
षिरनुष्टुप्छन्दो वायुर्देवता वायुप्रीतये पत्ना० ॐ वातोवामनोवागन्धर्वाः सप्तविंश
तिः ते अग्रेनअग्रमनुजग्मुस्ते ऽअस्मिञ्जवमादधुः इदंवायवे वयश्चसोमेति
वन्धुऋषिरत्रिष्टुप्छन्दः कुबेरोदेवताकुबेरप्रीतयेहो० ॐ वयश्चसोमव्रतेतवमन
स्तनूजविष्प्रतः प्रजावंतंसचेमहिस्वाहा इदंकुबेराय तमीशानमितिगोतम
ऋषिर्जगतीछन्दः ईशानोदेवतेशप्रीतये पत्ना० ॐ तमीशानंजगतस्तस्थु
षस्पतिन्धियंजिन्वमवसेहूमहेवयम् पूषानोयथावेदसामसद्वृधेरक्षि
तापायुरदब्धः स्वस्तये स्वाहा इदमीशानाय ब्रह्मजज्ञानमितिप्रजापति
ऋषिस्त्रिष्टुप्छन्दो ब्रह्मदेवता ब्रह्मणः प्रीतये पत्ना० ॐ ब्रह्मजज्ञान
नम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेन आवः सबुध्न्या ऽउपमाऽअस्यवि
ष्ठाः सतश्चयोनिमसतश्चविवः स्वाहा इदंब्रह्मणे नमोस्तुसर्पेभ्य इतिदे
वाऋषयोऽनुष्टुप्छन्दः सर्प्पादेवताः अनन्तप्रीतयेहो० ॐ नमोस्तुसर्पेभ्यो
येकेचपृथिवीमनु येऽअन्तरिक्षे येदिविते भ्यः सर्पेभ्यो नमः स्वाहा इदम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्नाम इति कृत्वा आज्येन पूर्णादिपाकृतिहोमं विधाय ॐ अग्नये स्विष्टकृते स्वा
हा इदमग्नये स्विष्टकृते इति स्विष्टकृतमाज्येन जुहुयात् ततः संस्रव प्राशनम्
पवित्रप्रतिपत्तिः प्रणीताविमोकः यदि होमः ब्रह्मणा पूर्णपात्रदानम् तत्र संक
ल्पः अद्येत्यादि अमुकोऽहं अमुककर्मनिमित्तक ग्रहयागकर्मणः साङ्गफल
प्राप्तये साङ्गुल्याद्यं अपूर्णपूर्णार्थं च इदं पूर्णपात्रं सप्तवर्णं ब्रह्मन् त्वामहं
सम्प्रददे इति दत्वा मन्त्राग्निं प्रतिगृह्णीयात् अथ ग्रहाणां बलिदानविधि
तत्र प्रतिग्रहं पूर्वोक्त द्रव्यैः पायसेन दध्यन्नेन वा उत्तरतो ग्रहवेदीसमीपे होमा
ग्निसमीपे वा बलिदानं कुर्यात् तत्र संकल्पः अद्येत्यादि अमुकोऽहं आदित्या
दिस्थापितदेवानां प्रीतये बलिदानं करिष्ये सदीपं बलिं संस्थाप्य भोभो सूर्य्य
एनं सदीपं गुडौदनबलिं मावसबलिं दध्यन्नबलिं वा गृहाण मम अमवा
सपुत्रसपरिवारकस्य यजमानस्य आयुःकर्ता सोमकर्ता शान्तिकर्ता पुष्टि
कर्ता पुष्टिकर्ता भव एवं प्रियप्रायस्य मूल्यं कर्ता भो २ सोमस्य नंघृतपायस
बलिं गृ० भो २ भौमस्य नंक्षीरगुडघृतादि निर्मितोत्करिका परिनामकसंयावलिं
गृ० भो २ बुधस्य नंक्षीरौदनबलिं० भो २ बृहस्पतेस्य नंघृतौदनबलिं० भो २ शुक्रस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नंदघृतोदनबलिं गृ० भो२ शनैश्चरस्य कृशरान्नबलिं गृ० भो२ राहो रन्नं अजर्मांसव
लिं गृ० भो२ केतोरन्नं चित्रोदनबलिं गृ० अथाधिदेवतानाम् भो२ रुद्रसदीपमनं गृ०
भो२ उमे० आज्यः कर्त्री० पुष्पिकर्त्रीभव भो२ स्कंद० भो२ पुलन० भो२ ब्रह्मन्० भो२
इन्द्र० भो२ यम० भो२ काल० भो२ चित्रगुप्त० अथ प्रत्यधिदेवतानाम् भो२ अग्नेस
दीप० भो२ आपसदीपमनं० गृह्णत आज्यः कर्त्र्यौ पुष्पिकर्त्र्यौ भवत भो२ उमे०
आज्यः कर्त्री० भो२ विष्णो० भो२ इन्द्र० भो२ इन्द्राणि० आज्यः कर्त्री० भो२ प्रजापते०
भो२ सर्पाः० आज्यकर्तारः० पुष्पिकर्तारो भवत भो२ ब्रह्मन्० अथ विनायकादी
नाम् भो२ विनायक० भो२ दुर्गे आज्यकर्त्री० भो२ वायो आज्यकर्ता० भो२ आकाश
भो२ अश्विनौ गृह्णतम्० आज्यः कर्तारौ० पुष्पिकर्तारौ भवताम् अथ इन्द्रादिदिक्पा
लानाम् भो२ इन्द्र० भो२ अग्ने० भो२ यम० भो२ निर्ऋते० भो२ वरुण० भो२ वायो०
भो२ कुबेर० भो२ ईशान० भो२ ब्रह्मन्० भो२ अनन्त० भो२ वास्तोष्पते० अथ क्षे
त्रपालबलिः पत्रपुटकोपरि कृशरान्नं निधाय नवगोधूमचूर्णनिर्मितं चतुर्व
र्त्तिकोपेतं दीपं सदक्षिणांसंस्थाप्य क्षेत्रपालाय बलिदानं करिष्ये इति संक
ल्प्य पुरोहितमणिभूदेवा चन्दनादिनाभ्यर्च्य क्षेत्रपालं ध्यायेत् यथाभ्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जटाधरं त्रिनयनं नीलाञ्जनादिप्रभं दंष्ट्राडाना गदाकपालमस्त्रा
स्त्रगंधवस्त्रावृतम् घ्राणाघ्रेयमखल ध्यानेमिल ॐ कार भीमंविभुं वन्देसं
हितसर्पकुण्डल धरं श्रीक्षेत्रपालंसदा इतिध्यात्वा कुशान्नबलिमादाय
ॐ नमोभगवते क्षेत्रपालाय क्रौं क्रीं क्रूं क्षें क्रौं क्षः भूतप्रेतपिशाच डाकिनी
शाकिनी वेतालादिपरिवारयुताय एषसदीपः सदक्षिणः सताम्बूलः कुश
ान्नबलिर्नमः भोभोक्षेत्रपाल मह२ तुह२ जल२ ममह२ फंकारभूतादिभ्यु
ख रक्ष२ ग्रहमखकर्मणि अयंसदीपं कुशान्नबलिंभक्ष२ यजमानं पा
हि२ ममवास पुत्रसपरिवारस्य यजमानस्यवा आयुःकर्ता क्षेमकर्ता शा
न्तिकर्ता पुष्टिकर्ता तुष्टिकर्ताभव इतिमन्त्रेणादत्वा तनचतुष्पथेक्षिपेत्
ततआचम्य घोरशान्तिरितिमन्त्रेण तत्स्थलं संप्रोक्षेत् इतिबलिदानवि
धिः ततः पूर्णाहुतिहोमं विदध्यात् तत्रमन्त्राः कुशकण्डिकान्ते अग्निपूजनं
अङ्गालम्भनंकुर्यात् आचार्यविधिना आचार्यंविधाय आचार्यादिभ्यो
दक्षिणांदद्यात् तत्रदक्षिणानियमः आचार्यस्यतु यद्वा तदर्धंवा क्रम
शोभवेत् तदर्धमृत्विगादीनां मन्त्रेणाच तदर्धकम् शतहोमिमामेकं
सहस्रदशमामकम् अयुतशतमामंस्यात् लक्षमामसहस्रकम् अयुत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हारणांपीतस्य प्रत्येकं दानानि आदित्यपीतस्य कपिलागौः सोमाय शुक्लं भौमा
य रक्तवृषभः बुधाय कृष्णवर्णम् बृहस्पतये सकृष्णवर्णं पीतवस्त्रम् शुक्राय श्वेता
श्वः शनये कृष्णागौः राहवे खड्गः केतवे छागः यथोक्तद्रव्यालाभे सर्वेषां पीतस्य
कृष्णवर्णमेव तत्र संकल्पः अद्येत्यादि अमुकोहं अमुककर्मणि निमित्तकय
ज्ञागकर्मणः साङ्गफलप्राप्तये साङ्गतासिद्ध्यर्थं च आदित्यादिनवग्रहारणां
पीतस्य इदं कृष्णवर्णं द्रव्यं दक्षिणां च आचार्यब्रह्मर्त्विक् सदस्येभ्योऽन्येभ्यो
ब्राह्मणेभ्यः ब्राह्मणेभ्यश्च यथांशेन विभज्य दास्ये ॐ तत्सत्ममम नमाम
श्रोपपन्नेनाम्नेन यथासंख्याकान् ब्राह्मणांश्च भोजयिष्ये इति संकल्प
दक्षिणां दत्वा अग्निं प्रदक्षिणीकृत्य विसर्जयेत् ततः उत्तरांगस्थेन ग्रहान्स
म्पूज्य ततः आचार्यादयः सर्वे ब्राह्मणाः कलशोदकेन वक्ष्यमाणवैदिक
पौराणिकमन्त्रैः भद्रासनोपविष्टस्य सकुटुम्बस्य यजमानस्याभिषेकं
अभिषेकं कुर्युः तत्रवैदिकम आः ॐ देवसुवः प्रसरितः स्तीर्णानि जलदान
दाः आयान्तु यजमानस्य दुरितक्षयकारकाः १ ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः
स्वस्तिनः पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पति
र्दधातु २ ॐ पयः पृथिव्यां पयः ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पयस्वतीः प्रदिशः सन्तु मह्यम् २ ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ४ ॐ अग्निर्देवता वातो देवता
सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता आदित्या देवता मरुतो देवता वि
श्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ५ मित्रावरुणावृतवसू
धस्तां धर्त्रेस्थ वरुणो ग्रावासि त्वा वर्त्रुसि त्वा कृष्णे त्वा क्षेमाय त्वा ६ द्यौः
शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्प
तयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा
मा शान्तिरेधि ७ ॐ विश्वानि देव सवितर्दुरितानि परासुव यद्भ
द्रं तन्न आसुव ॐ देवस्य त्वा सवितः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
सरस्वत्यै वाचो यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ९ ॐ देवस्य त्वा
सवितः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यन्तुर्यन्त्रे
णाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि १० ॐ देवस्य त्वा
सवितः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अश्विनोर्भैषज्येन वीर्यायै
त्वा ओजसे त्वा भिषिञ्चामि इन्द्रस्येन्द्रियेण बलायाश्रियै त्वा यशसे त्वाभिषिञ्चा
मि ११ कामस्य कर्मणे त्वा कामाय त्वा कामस्य कर्मणे त्वा कामस्य राज्ञे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रु १२ ॐ शिरोमे श्रीर्यशो मुखन्नियमिः केशाः श्मश्रूणि राजा मे प्राणो ऽ अक्षि
तश्च सम्राट् वक्षो विराट् पाजस १३ जिह्वा मे भद्रं वाङ्मे नो मन्युः स्वराज्यामः
मोदाः प्रमोदाऽ अङ्गुलीरत्नानि ऊरू नि मित्रम्मे सहः १४ बाहू मे बलमिन्द्रिय
ञ्च हस्तौ मे कर्म वीर्यम् आत्मा क्षत्रं पुरोहितम् १५ पृष्ठिर्मे राष्ट्रमुदरमंसौ मे
ग्रीवाश्च श्रोणी ऽ ऊरूऽ अरत्नी जानुनी विशो मे ङ्गानि सर्वतः १६ नाभिर्मे चित्तं
विज्ञानम्पायुर्मे पायुरिति मे सदः आनन्दनन्दावण्डौ मे भगः सौभाग्यं यज्ञः ज
ङ्घाभ्यां पदभ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः १७ प्रतिष्ठे द्वे प्रतिष्ठितिष्ठामि
राष्ट्रे प्रत्यस्थेकुप्रतितिष्ठामि गोष्वश्वेषु प्रत्यङ्गेषु प्रतितिष्ठामि आत्मनि प्रति
प्राणेषु प्रतितिष्ठामि पुत्रे प्रतिष्ठापृथिव्योः प्रतितिष्ठामि यज्ञे १८ त्रयो
देवाऽ एकादशत्रयस्त्रिंशाः शाकल्यस्य वसवः पुरोहितः देवस्य सवितुः स
वेदेवीरेवल्लुमाः १९ प्रथमाद्वितीये द्वितीयात्तृतीये तृतीयाः सत्ये
नसत्यं यज्ञेन यज्ञो यजुभिर्यजुः २० त्रि सामभिः सामान्यृग्भिर्ऋचः पुरोनु
वाक्याभिः पुरोनुवाक्याऽ ज्याभिर्ज्याः वयसः कोदे धूमदकारा आकृतीभि
राकृतयो मेकाभिरेकमभवद्भुजन्त २० तद्वृष्णोरपृणामहं यान्नुपत्नि मगात्
पत्नीपतिर्यदेवी स्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऽ ऊर्ध्वजिगातु भेषजम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शान्तोऽस्ताहिपदेशं चतुष्पदे २१ ॐ अतन्द्रमसामहेनतोनोऽग्रभजङ्घि मघवच्छ
दितवन्तऽऋतिभिर्विद्विषो विमृधोजहि २२ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानाय
न्त्यभिविशमानाः इन्द्राएवाग्नीवृत्रमोराद स्ताऽआपोदेवीरिहमामवन्तु २३ यासां
राजावरुणोयातिमध्येऽअपश्यज्जनानां मध्यमश्रुतः भुवद्यिमन्यास्ताऽआपोदे
वीरिहमामवन्तु २४ याऽआपोदिव्याऽउतवास्रवन्ति खनित्रिमा उतवास्वयंजाः
समुद्रार्थाःशुचयःपावकास्ताऽआपोदेवीरिहमामवन्तु २५ यासुराजावरु
णो यासुसोमोविश्वेदेवायाःसूर्यमदन्ति वैश्वानरोयास्वग्निःप्रविष्टाऽ
आपोदेवीरिहमामवन्तु २६ यासन्तामिहदेवाःस्वाभन्तांमरुतांगणाः यास
नांविश्वाभूतानि यज्ञायमरुपासत २७ आपऽइदाऽउभेभजं आपोऽअमी
वचातनी आपःसर्वस्यभेषजी स्तोस्तेकरावन्तुभेषजम् २८ हस्ताभ्यांदशाग्ना
खाभ्यां जिह्वावाचःपुरोगवी अनामयित्नुभ्यां ताभ्यांतोपस्पृशामि २९ इमा
ऽआपःशिवतमाऽइमाराक्षस्यभेषजीः इमाराक्षस्यवर्द्धिनी रिमाराक्षस्यभृता
मता ३० याभिरिन्द्रमभिषिञ्चन्प्रजापतिं सोमंराजानं वरुणंयमंमनुं ताभि
रिन्द्रमभिषिञ्चामि त्वामहंराज्ञां त्वमधिराजोभवेह ३१ महान्तंत्वामहीनां
सखायंचमराणीनाम् देवीजनित्र्यजीजनत् ३२ ॐ देवस्यत्वासवितुःप्रसव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्विनोर्बाहुभ्यां पूषणस्तेजसा सरस्वत्यस्यवर्चसे इन्द्रस्येन्द्रियेणाभिषिञ्चामि बलायश्रि
यै यशसेन्नाद्याय ॥ ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु अक्षुद्रमस्तु अपापं रो
गः शोकः कार्श्यं दुःखं दारिद्र्यं नश्यतु हतमस्तु ॥ ॐ भूर्भुवः स्वः अमृताभिषेकोस्तु
अथ पौराणिक मन्त्राः ॥ करणस्त्वामभिषिञ्चन् ब्रह्माविष्णुमहेश्वराः वासुदेवो ज
गन्नाथ स्तथा संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयायते आख
ण्डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ब्रह्मणा सहितः सोमो दिक्पालाः पान्तु वः सदा ३ कीर्तिर्लक्ष्मीर्धृति
र्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शान्ति स्तुष्टिः कान्तिश्च मातरः ४
एतास्त्वामभि षिञ्चन्तु धर्मपत्न्यः समागताः आदित्यश्चन्द्रमा भौमो बुधजीव
सितार्कगाः ५ ग्रहास्त्वामभिषिञ्चन्तु राहुकेतुसमन्विताः देवदानवगन्धर्वाः
यक्षराक्षसपन्नगाः ६ ऋषयो मुनयो गावो देवमातर एव च देवपत्न्यो द्रुमा नागा
दैत्याश्चाप्सरसो गणाः ७ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च औषधा
नि चरत्नानि कालस्यावयवाश्च ये ८ सरितः सागराः शैला स्तीर्थानि जलदानदाः
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ९ विघ्नेशः स्कन्दषोडशो जाकृपा
नानवग्रहाः सर्वदोषप्रशमनं सर्वे कुर्वन्तु शान्तिदाः १० ॥ ॐ भूतप्रेतपिशाचेभ्यो दि

रामः
२३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वीति अभिषेकं कृत्वा ॐ महामायाप्रसादास्त्वा कृत्वाभिषेकः अथ तिलककरणम्
तत्र तिलकमहिमा आयुर्वृद्धिः शुभारोग्ये अग्नेस्तेजो बलं प्रजा तिलकेन कृते नेह
भूयादन्यदपीप्सितम् १ धनं सौभाग्यमारोग्ये ब्रह्मतेजोऽमलायतिः ब्रह्मपुत्रे
भवतेजो भवेत्तु तिलके कृते २ अथ तिलककरणमन्त्रो ॐ भद्रमस्तु शिवं पातु
महालक्ष्मीप्रसीदतु रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्वदा १ सपत्नादुर्ग्रहा-
पापा दुःखसत्वाद्युपद्रवाः तमालपत्रमालोक्य निष्प्रभावा भवन्तु इति पिष्टातक
चन्दनादिना तिलकं कुर्य्युः ॐ अक्षताः पान्तु इति तिलफाक्षतारोपणम् पुत
आणाम् स्त्रीणां तु विशेषः ॐ अन्तिवृध्यमकल्प्यं चरन्तपरितस्थुषः रोचते रोच
नादिवि इति तिलकम् अक्षतापान्त्वित्य क्षतारोपणम् अथ मन्त्र पाठः ॐ
गणानान्त्वा० १ ॐ ब्रह्मयज्ञानं० २ ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः अतो धर्माणि
धारयन् तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् ३
ॐ त्र्यम्बकं यजा० ४ ॐ समावे० ॐ आकूतेन० ॐ इमेन्द्रया० ॐ अग्निर्मूर्द्धा०
ॐ उद्बुध्य० ॐ बृहस्पते० ॐ अन्नात्परि० ॐ शन्नो देवी० ॐ कदान० ॐ केतुं कृ
रावन्न० १४ ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथयज्ञ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रा चृतिनत चन्न र्वदुपस्त्व सत्याः सन्तु यजमानस्य कामा २५ ॐ कामं कामदु
घे धुक्ष्वमि त्रामवरुणाभ्यां च इन्द्राग्निभ्यां भूत्वा प्रजाभ्य ऽ ओमधीभ्यः
२६ दीर्घायुस्त ऽ ओमधे खनिता यस्मै च त्वा खनाम्यहम् अथो त्वं दीर्घायुर्भू
त्वा शतवल्शा विरोहतात् २७ ॐ सहस्रस्य प्रतिमासि सहस्रस्य प्रमासि
सहस्रस्योन्मासि सहस्रोसि सहस्राय त्वा २८ अङ्गं अङ्गं ग ऽ अङ्गपतिं ग ऽ
स्वायोनिं ग ऽ स्वाहा एमेतमङ्गोअङ्गपते सहसूक्तावाकः सर्ववीरस्तज्जुषस्व
स्वाहा २९ ॐ ग्रीवा वसमाजुष्य मीराग्वमाविभात्पवमानं महीजेधान्यंधनं
पशुं बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः ३० मन्त्राष्टाः सफलासन्तु पूर्णास
तुमनोरथाः शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ३१ पुत्रपुत्रमारणाभ्यां
अथ स्त्रीणां मंत्रपाठः श्रीर्यते लक्ष्मीर्यपान्यास्यहो रात्रे पार्श्वे नक्षत्राणि रू
पमश्विनौ व्यात्तम् इष्टानि मारणा मुम्भमुमाणा सर्वलोकम्भ ऽ उमाणा १ तस्य
त्वीभिरुग्रा केमदवाः पुत्रैर्भ्रातृभिरश्वाहिरथैः नाकङ्गमानाः सुकृतस्य
लोके तृतीये पृष्ठे ऽ अधिरोचने दिवः २ पुत्रमिवपितरावश्विना वेन्द्रावुभा का
मेदंश ऽ ग्रानाभिः यत्कंरम्भपिवच्छचीभिः सारस्वतीत्वामघवन्नविष्वक ३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्राशीः सफलासन्तु आयुष्मती पुत्रवती सौभाग्यवती जीववत्साभव इति ततो
रक्षाबंधनम् तत्र मंत्रौ ॐ रक्षसाभोगोसि निबृ ॐ रक्षोभिनिबृ मिदमहं ॐ र
क्षोवधाय इदमहं ॐ रक्षोऽधमं तमोनस्मामि १ येनबद्धो बलीराजा दानवेन्द्रो म
हाबलः तेनत्वामभिबध्नामि रक्षे माचल माचल २ त्वंब्राह्मणो नृपः
पाहि मृगयोगिरः रक्षातोक्तमुत्तमनारक्षा कल्याणभूयात् १ ततोभूयसीसं
कल्प्यः अद्येहेत्यादि अमुकोहं अमुककर्मनिमित्तकं ग्रहयागकर्मणः
साङ्गतासिद्ध्यर्थं इमांभूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो
दीनानाथेभ्यश्च विभज्य दातुं तद्रजे तत्सामम अस्मस्मृत्यतिपठेत्
इतिग्रहयागपद्धतिः अथघृतच्छाया आज्यपात्रे घृतपूरितं सद्रव्यं
कृत्वा चन्दनाक्षतैश्चतुष्कोणेषु सम्मृज्य कुशोदूर्वाभिर्वा मन्त्रैरभिमंत्रये
त् मन्त्राः ॐ आज्यं परमयज्ञीयं आज्यं तेजो मयोनिधिः आज्यं हि देव
देवानां प्रियमाज्यं स्मितं जगत् तदाज्यवीक्षणाभक्त्या कृतं मंगलमाप्नुयात्
दुःस्वप्नं दुर्निमित्तं च विघ्नो घो नश्यति ध्रुवम् तेजः प्रज्ञाशौर्यं च बलं चा
पि प्रवर्द्धते पुराणं सप्तकं राज्यं च भवेत्सदपीप्सितम् ज्ञात्वावाऽज्ञानतो
वापि मनोवाक्काय कर्मभिः कृतं तत्पातकं तन्मे घृतस्पर्शाद्विनश्यतु आज्ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चैवमुखंदृष्ट्वा सर्वपापैः प्रमुच्यते इत्यभिमन्त्र्य सङ्कल्पः अद्येहामुकगोत्रोऽ
मुकप्रवरोऽमुकशर्म्माहं सर्वारिष्टविनाशार्थं आज्यावेक्षणं करिष्ये ॐ तेजो
सीतिपरमेष्ठी ऋषिः त्रिष्टुप्छन्दः आज्यं देवता आज्यावेक्षणे विनियोगः ॐ
तेजोसिशुक्रमस्यमृतमसि धामनामासिप्रियं देवानां मनाधृष्टं देवयजन
मसि आज्यं तेजसमुद्धृतं माज्यं पापहरं परम् आज्येन देवास्तृप्यन्ति आ
ज्येलोकाः प्रतिष्ठिताः भौमान्तरिक्षदिव्याश्च सर्वकल्मषमागतम् तत्स
र्वमाज्य संस्पर्शान्न्यूणाङ्गमुपगच्छतु आज्यमेवमुखंदृष्ट्वा सर्वपापैः
प्रमुच्यते ॐ ध्रुवासिध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजयापशुभिर्भू
यात् घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसिविश्वजनस्य छा
या छायादर्शनं पापनाशनम् इत्थमवलोक्याज्यस्पर्शं कृत्वा सङ्कल्पः
अद्येहामुकगोत्रोऽमुकशर्म्माहं इदमवलोकितमाज्यं ताम्रपात्रस्थितं
सद्रव्यं मृत्युञ्जयदेवत्यं मृत्युञ्जय प्रीतये सर्वारिष्टपरिहारार्थं अमुक
गोत्रायामुकशर्म्मणे ब्राह्मणायतुभ्यं सम्प्रददे ॐ तत्सत्यम् ब्राह्म
णोसम्मुखं दद्यात् दानवाक्यं पठेत् कामधेनोसमुद्भूतं देवानामुत्तमं हविः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदंपत्रंवि स्मयेनाभिरिवर्त

तस्माद्यदशमंभवेत् तत्रापत्यंपुत्रजीवि नस्माद्दस्त्रं वंत्वेजोद् पित्रंपौष्णंच्चज्ये
ष्ठांवयलतोवर्ज्यंवेद्धः प्रोडशर्क्षनिशाः स्त्रीणां स्नानाद्युग्मासुपंचिशोद् वम्ह
दिनस्मयुग्मत्वेऽपि मसृपांस्यान्मध्यमः कन श्रुतिवचनाद् मसृहिनं त्वाज्यम्
तस्माद्रजोदर्शनादारभ्य चतस्रोरात्रीस्त्यक्त्वा पञ्चमीसप्तम्योर्युग्मत्वाद्
मसृहीनिमिद्धत्वात् सन्ताज्य अमृमीमारभ्यमोडशीपर्यन्तं युग्मासुरात्रिषु
चन्द्रताराणुकूलासु मघारेवती ज्येष्ठानक्षत्रवर्जितासु अनुरागिणीं स्वलंकृ
तांस्त्रियं स्वयंचस्वलङ्कृतो द्विगुणानुरागः सकलंगेरात्रौ गर्भाधानंकुर्यात्
तत्रमंत्राः ॐ विष्णुर्योनिंकल्पयतु त्वष्टारूपाणिपिंशतु आसिञ्चतु प्र
जापतिर्धाता गर्भंदधातुते १ ॐ गर्भंधेहि सिनीवाली गर्भंधेहि सरस्वती
गर्भंदेवाऽश्विनौदेवौ वाधत्तांपुष्करस्रजौ २ ॐ हिरण्यऽअरणीयं
निर्मथ्नतो अश्विनासह ॥ ततोगर्भंहवामहे दशमेमासिसूतवे ३ ॐ रू
पंरूपंप्रतिरूपो वभूव तदस्यरूपंप्रतिचक्षणाय इन्द्रोमायाभिः पुरुरू
पईयते युक्तोहरसः शतादश इतिपठित्वा अभिगमनंकुर्यात् ततः शो
चंविधायाचम्य वध्वादक्षिणांशस्योपरि हस्तंनीत्वा हृदयमालभेत ॐ
अन्नमसीमेहृदयं दिविचन्द्रमसिश्रितम् वेदाहंतन्मा विद्यात्पश्यमशरदः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदं पत्रं वेत्स्यसे जिविष्यसि

गतम् इति पठित्वा ताम्बूलचर्वणं कुर्वीत एवं प्रदिगर्भं नदधाति तत्रोपायमाह
सैंहपोः श्वेतपुष्पिकामूलं मूलनक्षत्रे उत्पाट्य उदपेषं पिष्ट्वा चतुर्थेहनि स्नो
तायां निशायां वध्वा दक्षिणस्यां नासिकायां प्रक्षिपति तत्रमंत्रः ॐ इम
मोषधीस्त्वा मारणा सहमानासरस्वती अस्यास्त्वं वृहत्याः पुत्रः पितुरि
वजाग्रभम् तथा द्वितीयोपायमाह पिराडपितृयज्ञे ऽनवघ्रातं मध्यमं पिराडं
पत्नीं प्राशयेत् मन्त्रः ॐ आधत्तपितरो गर्भं कुमारं पुष्करस्त्रजम् यथेहपु
रुषोसदत् तथोत्तृतीयोपायमाह नित्यहोमात्पूर्वं अग्नेनयेत्रेण स्त्री
एकामाहुतिं जुहुयात् ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ
पुमानिन्द्रश्च सूर्यश्च पुमांसं वर्द्धतामयि स्वाहेति ततो योनिस्फुरणादि
ना गर्भाधानं जातमिति निश्चित्य व्याघ्रामातिभोजन दिवास्वापारोह
ण कुक्कुटासनादीनि वर्जयेत् ततः प्रातर्हस्तिरणं दधात इति गर्भाधानसं
स्कारः अथ पुंसवनम् तत्र पारस्करसूत्रम् मासि तृतीये पुंसवनं कुर्यात्
तत्र गर्भाधानप्रभृति तृतीये मासि पुंनक्षत्रे यस्मिन्दिने पुष्यश्रवणाह
स्तमृगशीर्षादि नक्षत्रयोगेन चन्द्रमा भवति तस्मिन् चन्द्रतारानुकूले

राम:
३६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आयुर्वृद्धिकरं दातु राज्यं पातु सदैव मां ब्राह्मणस्य मंत्रांशिर्मंत्रस्यात् ॐ त्र्य
म्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृ
तात् श्रीमृत्युञ्जय प्रसादात् इति श्रुतिरुक्ता अथ श्रुतिछिद्रं मंत्राः व्रतानी
व्रतराजेन्द्र व्रतानां व्रत मुत्तमम् व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यच्च कर्मणि सर्वं
भवतु मे छिद्रं ब्राह्मणा भवतां गिरा ब्राह्मणास्तानि भाषन्ते मन्यन्ते तानि दे
वता सर्वदेवमयो विप्रो नतद्वचन मन्यथा उपवासो व्रतश्चैव ज्ञानं तीर्थं फलं
तपः विप्रैः संभाषितं यच्च सम्पूर्णं भवतु व्रतं अन्नं भक्षणं पानं च सत्यार्थां
ताम्रभाजने यदि भुक्तं भुक्तं वा स्वप्नान्तर प्रष्टायिचा दन्तान्तरविलग्नेवा
क्षम्यतां मकरन्दः व्यासवाल्मीकवचनात्पाराशरयाज्ञवल्क्यवचनाच्च
नारदादीनां सम्पूर्णं भवतु व्रतं कृतमेतद्व्रतं विधिहीनं देशहीनं काल
हीनं श्रद्धाहीनं क्रियाहीनं वाक्यहीनं यत्कृतं तत्कृतमस्तु यन्न कृतं त
त् श्रीविष्णोः प्रसादात् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु अस्तु परि
पूर्णम् इति श्रुतिछिद्रमंत्राः अथ क्रमप्राप्तं गर्भाधान संस्कारः तत्र प्रसंगा
द्रजस्वलाधर्मानाह व्यासः रजोदर्शना द्ध्याः सर्वमेव परित्यजेत् सोवेरज

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वस्त्रीषु रमिताः स्वगृहे वसेत् एकाम्बरधरा साध्वी नानाभरणवर्जिता मौनीत्य
घोषुखीवक्त्रः पतिपादद्वयं वन्दन्ती अग्नीजात्केवलं नक्तं भक्तं मृण्मयभाजने स्व
पेद्भूमावप्रमत्ता जपेद्दिवसहस्रपम् स्नात्वादयार्त्तवती सैवेलानुदितेरवौ विलोक्य
भर्तृवदनं शुद्धा भवति धर्मतः शुद्धा भवेच्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला दैवक
र्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ५ अथ स्नानानन्तरं पुनरपि रजोदर्शने गा
ते शुद्धा एवेत्याहापस्तंबः रजस्वलायदा स्नाता पुनरेव रजस्वला अथ ऋतुदर्शनादि
नादर्वाग्ऋषित्वं न विधेत अथ गर्भाधानप्रयोगः तत्र प्रथमरजोदर्शने जाते प्रा
तः स्नात्वा अभ्यंगपूर्वकं स्नात्वा सर्वौषधिसप्तमृत्तिकापंचल्वक पञ्चपल्लवस
हितकलशोदकेन वधूं स्नापयित्वा अहतधौतवाससी परिधाप्य स्वासने समु
पविश्याचम्य अर्घं संस्थाप्य प्राणायामं कृत्वा गणेशपूजासंकल्पः अद्येह
त्यादि अमुकगोत्रोऽमुकशर्मा अमुकगोत्रास्यावध्याः संस्कारार्थं
मद्द्वारा अस्यां जनिष्यमाणा सर्वगर्भाणां बीजगर्भसमुद्भवेनो निर्वहणद्वारा श्री
परमेश्वरप्रीतये गर्भाधानसंस्कारं करिष्ये तत्पूर्वाङ्गत्वेन गणेशपूजनमातृपूजन
नान्दीश्राद्धं पुण्याहवाचनानि करिष्ये इति संकल्प्य गणेशपूजां मातृपूजां ना
न्दीश्राद्धं पुण्याहवाचनानि विधाय गर्भाधानं कुर्यात् यस्मिन्नृतौ भवेद्गर्भ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्माद्य दयमंभवेत् तत्रापत्यंप्रजायेत तस्माद्दक्षत्रयंत्यजेत् पित्र्यंमौलंचज्येष्ठं यत्नतो
वर्जयेद्बुधः षोडशर्तुनिशाः स्त्रीणां स्नात्वाक्ताद्युग्मासुसंविशेत् अमृदिनास्वयुग्मत्वे ऽपि
अमृतांस्यान्मध्यमः क्रत इतिवचनात् अमृदिनंत्याज्यम् तस्माद्द्वादशीनादारभ्य चतस्रो
रात्रीस्त्यक्त्वा पञ्चमीसप्तम्यो युग्मत्वात् अमृतीनिमित्तत्वात् सन्ताज्य अमृतीमारभ्य
षोडशीपर्यन्तं युग्मारात्रिषु चन्द्रतारानुकूलासु मघारवतीज्येष्ठानक्षत्रवर्जितासु
अनुरागिणीं स्वलंकृतां स्त्रियं स्वयंचस्वलङ्कृतोऽपि रागानुरागः स्वलग्नेरात्रौ गर्भाधानं कु
र्यात् तत्रमंत्राः ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिञ्चतु प्रजापतिर्धाता
गर्भं दधातु ते १ ॐ गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वती गर्भं ते ऽश्विनौ देवावाध
त्तां पुष्करस्रजौ ॐ हिरण्ये ऽअरणीऽ निर्मथ्नतो अश्विनासह ततो गर्भं हवामहे दश
मे मासि सूतवे २ ॐ रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः
पुरुरूपईयते युक्ताह्यस्य हरयः शतादश इति पठित्वा अभिगमनं कुर्यात् ततः शोचं विधाय वध्वा
दक्षिणांघ्रेस्योपरि हस्तं नीत्वा हृदयमालभते ॐ यत्ते रुक्मं सोमे हृदयं दिवि चन्द्रमसि श्रि
तम् वेदाहं तन्मां विद्यात् पश्येम शरदः शतम् इति पठित्वा ताम्बूलचर्वणं कुर्वीत एवं अदिग
भंनं दधाति तत्रोपायमाह सैंहल्याः श्वेतपुष्पिकामूलं मूलनक्षत्रे उत्पाट्य उदपेषं पिष्ट्वा
चतुर्थेहनि लाताभांनिशामां वध्वादक्षिणस्यांनासि कायां भासिञ्चति तत्रमंत्रः ॐ
इयमोषधीश्चामभाणा सहमानासरस्वती अस्याः अहं बृहत्याः पुत्रः पितुरिव जा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गृभम् तथाद्वितीयोपायमाह पिण्डपितृयज्ञेऽनवयातं मध्यमंपिण्डं पत्नीं प्राशयेत् मन्त्रः
ॐ आधत्तपितरोगर्भं कुमारं पुष्करस्रजं यथेह पुरुषोऽसदत् तथात्वंतीयोपायमाह नित्य
होमात्पूर्वं अनेनमन्त्रेण स्त्रीरेकामाहुतिं जुहुयात् ॐ पुमांसौमित्रावरुणौ पुमांसावश्विना
वुभौ पुमानिन्द्रश्च सूर्यश्च पुमांसंवद्धुतामयि स्वाहेति ततोयोनिस्फुरणादिना गर्भा
धानंजातमितिनिश्चित्य व्याप्तामाति भोजन दिवास्वापोरुहणाकक्षुरासनादीनि वर्जये
त् ततः प्रातर्दक्षिणांदद्यात् इतिगर्भाधानसंस्कारः अथजातकर्म्मविधिः अथपुत्रे
जाते पिताशीघ्रंसचेलंस्नायात् स्नानसंकल्पः अद्येहामुकोहं पुत्रजननिमित्तकं सचे
लस्नानंकरिष्ये इतिसंकल्प्य स्नात्वा शुभेनवधौतेवाससीपरिधाय प्राङ्मुखउपवि
श्य नालेछेदात्पूर्वं गणेशपूजनंकुर्य्यात् पूजासामग्रींसम्पाद्य अद्येहामुकोहं जात
स्यपुत्रस्य दीर्घायुरारोग्यावाप्तये करिष्यमाण जातकर्म्मकर्म्मणि निर्विघ्नता का
र्य्यसिद्धये पूर्वांगत्वेन गणेशपूजनं करिष्ये इतिसंकल्प्य उक्तप्रकारेणगणेशंसम्पू
ज्य दक्षिणांदत्वा प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि संकीर्त्य अमुकोहं अ
स्यकुमारस्य गर्भाधानजनितसकलदोषनिवर्हणाद्यर्थं मेधाभिवृद्धये वीज
गर्भसमुद्भवेनो निवर्हणाद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म्माख्यंसंस्कारं करिष्ये
ततोमातृपूजासंकल्पः अद्येहामुकोहं पुत्रजननिमित्तकं गौर्य्यादिषोडशमा
तॄणांपूजनंकरिष्ये इतिसंकल्प्य तासांपूजनंपूर्वोक्तप्रकारेणविधाय वसोर्धाराः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पातयित्वा आभ्युदयिकश्राद्धं विदध्यात् तत्र प्रतिज्ञाया अद्येहेत्यादि अमुकगोत्राणां अस्म
त्पितृपितामही प्रपितामहीनां अमुकामुकीदेवीनां नान्दीमुखीनां तथा अमुकगोत्राणां अ
स्मत्पितृपितामह प्रपितामहानां अमुकामुकदेवानां नान्दीमुखानां तथा अमुकगोत्रा
णां अस्मत्मातामह प्रमातामहानां वृद्धप्रमातामहानां अमुकामुकदेवानां सपत्नीका
नां नान्दीमुखानां सत्यवसुसंज्ञक विश्वेदेवापूर्वकं संक्षिप्तसंकल्पविधानेन नांदी
मुखश्राद्धं करिष्ये नमोवृद्धि२ स्त्रिये इतिसंकल्प्य पूर्वोक्तविधानेन नान्दीश्राद्धं विधा
य पुराणाहं वाचयेत् यथा अमुकोहं जातस्य पुत्रस्य करिष्यमाणजातकर्म्मक
र्म्मणि सकलमङ्गलाभिवृद्ध्यर्थं ब्राह्मणद्वारा पुराणाहं वाचये तदङ्गत्वेन चतुर्णां
ब्राह्मणानां पूजनं वरणं च करिष्ये इतिसंकल्प्य वृत्वा स्वस्तिवाचयित्वा कलशेन
ग्रहानावाह्य सम्पूज्य पुत्रस्य मेधाजननाख्यं कर्म कुर्य्यात् तत्र कृष्णवर्णादि तेजसे
पात्रे मधुघृतमिश्रयित्वा केवलं घृतं वा कृष्णवर्णान्तर्हि तथा नाभिकर्मा ऽऽ दाय जातं
कुमारं सङ्कल्पयामीति जातस्य जिह्वामनुमार्ष्टी त्यर्थः तत्र मन्त्रः ॐ भूस्त्वयि दधामि
ॐ भुवस्त्वयि दधामि ॐ स्वस्त्वयि दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि इतिस
ङ्कल्पयामीत् इतिमेधाजननम् अथास्याकुमार्य्य करणम् यथाजातस्य नाभिस
मीपे दक्षिणकर्णसमीपे वा जपति ॐ अग्निरायुष्मान् सवनस्पति भिरायुष्मान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेनत्वामुमामुम्मन्तं करोमि १ ॐ सोम आप्यायस्व ओषधीभिराप्यायस्व तेनत्वामुमा
मुम्मन्तंकरोमि २ ॐ ब्रह्मा आप्यायस्व ब्राह्मणैराप्यायस्वः तेनत्वामुमामुम्मन्तं क
रोमि ३ ॐ देवा आप्यायध्वं ऋतुभिराप्यायध्वंः तेनत्वामुमामुम्मन्तं करोमि ४ ॐ ऋषि
भ आप्यायध्वं व्रतैराप्यायध्वंः तेनत्वामुमामुम्मन्तं करोमि ५ ॐ पितर आप्याय
ध्वंस्वधाभिराप्यायध्वंः तेनत्वामुमामुम्मन्तं करोमि ६ ॐ यज्ञ आप्यायस्व सदक्षि
णाभिराप्यायस्व तेनत्वामुमामुम्मन्तं करोमि ७ ॐ समुद्र आप्यायस्व सरवंती
भिराप्यायस्व तेनत्वा० ८ इतित्रिर्वासक्तश्चजपेत् अथ मदिपितुः कुमारस्य सर्वाङ्गः
प्राप्तिकामनस्या तदादिवस्य रित्येकादशभिर्मन्त्रैः कुमारं सर्वाङ्गेष्वभिमृशति मं
त्राप्य दिवस्परित्ये तस्यानुवाकस्य वात्सप्रभारलंवनऋषि स्त्रिष्टुप्छंदः अग्नि
र्देवता जाताभिमन्त्रणेविनियोगः ॐ दिवस्परि प्रथमंजज्ञे अग्निरस्माद्द्वितीयं परि
जातवेदाः तृतीयमप्सुनृमणा अजस्रमिन्धान एनंजरतेसाध्वी १ विभ्राट् अ
ग्नेत्रेधात्रमाणि विभ्राट् धामविभृतापुरुत्राः विभ्राट् नाम परमं गुहा यद् विभ्राट्
तंसंतः आजगम २ समुद्रेत्वानृमणा अप्सुंतनृचक्षसा एधिदिवो अग्नऽ
ऋधन् तृतीयेत्वा जरसितस्थिवाꣳ समपामुपस्थे महिमा अवर्द्धन् ३ अक्र

रामः
२८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दग्नि स्तनमग्निवधोः क्षामोरीरहोस्थः समञ्जयद् मेधोयज्ञोनो वोहिभिर्द्वो ऽ आरभ्यदोरो
दसी भानुनाभात्मन्तः ४ श्रीणामुदारोधरुणोरयीणां मनीषाणां प्राप्यणः सोमगोपाः वसुस्म
नुसहसो ऽ अप्फराजा विभात्मग्नऽ उमसामभिधानः ५ विश्वस्यकेतुर्भुवनस्यगर्भ आरोद
सी अपृणाज्जायमानः विडुंचिदद्रिमभिनत्परालं जनायदग्निमयजन्तपञ्च ६ उशिक्पा
वको अरतिः क्षमेधामर्त्येष्वग्नि रमृतानिधायि दूसर्तिमरिसंभरिभ्र दुष्कृतेकणोद्धिमा
यामिनक्षन् ७ दृशानोरुक्मऽ उर्वाव्यद्यौ दुर्मर्षमायुः श्रिये रुचानः अग्निरमृता अभव
द्वयो भिर्यदिनद्यौ रजनयत्सुरेताः ८ यत्त्वा अयक्षन्नाव दृद्रुशोच दूर्पदेवघृतवंतमग्ने
प्रतन्नस प्रतरंवस्वो ऽ अच्छामिधमुंदेवभक्तंअविमुः ९ आतंभजसो अवसेऽग्वन ऽ उक्थ
ऽ आभजशस्यमानः प्रियः सूर्ये प्रियऽ अग्ना भवंत्सुजातन भिनदुज्जानित्य १० त्वा
मग्नेयजमाना ऽ अनूषन्विश्वा वसुदधिरेवाव्याणि त्वमासहद्रविणमिच्छमाना व्रजंगो
मन्त युक्तिजोविवषुः ११ इतिदेवार्चः पठित्वा अस्तान्येग्निरित्येकादशीमृचंनपठेद् दिव
स्यरित्येतस्यानुवाकस्योत्तमीं मृचं परिशिनमृतिपारस्करः अथकुमारस्य पूर्वादिक्ष
दिक्षुमध्ये च पंचब्राह्मणान्संस्थापयेत् चत्वारश्चतुर्दिक्षु पञ्चमोमध्येनैर्ऋत्यां
वास्थाप्य इमममनुप्राणिन इतितान्पितावूयात् ततः पूर्वदिक्स्थितोविप्रः कुमारसम्मुखं
तिमृन् तंत्रनक्षीकृत्य प्राणइतितारस्वरंवूयात् दक्षिणादिक्स्थितोपि तथातिमृन् व्यान
इतितथावूयात् पश्चिमदिक्स्थितोपितथैव अपानइतिवूयात् उदकसंस्थितः उदानइ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिब्रूयात् मध्यमस्तूपरीक्षृद्देवसमाराः समानइति ब्रूयात् पञ्चब्राह्मणाभावे स्वमेवत
चतत्रेगत्वा कुमारमभिमृश्वो प्राणोत्यादि ब्रूयात् अस्मिन्पक्षे प्रेमो भवति अथ यस्मिन्देशे
कुमारो जातो भवति तं देशं अनाभिकमो स्पृशेद् एतं मन्त्रं पठन् परामृशति मन्त्रः ॐ वेद
तेभूमिर्हृदयं इत्यस्य पंक्तिश्छन्दः पृथिवी देवता जन्मभूम्यभिमंत्रणे विनियोगः ॐ वेदते
भूमिर्हृदयं दिविचन्द्रमसिश्रितम् वेदाहं तन्मांविद्या त्पश्येम शरदः शतं जीवेम शरदः
शतं शृणुयाम शरदः शतम् इति भूमिमभिमंत्र्य कुमारं हस्तं जपति ॐ अश्मा भव
परशुर्भव हिरण्यमस्तृतं भव आत्मा वै पुत्रनामासि शतं जीव शरदः शतम् अथास्य
मातरं हस्तं जपति ॐ इडासि मैत्रावरुणी वीरवीर मजीजनथाः सात्वं वीरवती भव मा
स्मान् वीरवतोऽकरत् इति अथ मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमारायप्रयच्छति ॐ इ
मꣳ स्तनमूर्जस्वन्तमिति परमेष्ठीच्छन्दः त्रिष्टुप्छन्दः स्तनप्रदाने विनियोगः ॐ इम
ꣳ स्तनमूर्जस्वन्तं धया पां प्रपीनमग्रे शतशो रसमध्ये उत्सं जुषस्व मधुमन्तमेव
त्समुद्रियꣳ सदनमाविशस्व इति ततो वामं स्तनं प्रक्षाल्य प्रयच्छति यस्ते स्तन
इति दीर्घतमा ऋषिः त्रिष्टुप्छन्दः गौरीदेवता स्तनप्रदाने विनियोगः ॐ यस्ते स्तनः श
शयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः येन विश्वा पुष्यसि वार्याणि सरस्वती
तमिहधातवेक उद्वन्तरिक्षमन्वेमि इति अथ कुमारस्याशिरः प्रदेशे जलपूर्णकुम्भं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दशादिनपर्य्यन्तं निदधाति आपोदेवीत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः आपोदेवता सूतिकाजः शिरप्रदेशे रक्षार्थो एक कुम्भस्थापनेविनियोगः ॐ आपोदेवीर्जागृत यथादेवेषु जागृत एवमस्यां सूतिकायां सपुत्रिकायां जागृत इति ततः सूतिकाछादिदेशे वेदीं कृत्वा सूतिकाग्निमुपसमाधाय पंचभूसंस्कारपूर्वकमग्निं संस्थाप्य अत्रप्रणिताप्रणयनादयोनभवन्ति पञ्चभूसंस्कारस्तु भवत्येव स्थापितमग्निं स्पृष्ट्वा इति प्रतिमन्त्र्य ॐ भूर्भुवस्वरितप्रगल्भनामाग्निमावाह्य ॐ अग्नयेनमः इति पाद्यादिभिः सम्पूज्य होमं कुर्य्यात् तण्डुलफलिका करणमिश्रान्समपान् गृहीत्वा आण्डामकेति प्रजापतिर्ऋषिः अनुष्टुप्छन्दोग्निर्देवता सूतिकाग्नौ तण्डुलफलिकामिश्र समपेहोमविनियोगः ॐ आण्डामकोऽपवीरः औरिडकेऽ उष्णूमल्ल मलिम्लुचो द्रोणाप्यवनानस्य तादितः स्वाहा इदमग्नये आलिरवन्नेति प्रजापतिर्ऋषिः अनुष्टुप्छन्दोग्निर्देवता सूतिकाग्नौ तण्डुलफलिकामिश्रसमपेहोमविनियोगः आलिरवन्निमिमः किम्वदन्त उपषुतिः हर्य्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः समपाद्रणाप्यवनोनस्यतादितौ स्वाहा इदमग्नये आण्डामकोपवीर औरिडकोऽ उष्णूमल्ल मलिम्लुच द्रोणाप्यवनेभ्यः इति प्रत्यभाकुतो त्यागः इदमालिमन्न निमिम किम्वदन्त उपषुति हर्य्यक्षकुम्भीशत्रु पात्रपाणिनृमणिहन्त्रीमुख समपाद्रणाप्यवनेभ्य इति द्वितीया कुतोत्यागः इत्यपिकेचित् अस्मिन्होमे कुशकण्डिका नभवति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सचाग्निरुत्थापनपर्य्यन्तं दशदिनावधि यथानियोपितोनमषति तथाकार्य्यम् उत्था
पनंचदशमदिनएव एतात्राकृतेषो दशदिनपर्य्यन्तं प्रत्यहंसायंप्रात राहुतिद्वयेनचला
रिंशत्संख्याकाभवन्ति अथयदिकुमारनामा बालग्रहोरोदनादिना कुमारमुपद्रवंकु
र्य्यात तदातदुपद्रवनिवृत्तये तंबालंमत्स्यजालेनोत्तरीयेण वाप्रच्छाद्यांके निधाय
मंत्रपेत् ॐ कूर्कुरः सकूर्कुरः कूर्कुरोबालवंधनं चेत्ते कुनक मृजनमस्तु ऽ अस्तसी
सरोलपेता पकुरस्तत्सत्यम् १ यत्तेदेवापरमदद्भः सत्वंकुमारमेवावृणीथाः चेत्ते कु
नकमृजनमस्तु ऽ अस्तसीसरोलपेता पकुरस्तत्सत्यम् २ यत्तेसरमामातासीसरणि
ता श्यामशवलोभ्रातरौ भ्रातरौ चेत्ते कुनक मृजनमस्तु ऽ अस्तसीसरोलपेता
पकुरस्तत्सत्यम् ३ ननायति नरुदति नतृष्यति नग्लायति यत्रयंवदामो
यत्रचाभिमृशामः इतिमन्त्रेणाभिमृश्य दक्षिणासंकल्पं कुर्य्यात् अद्यहाम
कोहं जातस्यपुत्रस्य कृतेतज्जातकर्म्मकर्म्मणः साङ्गतापूर्त्ये साङ्गुरात्मार्थंच
इमांदक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्योविभज्यदास्ये ॐतत्सत्यम् ततोभू
असीसंकल्प्य ब्राह्मणेभ्यादद्यात् प्रथमेहितथ्यामेहि दातानाप्नोतिमूलक
मिति वचनात्तत्र दानप्रतिग्रहो नदोषोभवति ततोभृंगुलंपरित्यज्य नाल
च्छेदनंकुर्य्यात् अभिषेकतिलकमंत्रपाठादिचकारयेत् इतिजातकर्म्मविधिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ अष्टमीमहोत्सवः जन्मदिनतः अष्टदिने पिता प्रातस्तथाऽ शुचिर्भूत्वा शौचस्नानक्रिया
परं सपत्नीकं ब्राह्मणं विनयेनोपसृत्य अद्य अष्टमीमहोत्सवार्थं भवामहं निमंत्रये इति ना
कृत्वा तथास्त्विति ताभ्यामुक्तेस्वगृहानागच्छेत् तौचोपोषितौ तिष्ठेताम् तयोर्हस्ते नम
ष्टमीमहोत्सवं कारयेत् दक्षिणाग्नेकोस्वलंकार्य्यः ततोऽपरा ह्नसमये ब्राह्मणोगोमयमृत्ति
काभिः कामृषीठे स्कन्दप्रद्युम्नयोः मध्येअष्टौदेव्याः प्रतिमाः विधाय शुक्लतण्डुलैर्वे
दीं पूरयित्वा अष्टौ कलशाः कर्णाग्रदेशे दूर्वापल्लवैः कुण्डलैस्सर्वाङ्गेषु षोडशकपर्दिकादद्या
त् ततः प्रदोषसमये पुत्रपिता स्नात्वा सन्ध्यादिविधाय पूजासामग्रीं सम्पाद्य द्वारस
मीपमागत्य द्वारमातृपूजनं कुर्य्यात् आचम्य अर्घं संस्थाप्य पूजासंकल्पः अद्यहम्
कर्णाग्रिरम्भुकोहं अमुकगोत्रोबालकस्य करिष्यमाणाष्टमीमहोत्सवकर्मणि पूर्वाङ्ग
त्वेन द्वारमातृणां पूजनं करिष्ये एतन्तदिति प्रतिज्ञाय ॐ भूर्भुवःस्वः द्वारमातरः सुप्रतिष्ठि
तावरदाभवन्तु ध्यानम् कुमारीधनदानंदा विपुलामङ्गलाचला पद्माचैव तु नामोक्ता
सप्तैताद्वारमातरः इति ध्यात्वा ॐ कुमार्यै नमः ॐ धनदायै नमः ॐ विपुलायै नमः ॐ
मङ्गलायै नमः ॐ अचलायै नमः ॐ पद्मायै नमः इतिनाममन्त्रैः आवाहनासन पाद्या
दिनीराजनान्तं सम्पूज्य दक्षिणांदत्वा स्वस्तिवाचनं पठन् अभ्यन्तरं गच्छेत् तत्र प्रथमं ग
व्यघृत समधसैन्धव निम्बपत्राहि त्वग्भिः सूतिकासमीपे धूपोदेयः ततोगणेशं पूजयेत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आचम्य अद्यसंस्थाप्य पूजासंकल्पः अद्येहेत्यादि देशकालौ स्मृत्वा अमुकगोत्रोऽमुकशर्मा
हं जातस्यपुत्रस्य मम श्रीमहोत्सव श्रीमहोत्सवकर्मणि पूर्वांगत्वेन निर्विघ्नतासिद्ध्यै भ
गवतो गणेशस्य पूजनं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण गणेशं संपूज्य दक्षिणां दत्वा
प्रार्थयेत् नमोदरमहाभाग सर्वोपद्रवनाशनः त्वत्प्रसादादविघ्नेन चिरंजीवतु मत्सुतः
अथ प्रधानसंकल्पः अद्येहेत्यादि देशकालौ स्मृत्वा अमुकगोत्रो अमुकशर्माहं
अमुकराशेः बालकस्य दीर्घायुरारोग्यावाप्तये सर्वोपद्रवशान्तये श्रीपरमेश्वरप्रीत्यर्थं
मम श्रीमहोत्सव कर्म करिष्ये तत्पूर्वांगत्वेन सर्वाभ्युदयप्राप्तये गौर्यादिषोडशमातृ
णां पूजनं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण मातृः पूजयित्वा पंचोर्धाराः पातयि
त्वा दक्षिणां दद्यात् केचिन्मते आभ्युदयिकं च विधाय ततः पुण्याहवाचनसंकल्पः
अद्येहामुकोहं जातस्य पुत्रस्य मम श्रीमहोत्सवकर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मण
द्वारा पुण्याहं वाचयिष्ये तत्पूर्वाङ्गत्वेन चतुर्णां ब्राह्मणानां पूजनं वरणं च करिष्ये इति
संकल्प्य वरणं कृत्वा उक्तप्रकारेण पुण्याहं वाचयित्वा कलशं संस्थाप्य तत्र नवग्र
हानावाह्य सम्पूज्य दक्षिणां दत्वा स्कन्दप्रद्युम्नपूजनं कुर्यात् अद्यसंस्थाप्य पूजासंक
ल्पः अद्येहामुकोहं जातस्य पुत्रस्यारोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयप्रति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मास्क स्कन्दप्रद्युम्नश्रीनां जलेजन्मदानीच ओडशोपचारैः पूजनं करिष्ये इतिसंकल्प
एतन्नइतिप्रतिमृष्ट्य ॐ भूर्भुवःस्वः गोमयप्रतिमास्क स्कन्देदेव प्रद्युम्नदेव श्रीदेवि जले
जन्मदोदेव्यः इहागच्छ न इहतिष्ठ स्कप्रतिमितावाहाभवत अथ स्कन्दध्यानम् म
यूरवरमारूढो द्विभुजोबालरूपधृक् मुद्गरं वामहस्तेतु शक्तिं दक्षिणतोन्यसेत् वरा
भयकरः साक्षा द्विभुजः शिखिवाहनः किरीटीकुण्डलीदेवो दिव्याभरणभूषितः
अथ प्रद्युम्नध्यानम् प्रद्युम्नस्तुमहाबाहुः शङ्खचक्रगदाधरः चक्रं दक्षिणहस्ते स्या
द्वामहस्तेधनुस्तथा शङ्खं चदक्षिणेदद्या ददीवामेप्रदापयेत् प्रद्युम्नकारयेद्देवं सर्व
भूषणसंयुतम् स्त्रियौचैवास्यकर्तव्ये सर्वलक्षणसंयुते इतिध्यात्वा ॐ स्कन्दाय
नमः इतिनाममन्त्रेण ॐ इसप्यस्कन्दपृथिवी मनुयामि मचयोनि मनुसप्यपूर्वं
समानंयोनिमनुसञ्चरन्तं इसंजुहोम्यनु सप्तहोत्राः इतिमन्त्रेणच स्कन्दमावाह्य
ॐ प्रद्युम्नायनमः इतिप्रद्युम्नंचावाह्य वक्ष्यमाणमन्त्रैर्नाममन्त्रैश्च पूजयेत् आसनं
अराम्पुरपाद्यनमस्तुभ्यं सेनाधिपतयेनमः पुष्पासनेनदेवेश प्रसीदपरमेश्वरः पा
द्यम् गङ्गाजलंसमानीतं स्कवर्णकलशेस्थितम् पाद्यार्थंतेमयादत्तं गृह्यतांपरमे
श्वर अर्घ्यम् पञ्चरत्नसमोपेतं सर्वपैः परिपूरितम् पञ्चपल्लवसंयुक्तमर्घ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेप्रतिगृह्यताम् अर्घ्यांङ्गमाचमनीयं नाममन्त्रेण स्नानम् नर्मदाचन्द्रभागादि गङ्गास
ङ्गमेजलैः स्नापितोसिमयादेव प्रीत्यर्थंप्रतिगृह्यताम् आचमनीयम् गङ्गाजलंसमा
नीतं स्फटिकलेखोस्थितम् आचमनंस्कन्देव प्रीत्यर्थंप्रतिगृह्यताम् वस्त्रम् वेदसूत्र
समायुक्तं पञ्चतानसमन्वितं सर्ववर्णप्रभेदेव वाससीप्रतिगृह्यताम् वस्त्रांङ्गमाचम
नीयं नाममन्त्रेण गन्धम् मलयाद्रिसमुद्भूतं नानागंधसमन्वितम् कर्पूरकस्तूरीदे
गंधंमेप्रतिगृह्यताम् अक्षताः शुक्लान्यतीव पृथ्वानि स्वर्गधीनिविशेमतः अक्षतो
ग्यप्रयच्छामि गृहाणपरमेश्वरः पुष्पाणि जलजंस्थलजंचापि पुष्पकालंतुसम्भ
वम् मत्त्यानिवेदितं देव पुष्पंमेप्रतिगृह्यताम् धूपः गुग्गुलंघृतसंयुक्तं दशांङ्गं न
समन्वितम् धूपंगृहाणदेवेश त्रैलोक्यानंददायकम् दीपम् सघृतंघृतसंयुक्त
मन्धकारविनाशनम् मयानिवेदितंदेव गृहाणपरमेश्वर नैवेद्यम् सत्यावसिद्धं क
हविर्विविधानंदलक्षणम् भोजनार्थंमयादत्तं नैवेद्यंप्रतिगृह्यताम् भूमणार्थे द
व्यंचसमर्प्य नाममन्त्रेणजपंकृत्वासमर्प्य ताम्बूलम् मण्डनंसर्वभूतानां दृष्टेमो
गन्धिकादिभिः ताम्बूलंगृह्यतांदेव प्रीतोस्माकंभवप्रभो नीराजनंकृत्वा पुष्पाञ्जलिं
समर्प्य प्रार्थयेत् तत्रप्रथमंस्कन्दप्रार्थना नमः कुमाराय महाप्रभाय स्कन्दाय ते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्कन्दितदानवाय नवार्कविम्बद्युतये नमोस्तु नमोस्त्वमोघोद्धतशक्तिपाणये १ नमो
विशालाय विचारिणे नमोस्तु तेरवरणमुखकामरूपिणे गुहाय गूढाभरणाय
वै नमोस्तु ते दानवदारणाय २ नमोस्तु ते कैप्रतिमस्त्रभाय नमोस्तु गुह्याय गुहाय
तुभ्यम् नमोस्तु ते लोकभयापहाय नमोस्तु ते बालपराक्रमाय ३ नमो विशालाय
तलोचनाय नमो विशाखाय महाव्रताय नमो नमस्ते स्तु मनोरमाय नमो नमस्ते स्तु
करोत्कटाय ४ नमो मयूरोज्वलवाहनाय नमोधृतोदग्रपताकिने स्तु नमोस्तु ते दूर
धराय तुभ्यं नमः प्रभायप्रणताय तुभ्यं ५ सेनानये पावकिने नमोस्तु कृपापरीता
मलदिव्यमूर्तये कृपामयोमङ्गलदायकस्त्वं नमोस्तु लक्ष्मीशनमो नमस्ते ६ एवं
षडविंशन्नामभिः स्कन्दं सम्पूज्य ॐ कारणात्कारणाद्वरेहन्ती परमः परमस्य
रिपवानोर्ध्वे प्रतनुसहस्रेणाशतेन न इति मन्त्रेण स्कन्दोपरि दूर्वांसमर्प्य प्रद्युम्नं
प्राप्तयेत् भो प्रद्युम्न महाबाहो लक्ष्मीहृदयनंदनः कुमारस्तेमभीते प्रद्युम्नाय नमो
नमः १ त्रैलोक्यपूजितः श्रीमान् सदाविजयवर्द्धनः शार्ङ्गिंकुरुगदापाणे प्रद्युम्नाय
नमोनमः २ इति प्रद्युम्नं सम्पूज्य मरुत्कृतिकाः पूजयेत् नवपूजासंकल्पः अद्येहे
त्यादि मातस्य पुत्रस्य लक्ष्मीमहोत्सवे सर्वोपद्रवशान्त्यर्थं दध्यक्षतपुष्पैर्मह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृतिकाः पूजयेत् तत्र पूजासंकल्पः अद्येहेत्यादि जातस्य पुत्रस्य अक्षीमेहात्मवे स
र्वोपद्रवशान्त्यर्थं दध्यक्षतपुष्पैः मातृकृतिकानां पूजनं करिष्ये एतन्नमः इति प्रति
ष्ठा ॐ भूर्भुवः स्वः विविद्रुहागच्छेह तिष्ठ इति प्रतिष्ठिता वरदा भव ॐ सम्भूते ॐ स
न्नते ॐ प्रीते ॐ अनुसूयाये ॐ क्षमाये इति सम्पूज्य प्रार्थयेत् जगन्मातर्जग
द्धात्री जगदानंदकारिणी नमस्ते देवि कल्याणि प्रसीदस्व कृतिके ॐ कार्त्तिकेया
य नमः कार्त्तिकेय महाबाहो गौरीहृदयनंदनः कुमार रक्षमे भीत कार्त्तिकेय न
मोस्तुते तिथाविष्टं प्रार्थयेत् त्रैलोक्यपूजितः श्रीमान् सदा विजयवर्द्धनः शान्तिं
कुरु गदापाणे नारायणनमोस्तुते ॐ खड्गाय नमः ॐ शङ्खाय नमः ॐ मन्थना
य नमः ॐ वंशाय नमः इति सम्पूज्य दक्षिणां दद्यात् अद्येहामुकोहं अमुकस्य
जातस्य पुत्रस्य दीर्घायुरोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयनिर्मितप्रति
मायां अक्षीदेव्याः पूजनं करिष्ये एतन्नमः इति प्रतिष्ठा ॐ भूर्भुवः स्वः गोमयप्रति
मायां अक्षीदेवि इहागच्छेह तिष्ठ इति प्रतिष्ठिता वरदा भव ॐ श्रीं ह्रीं क्लीं ऐं ह्रं
ह्रैं ह्रौं ह्रां ह्रं ह्रं ह्रं ह्रं ह्रं ह्रः सोहं अक्षीदेव्याः प्राणा इहागत्य सुखं चिरं तिष्ठ
न्तु जीव इहागत्य सर्वेन्द्रियाणि इहागत्य इति प्राणप्रतिष्ठा चविधाय आत्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निदेवेचन्यासंकुर्य्यात् ॐ खां हृदयाय नमः ॐ खीं शिरसे स्वाहा ॐ खूं शिखायै वषट्
ॐ खैं कवचाय हुं ॐ खौं नेत्रत्रयाय वौषट् ॐ खः अस्त्राय फट् इतिन्यासं विधाय
ध्यायेत् चतुर्भुजां महादेवीं तुङ्गपीनस्तनीं शिवाम् मयूरवरमारूढां रक्तवस्त्रधरां शुभ
ाम् शूलशक्तिवराभीति हस्ताध्यासेन्महेश्वरीम् प्रफुल्लपद्मवदना मर्धपद्मासन
स्थिताम् सर्वाङ्गभूषितांदेवीं पीनोन्नतपयोधराम् रक्तवर्णमुखवदना पीतको
शेयवाससाम् चतुर्भुजांदक्षिणेन धृतमन्यानर्वशाकाम् नीलोत्पलंतुवामेन स्कंद
तुदधतींतथाम् अधस्थितकरम्भांतु महामन्त्रीं विचिन्तयेत् आवाहनम् आवा
हिपूज्यसेदेवि महामन्त्रीतिविश्रुते शक्तिरूपेणमेवात्र रक्षजागर वासरे ॐ अ
म्बे अम्बिके अम्बालिके नमानयति कश्चन ससत्यश्विकः क्षभद्रिकां कांपील
वासिनीम् ॐ मन्त्रीदेव्यैनमः इतिनाममन्त्रेणाच आसनम् पाद्यम् समर्प्य अर्घं
दद्यात् अर्घमन्त्रः पत्रपुष्पफलाम्भोभि रलेभ्यवक्रभिर्युतम् मन्त्रीदेविमयाद
त्तं मर्घंगृह्णनमोस्तुते तेनाथेदिकमन्त्रेण नाममन्त्रेणाच स्नानं स्नानाङ्गमाचमनी
यंचदत्वा समर्प्य वस्त्रम् तन्तुसन्तानसंयुक्तं कल्पा कौशेयकल्पितम् सर्वाङ्ग
भरणोपेतम् वसनंपरिधीयताम् वस्त्राङ्गमाचमनीयम् गन्धम् कुङ्कुमं चन्दनं चैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुगन्धिसुमनोहरम् मम्बीदेविमयादत्तं गन्धं गृह्णनमोस्तुते अक्षताः सुगन्धाअक्षतिब्रह्मा
नाकुलाः सुमनोहराः अक्षताश्चमया दत्ता मम्बीदेविनमोस्तुते पुष्पाणि चतुर्वर्णानि पुष्पा
णि सुगन्धीनि विशेषतः मयानीतानि पूजार्थं गृहाणपरमेश्वरि ॐ समस्तदेव्या० ॐ श्री
पते० ॐ काराडात्काराडा० इति मन्त्रेणधूपं समर्प्य इति मन्त्रेण दूर्वांसमर्प्य येत् गुग्गुलं घृ
तसंयुक्तं दशाङ्गसमन्वितम् मम्बीदेविनमस्तुभ्यं धूपमेप्रतिगृह्यताम् अम्बोदीपान्
ज्वालय गव्येनाज्येनसंयुक्तां चत्यार्कपूरगर्भजा दीपान्देविमयादत्ता निमान्गृह्णन
मोस्तुते ततोद्वादशोपचारा पूपाम्रकमालायुतं अजास्तकंकणताडनादिना भूतादि
विद्रावणाद्य पुनः पुनः शब्दंकारयेत् ततोनैवेद्यम् मोदकानिविचित्राणि शुल्कतण्डु
लकंदधि विचित्रपक्वान्नयुतं तथापूपसमन्वितम् फेणिकाघृतपूराद्य नैवेद्यंप्रति
गृह्यताम् ॐ मम्बीदेव्यैनमः इतिनाममन्त्रेणजपंविधाय गृह्णातीति समर्प्य नैवेद्यां
गमाचमनीयं करोद्वर्तनार्थं गंधंचसमर्प्य नीराजनम् अन्तस्तेजोबहिस्तेज एकीकृत्य
मितप्रभम् आरार्त्तिकमिदं देव गृहाणपरमेश्वरि नमस्कारः जयदेविजगन्मात जग
दानंदकारिणी प्रसीदममकल्याणि महामम्बिनमोस्तुते ततः पुष्पाणिसंगृह्य प्रार्थ
येत् देवानांच ऋषीणांच मनुष्याणांचवत्सले आयुष्यमस्तुतेरक्ष मम्बीदेविनमोस्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ते पुरादेवैः पूजितासि ब्रह्मविष्णुशिवादिभिः ग्रावाभ्यामपि देवित्वं पूज्यसे भक्तिपूर्वकम्
देहस्य बालकस्याद्य दीर्घं तुभ्यं नमोस्तु ते ततः पिता बालकस्य मर्त्यो देव्याः पुरस्थितः
बद्धाञ्जलिर्भक्तिनम्रो वाक्यमुच्चारयेदिदम् त्वं देवि माता दिति रक्षिजात्वं गौरि त्वमेवासि
धृतिः क्षमा त्वम् कीर्त्तिः समृद्धिर्भुवनस्य धात्री त्वमेव देवि प्रणतोस्मि तुभ्यम् यथा स-
र्वाणि भूतानि त्वयि स्थितानि एवं चराचराणि भूतानि त्वतो जातान्यनेकशः पुमान्सा
क्षीभवेत्यम तेन मर्त्येन बुद्धिमान् त्वं सृष्टिरग्रा सृजसि प्रजास्त्वं स्थितिस्तथैता सक
लाविभर्मि त्वामेव वाचा मनसा च कर्मणा समर्चयाम्यस्तु शिशुः शिवाद्यः स्वस्तिमस्तु
गृहे नित्यं त्वत्प्रसादात्तवास्त्वि पुत्रोत्सवमहं नित्यं पश्येयं त्वदनुग्रहात् ततो भक
स्य जननी प्रार्थयेत्तामतन्द्रिताः तवः प्रसादात्तनयस्य वक्त्रं दृष्ट्वा भयाद्देवि नमोस्तु
तुभ्यम् सौभाग्यमारोग्यमभीष्टसिद्धिं देहि प्रजायाश्चिरजीवितं च गोर्य्याः पुत्रोय
यास्कंदः शिशुः संरक्षितस्त्वया तथा ममापि बालो रक्षतां मातृकेनमः अम्बिके देवि
नमस्तुभ्यं सूतिकागृहवासिनी पूजितासि मया भक्त्या सबालां रक्ष सूतिकाम् अ
भतद्बान्धवाः सर्वे स्वस्तिवाक्यपुरःसरम् कामयन्तो ऽर्भकस्यायुः प्रार्थयेयुः सयो
मितः ॐ स्वस्ति ३ जननीसर्वसौख्यानां बालानांच विशेषतः नारायणीस्वरूपेण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बालं मे रक्ष सर्वतः शक्तिस्त्वं सर्वदेवानां लोकानां हितकारिणी मातृवद्रक्ष मे बालं महाम
ऋतुमिश्रमकृत हृद्रूपिणी महाविघ्नविनाशिनी प्राणदेवि रक्ष बालं स्वपुत्रवत्
अमुमुमकुलोत्पन्नं रक्ष त्वं देवि बालकम् पूजितासि महाभाग चिरंजीवतु बालकः रक्षाभूत
पिशाचेषु डाकिनीशाकिनीषु च मातेव रक्ष मे बालं पन्नगश्वापदेषु च त्वमेव बलवी देवी
ब्रह्माणी च व्यवस्थिता हृद्शक्तिसमाख्याता महामृत्युनिमोक्तेन धात्रीत्वं कार्त्तिकेयस्य
स्त्रीरूपं मदनस्य च त्वत्प्रसादाद्विघ्नं चिरंजीवतु मे कृतः ततो बालकं भूमौ स्थापयित्वा
हस्तमृक्षारक्षां पठेत् ॐ यद्बलं वासुदेवस्य विष्णोरमिततेजसः भीमस्य ब्राह्मणस्यैव
व सर्वं भवतु मे कृते ततो ज्वालिं वह्नि प्राशयेत् चन्द्रार्कयोर्दिगीशानां दिशां च गगनस्य च
निक्षेपार्थं मयादत्तं ते मे रक्षन्तु बालकम् अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा रक्षन्तु स
र्वदा सर्वे देवाः शक्रपुरोगमाः रक्षत्वं वक्त्रदेवि सन्ध्ये च जगतः प्रिये आयुः प्रमाणं
सकलं देहि देवि नमोस्तुते अथवा मातृजन्मस्थास्थ येके चित्परिपन्थिनः विघ्नाश्चा
वित्तानाच निर्हृत्य चिरणात् अमाधर्वेदोक्तां रक्षां बालकसमीपे पठेत् कृत्वा
नां परिरक्षार्थं तथा रक्षोभयस्य च रक्षाकर्म करिष्यामि ब्रह्मा तदनुमन्यतां नागाः
पिशाचाः गन्धर्वाः पितरो यक्षराक्षसाः अभिभवन्ति ये बालं ब्रह्मा घ्रं तान्मेदा

घा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथिव्यामन्तरिक्षे च येचरन्तिनिशाचराः विदिक्षु दिक्षु ये चान्ये पान्तु त्वान्नोनमस्कृताः पा
तु त्वामृषयो ब्रह्मा दिव्या राजर्षयस्तथा पर्वताश्चैवनद्यश्च तथासर्वेचभागराः अग्निरक्षतु
तेजिह्वो प्राणान्रक्षन्तु वासवः सोमोव्यानमपानन्तु पर्जन्यः परिरक्षतु उदानंविद्युतः पान्तु स
मानंस्तनयित्नवः वज्रभित्तेवज्रंपान्तु वाचंवाचस्पतिस्तथा कामन्तु पान्तु गंधर्वाः सत्यमि
न्द्राभिरक्षतु क्रोधंचवसुरोराजा समुद्रोनाभिमण्डलम् चक्षुः सूर्योदिशः श्रोत्रं चन्द्रमा
पातुतेमनः रक्षन्तुपान्त्विमा आपो रोमाण्योषधयः स्तथा आकाशंतेनिशापातु देहंत्व
वसंधरा एतैर्वेदात्मकैर्मंत्रैः कृत्वा व्याधिविनाशिभिः मयैवंकृतरक्षस्त्वं दीर्घमायु
रवाप्नुहि ब्रवीतुस्वस्तितेब्रह्मा विष्णुरुद्रोतथैवच स्वस्तिवाजस्तथासूर्यः स्वस्तिदेवा
महोरगाः नारदस्यस्तथास्वस्ति कुर्वन्त्वाजः सदेवते इतिरक्षांपठित्वा बालकंकङ्क
णादिभिर्विभूष्य स्वाङ्कनिधाय सपत्नीकमाचार्यं वस्त्रालंकारादिभिः सम्पूज्य
दक्षिणासंकल्पंकुर्यात् अद्येहेत्यादिसंकीर्तनान्ते अमुकोहं अमुकराशेर्जातस्यपु
त्रस्य दीर्घायुरारोग्यावाप्तये कृताया मन्त्रीदेव्याः पूजायाः साङ्गतार्थं मन्त्रीदेव्याः
प्रीतये इमांदक्षिणांब्राह्मणायदास्ये ॐ तत्सत् दक्षिणांदत्वा भूयसींसंकल्पयेत्
अद्येहेत्यादि अमुकोहं श्रुतिस्मृति पुराणोक्तफलावाप्तये अमुकराशेर्जातस्य पुत्रस्य
दीर्घायुरारोग्य भ्रुदयप्राप्तये मन्त्रीमहोत्सवकर्मणि कृताया स्कन्दषष्ठ्यम्बो ज

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदानां अष्टकृतिकानां अष्टौदेव्याश्च पूजाया: साङ्गुरायार्थं स्कन्दादीनां नवग्रहाणां च प्रीतये
इमां भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो दीनानाथेभ्यो नटनर्त्तकगा
यकेभ्यश्च विभज्य दातुमहमुत्सृजे ॐ तत्सत् नमम भूयसीं विभज्य सिद्धान्नेन ब्राह्म
णांश्च भोजयित्वा अभिषेकतिलकमन्त्रपाठादि कारयेत् अथ कुलाचारो दृग्याचाराच्छा
स्त्रलग्नेसमागते अर्द्धरात्रे वा रक्षाविधानं कुर्य्यात् आचम्यार्घं संस्थाप्य पूजासंकल्पः
अद्येत्यादि अमुकोहं अमुकराशेः पुत्रस्य मच्छ्रीमहोत्सव कर्म्मणः उत्तरांगत्वेन एत
स्य बालकस्य परिरक्षार्थं आयुर्वृद्ध्यै सर्वोपद्रव शान्त्यर्थं रक्षाविधानं करिष्ये इति सं
कल्प्य हरिद्राद्रव्य पूगीफल गौरसर्षपादिभि मङ्गलद्रव्यैः दृढां पोटलिकां विधाय
गृहाधारदारुणि वा अवधयेत् एतन्त्रशति पोटलिकां प्रतिमृश्य ॐ भूर्भुवः स्वः धनुर्बाणौ
स्कप्रतिष्ठितौ वरदौ भवताम् इति धनुर्बाणौ प्रतिमृश्य धनुः पूजामन्त्रः धृतं कृष्णेन रक्षा
र्थं संहारार्थं हरेणाच त्रयीमूर्तिगतं देवं धनुः शस्त्रं नमाम्यहं धनुषे नमः बाणपूजामन्त्रः
कामदेवस्य ये बाणाः सफलाश्चाजुनस्य च रामस्य च यथा बाणा तथास्माकं भवन्त्विह
बाणाय नमः इति मन्त्राभ्यां धनुर्बाणौ सम्पूज्य बालकमेङ्कं गृहीत्वा स्वस्तिवाचनं पठन्
धनुर्गृहीत्वा बाणान संयोज्य घण्टाशंखवाद्यैः पुरस्तात् पोटलिकां बाणेन वेधयेत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततोदक्षिणासंकल्पः अद्येत्यादि अमुकगोत्रः पुत्रस्य सर्वोपद्रवशान्तये कृतस्यराहुपेधन
कर्मणः साङ्गतासिद्ध्यर्थं इमांदक्षिणां ब्राह्मणायाभिदास्ये ॐ तत्सत् दक्षिणांदत्वा तिलकमन्त्र
पाठादिकंकुर्यात् ततोगव्यघृतगुग्गुलुपैः सैन्धवनिम्बपत्रैश्च सूतिकागृहधूपोदेयः मुराहिंहल
निर्गुण्डी वचाकुष्ठं चगुग्गुलुपाः बिल्वपत्रमयोधूपः कुमाराणुः प्रपोमहत् ततोव्यवप्रोहणोक्त
वासिनीनांपूजनं यजमानस्य बालकस्यच महानीराजनंचविधाय बालकंमातृहस्ते समर्
प्पयेत् ततोगृहद्वारि रक्षकान् अपूपमालायुक्ते छागमुशलादि शस्त्रपाणीन्स्थापयेत्
इतिसंक्षेपमहोत्सवपूजा अथकथा ॐ नारायणंनमस्कृत्य नरंचैवनरोत्तमम् देवींसर
स्वतींव्यास ततोजयमुदीरयेत् युधिष्ठिर उवाच पुत्रजन्मनिकर्मणा उत्सवः कोविधी
यते किंदानंकस्यवा पूजा तन्मेब्रूहिजनार्दनः श्रीकृष्ण उवाच शृणुपाण्डवयत्नेन सुतो
त्पत्तिमहोत्सवम् जन्ममसूतिदिने कार्य्या मन्त्रीनाम्नी त्रिशूलिनी अपराह्णसमयपीठे गो
मयींप्रतिमांलिखेत् कपर्दिकाः प्रदातव्या ध्वजे ध्वजे विशेषतः ४ कर्णकुण्डलकोदे
वौ दूर्वापल्लवशोभितौ दिव्यवस्त्रपरीधानां तांदेवीं पूजयेत्ततः ५ अग्रेदीपामृकंदेयं
नैवेद्यं विविधैः शुभैः नालीकेरादिकंतद्वद्दाडिमाकोलाद्भवैः फलैः ६ कलशंस्थापयेत्तत्र
अग्रतः पल्लवान्वितम् द्विजन्मानंसपत्नीकं सदाचारसमन्वितम् आकृष्यकारयेत्तस्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तोर्हस्तेन पूजनम् भुक्तशाकुलवेघ्रांतु तस्योपरि समाहिताम् ८ नृत्यगीतविनोदेन बोध
नचक्षुधिभिः रात्रौजागरणं कार्य्यं दिवसेनद्विजैः सह ९ वटकामृकमालाभि वद्धग्रीवम
जाकृतम् पुनः पुनर्महाशब्दं कारयेत्कर्णताडनात् १० डाकिन्योयातुधानाश्च भूतप्रेतपि
शाचकाः बालग्रहाश्च नश्यन्ति नच्छब्दात्कर्णनाद्ध्रुवम् ११ तत्रदानानिदेयानि ब्राह्म
णेभ्योविशेषतः प्रथमेहनिमेषे वादातानिप्राप्नुयात्फलम् १२ दानंप्रतिग्रहंतत्र श्राद्धंच
क्रियतेयतः प्रभातेदीयतेदानं नटनर्त्तकगायकान् १३ स्त्रियः सभर्तृकाः पूज्या वस्त्रा
लङ्करणादिभिः अनेनविधिनायस्तु मातृदेवीं प्रपूजयेत् आयुर्वृद्धिर्भवेत्तस्य सन्त
तेरपिपाण्डवः १४ इतिमातृमिहात्सव पूजा कथाच अथनामकरणम् तत्रनामक
र्मप्रयोगः तत्रनामकर्मदिवसेप्रातः सवालांसूतिकांस्नाप्य कर्ताषितापूर्वं गणे
शपूजनं कुर्य्यात् दीपप्रज्वाल्य शुभासनउपविश्यात्मनः अर्घंसंस्थाप्य प्राणा-
नामस्य पूजासंकल्पः अद्येहेत्यादि देशकालौसंकीर्त्य अमुकराशौअमुकशर्म्मा
हं अमुकराशेः पुत्रस्य कन्यामावा करिष्यमाणनामकर्मणि निष्क्रमणादि कर्म
णिच निर्विघ्नताकार्य्यसिद्ध्यै पूर्वाङ्गत्वेन भगवतोगणेशस्य पूजनं करिष्ये इति

Kirtikant Sharma Collection, Najafgarh.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संकल्प्य उक्तविधिनागणेशंसम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्येत्यादिदेशकालौ
संकीर्त्य अमुकगोत्रो अमुकशर्म्माहं अमुकगोत्रस्य बालकस्य आयुर्वृ
द्ध्यर्थं व्यवहारसिद्ध्यर्थं बीजगर्भसम्भवैनो निर्वहणद्वारा श्रीपरमेश्वर प्रीतये नामकर्म
करिष्ये तथास्य पुत्रस्य श्रीवृद्ध्यर्थं बीजगर्भसम्भवैनो निर्वहणाय निष्क्रमण क
र्म्म करिष्ये तथास्य बालकस्यायुर्वृद्ध्यर्थं धनप्राप्त्यर्थं सूर्य्यावलोकनं भूम्युपवेश
नं च करिष्ये करिष्यमाण नामकर्म्म निष्क्रमण सूर्य्यावलोकन भूम्युपवेशन क
र्म्मणां पूर्वाङ्गत्वेन मातृपूजा नांदीश्राद्ध पुण्याहवाचनानि तन्त्रेण करिष्ये इति
संकल्प्य पूर्वोक्तविधिना मातृपूजा नान्दीश्राद्ध पुण्याहवाचनानि विधाय वेदीं क
त्वा तत्र पञ्चभूसंस्कारपूर्वकं अग्निं संस्थाप्य वेद्याईशानदिग्भागे कलशावि
धिना कलशं संस्थाप्य तत्र ब्रह्मवरुणसहितादि त्यादि नवग्रहानावाह्य सम्पू
ज्य आचार्य्यब्रह्मणो वरणं कुर्य्यात् तत्र संकल्पः अद्येत्यादि अमुकगोत्रः
पुत्रस्य करिष्यमाण नामकर्म्माङ्गं होमकर्म्मणि आचार्य्यब्रह्मणः पूजनं व
रणं च करिष्ये तथा नामकर्म्माधिकारसिद्ध्यै त्रीन्ब्राह्मणान् भोजयिष्ये इति
संकल्प्य आचार्य्यब्रह्मणो वरणं कृत्वा त्रीन्ब्राह्मणान् भोजयित्वा ब्रह्मासना-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिपर्व्वदशरात्रं कर्म समाप्य पञ्चगव्यहोमार्थं पानार्थं च पञ्चगव्यं कुर्य्यात् अथ
अथ पञ्चगव्यविधिः अथ प्रवक्ष्यामि पञ्चगव्यस्य विधिः पावनार्थे द्विजा
तीनां मिहलोके परत्र च १ गोमूत्रं गोमयं क्षीरं दधि सर्प्पिः कुशोदकम् निर्दिष्टं
पञ्चगव्यं च पवित्रं कायशोधनम् २ गोमूत्रे वरुणो देवो हव्यवाहस्तु गोमये
क्षीरे चन्द्रप्रभगवान्वायुर्दधि समाश्रितः ३ भानुराज्ये स्थितास्तद्वज्जलेहरिरुदा
हृतः एते देवाः स्थिताः सर्वे पवित्रं तेन नित्यशः ४ मूत्रं तु नीलवर्णाया कृष्णायाः गो
मयं स्मृतम् पयश्च ताम्रवर्णायाः श्वेतायाः दधि उच्यते ५ कपिलायाः घृतं ग्राह्यं
महापातकनाशनम् अलाभे सर्ववर्णानां कपिलैका प्रशस्यते ६ मूत्रस्यैकपल
ं दद्यात् तदर्धं गोमयं स्मृतम् क्षीरं सप्तपलं दद्यात् दधि त्रिपलमुच्यते ७ आज्य
स्यैकपलं दद्यात् पलमेकं कुशोदकम् सर्प्पिः कुशोदकं चैव पृथक् मन्त्रैर्विधी
यते ८ सर्वेषामलाभे सर्प्पिः कुशोदकं पञ्चामृतं निर्णयः गायत्र्या गृह्य गोमू
त्रं गन्धद्वारेति गोमयं आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधिः तेजोसि शु
क्रमित्याज्यं देवस्य त्वा कुशोदकम् अथ मन्त्राः ॐ तत्सवितुरित्यादि कृष्णा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यच्चा गोमूत्रं गृह्य वस्त्रेणाध्यात्मन् ताम्रपात्रे स्थापयेत् ॐ गन्धद्वारां दुराधर्षां नित्यं पुष्टां करी
षिणीम् ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् इति गोमयं संगृह्य अग्निध्यात्मन् तत्रै
व स्थापयेत् ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् भवा वाजस्य संगथे इति दुग्धं
संगृह्य सोमध्यात्मन् तत्रैव स्थापयेत् ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सु
रभि नो मुखा करत्प्रण आयूंषि तारिषत् इति दधि गृह्य वायुध्यात्मं तत्रैव स्थापयेत् ॐ
तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानां भनाधृष्टं देवयजनमसि इति
घृतं संगृह्य रविध्यात्मं तत्रैव स्थापयेत् ॐ देवस्य त्वा सवितुः प्रसवे श्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां इति कुशोदकं संगृह्य हरिध्यात्मं तत्रैव स्थापयेत् आपो हि ष्ठेति तिसृभिरा
लोड्य ॐ कोरण कुशत्रयं साग्रं समूलं गृहीत्वा पुनरोङ्कारेण तद्गृहीत्वा जुहुयात् सप्त
पत्राण्येव दर्भा अग्निभाग्नाभ्रुकत्विजः तभिर्गृहीत्वाहोतव्यं पञ्चगव्यं यथाविधिः
इरावती इदं विष्णुमानस्तोके चश्रीवती गायत्री प्रजापतीन त्वेता आहुतयः स्मृताः आलो
ड्य प्रणवेनैव निर्मथ्य प्रणवेन तु उद्धृत्य प्रणवेनैव त्रिः पिबेत् प्रणवेन तु यद्यदस्थि गतं पा
पं देहे इति मृतिं देहिनाम् ब्रह्मकूर्चो दहत्सर्वं तत्तदग्निरिवेन्धनम् पालाशानाथ परेण नि
स्वर्णपात्रेणावा पुनः रौप्यपात्रेणा ताम्रेण ब्रह्मतीर्थेन वापि वेत् पञ्चगव्यहोमं तु केचि
च्छुद्धार्थं पूर्वमामनन्ति पश्चाच्चतुर्हव्याहुति होमं तद्यथावधीतं कर्तव्यम् इति पञ्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गव्यविधिः ततः पार्थिवनामाग्निमावाह्य एतन्नइतिप्रतिष्ठाप्य ॐ भूर्भुवः स्वः पार्थिवना
माग्ने स्कप्रतिष्ठितोभव ॐ तदवाग्निरितिध्यात्वा पार्थिवनामाग्नयेनमः इतिनाममन्त्रेण
पाद्यादिनीराजनान्तं सम्पूज्य अष्टद्रव्यत्यागसंकल्प अघोरनामकर्मणाहुं
यक्षे तत्र आघारान्तभागदेवताभ्य इदमाज्यं अग्नयेविष्णवेरुद्राय अद्भ्यः सवित्रे प्रजा
पतये अग्नये स्विष्टकृतेच इदंपञ्चगव्यं महाव्याहृतिदेवताभ्यः सर्वप्रायश्चित्तदेवताभ्यः
अग्नयेप्रजापतयेच इदमाज्यंमयापरित्यक्तं यथादेवतमस्तु दक्षिणांजान्वाच्य मन
साप्रजापतिंध्यात्वा ब्रह्मणान्वारब्धोजुहुयात् ॐ प्रजापतयेस्वाहा इदंप्रजापतये ॐ
ॐ इन्द्रायस्वाहा इदमिन्द्राय ॐ अग्नयेस्वाहा इदमग्नये ॐ सोमायस्वाहा इदंसोमा
य इत्याघारावाज्यभागौहुत्वा पञ्चगव्येहोमंकुर्यात् तत्रमंत्राः सर्वमंत्राणामादि
भूतत्वात्प्रथममगायत्र्याहोमः ॐ तत्सवितुः मात् स्वाहा इदंसवित्रे ॐ इरावतीधेनुम
तीहिभूतसूयवसिनी मनवेदशस्या व्यस्कभ्नारोदसी विष्णवेतेराधत्थे पृथिवी मभि
तोमयूखैः स्वाहा इदमग्नये ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधे पदम् समूढमस्यपांसु
रेस्वाहा इदंविष्णवे ॐ मानस्तोकेतनयेमान आयुषिमानो गोषुमानो अश्वेषुरी
रिषः मानोवीरान्रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वाहवामहेस्वाहा इदंरुद्राय ॐ
शन्नोदेवीरभिष्टय आपोभवन्तुपीतये शंयोरभिस्रवन्तुनः स्वाहा इदमद्भ्यः ॐ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापते नत्वदेतान्यन्योऽस्ति स्वाहा परिता वभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्या
मपतयो रयीणां स्वाहा इदं प्रजापतये ॐ अग्नेयस्विष्टकृते स्वाहा इदमग्नेयस्विष्टकृते इति
पञ्चगव्ये होमं विधाय कृतशेषं पञ्चगव्यं सूतिकायै दद्यात् साचवक्ष्यमाणविधिना त्रिः प्राश्नाति
आचारात् ध्रुवं गन्धाक्षतपुष्प दूर्वादिभिः सम्पूज्य ब्रह्मभाण्डेषु नान्दीश्राद्धं कारयित्वा सू
तिकाभर्तुः समीपमानयति साचबालकमङ्के गृहीत्वा अग्निं प्रदक्षिणीकृत्य भर्तुर्वामत
उपविशेत् गणेशाद्यनवग्रहेभ्यश्च पुष्पाञ्जलिं समर्पयेत् ततो ब्रह्मणान्वारब्धं आज्येन
भूराद्यानवाहुतिं जुहुयात् स्विष्टकृतं च हुत्वा संस्रवप्राशनादि पूर्णपात्रदानान्तं कर्म समा
पयेत् ततो दिवसे विधिते कलशे समागते नव्यवस्त्रे कुङ्कुमाद्यैः कृतं वालकनाम
लिखित्वा एतन्नेति ॐ भूर्भुवः स्वः वालकनामकृतप्रतिकृतिर्भवति प्रतिकृतिं नग्नदा
नसंकल्पं कुर्यात् अद्येहेत्यादि अमुकराशेर्वालकस्य नामकर्मलग्ने अमुकवासरस्थान
स्थितानां आदित्यादिनवग्रहाणां शुभानां शुभफलाधिक्यप्राप्तये दुष्टानां दुष्टफलोप
शान्त्यर्थं इमां कृष्णवर्णां निष्क्रियिणीं दक्षिणां देवताभ्यो ब्रह्मभ्यो महं सम्प्रददे इति दक्षिणां
दत्वा ततः कलशं होमसमागते लिखितनामकं तन्नव्यवस्त्रं शीर्षे वेष्टयित्वा तेन वालक
स्य दक्षिणाकर्णे पञ्चवारं पुरः सरं अमुकशर्मन्नसि दीर्घायुर्भवेति नामश्रावयेत्
शर्मान्तं ब्राह्मणस्य वर्मान्तं क्षत्रियस्य दासान्तं शूद्रस्य नामकुर्यात् ततो होमदक्षि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णसंकल्पः अद्येत्यादि अमुकगोत्रोबालकस्य नामकर्म्माङ्गहोमकर्म्मणः साङ्गतासिद्ध्यर्थं इमां
स्फ्यरणदक्षिणां आचार्य्यायतुभ्यमहंसम्प्रददे इतिहोमदक्षिणांदद्यात् नामकर्म्मदक्षिणांद
द्यात् अद्येत्यादि अमुकगोत्रोबालकस्य वैजिकगार्भिकदुरितोपशान्तये दीर्घायुरारोग्या
वाप्तये कृतस्यनामकरणकर्म्मणः साङ्गतासिद्ध्यर्थं इमांदक्षिणां ब्राह्मणेभ्योदास्ये ॐतत्सत्
ततोनिष्क्रमणं कुर्य्यात् नत्रविशेषः अद्येत्यादि अमुकगोत्रस्यबालकस्य कारिष्यमा
णनिष्क्रमणाकर्म्मणि सर्वारिष्टनिवृत्तिपूर्वकदीर्घायुरारोग्यावाप्तये जलदिगीशानां
दिशांचन्द्रस्य अर्कस्य वासुदेवस्य गगनस्यच पूजनं करिष्ये एतन्ते ॐ भूर्भुवः स्वः
जलदिगीशादिदेवा गगनपर्य्यन्ताः स्फ्यप्रतिष्ठिताःवरदाभवन्तु एवंप्रतिष्ठाप्य नामम
न्त्रेणाध्यानादि ॐ दिगीशेभ्योनमः दिग्भ्योनमः चन्द्रायनमः अर्कायनमः वासुदेवायन
मः गगनायनमः इतिनामभिर्मन्त्रैः पाद्यादिभिः सम्पूज्य प्रार्थयेत् चन्द्रार्कयोर्दिगीशानां
दिशांचगगनस्यच निक्षेपार्थमिमंदर्भं तेभ्यरक्षन्तुबालकम् अप्रमत्तप्रमत्तंवा दिवारा
त्रमथापिवा रक्षन्तुसर्वदाः सर्वे देवाः शक्रपुरोगमाः इतिसम्प्रार्थ्य दक्षिणांदत्वा शाकु
नसूक्तमपितत्रपठेत् इतिनिष्क्रमणम् अथसूर्य्यावलोकनम् तत्रस्वस्तिवाचनपूर्वकं
मातरङ्कस्थितंबालकं वहिरानीय आदित्यंपूजयेत् यथा आचम्य अर्घंसंस्थाप्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूमौरक्तचन्दनेन मूर्ध्नि लिखित्वा पूजासंकल्पः अद्येहेत्यादि देशकालौ संकीर्त्य अमुकराशेः
बालकस्य वैजिकगर्भिकदुरितोपशान्तये आदित्यस्य पूजनं करिष्ये ध्यानम् ध्येयः सदास
वितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः केयूरवान्मकरकुण्डलवान्किरी
टी हारीहिरण्मयवपुः धृतशङ्खचक्रः इतिध्यात्वा आकृष्णेनेति वेदमन्त्रेण ॐ आदित्यायनमः
इतिनाममन्त्रेणच आवाहनादिनीराजनान्तं सम्पूज्य बालकायसूर्य्यं प्रदर्शयेत् ॐ तत्व
क्षुरितिदध्यङ्ङाथर्वणऋषिरनुष्टुप्छन्दः सूर्य्योदेवता सूर्य्योदीक्षणेविनियोगः ॐ त
च्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्पश्येमशरदः शतंजीवेमशरदः शतंशृणुयामशरदः
शतंप्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् इतिमन्त्रेणबाल-
कायसूर्य्यंप्रदर्श्य दक्षिणादधात् इतिसूर्य्यावलोकनम् अथभूमुपवेशनम् तत्रगो
मयेनस्कालिपृथ्वीं भूमौ ॐ पृथिव्यैनमः ॐ वाराहायनमः ॐ कुलदेवतायैनमः इति
नाममन्त्रैर्भूमौपृथिवीं वाराहं कुलदेवतां च प्रतिमृष्याप्यावाह्य उपचारैःसम्पूज्य बाल
कंभूमावुपवेशयेत् आचारादुभयपादस्थापनम् ततस्तंबालं देवब्राह्मणेभ्यः प्रणाम
यतेराज्ञिवोदादिभिरभिनन्दितं प्रदक्षिणामार्गेण गृहाभ्यन्तरंनयेत् अथतत्रजीवमातृ
णांपूजनंकुर्य्यात् आचम्य अर्घंसंस्थाप्य पूजासंकल्पंकुर्य्यात् अद्येहेत्यासंकीर्त्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमुकराशेरमुकनाम्नः पुत्रस्यनामकर्म्मादिकर्म्मणा मुत्तरांगत्वेनभिन्निलिखितानां कल्याणाद्या
दिजीवमातॄणांपूजनंकरिष्ये एतन्नो० ॐ भूर्भुवः स्वः कल्याणाद्यादिसप्तजीवमातरः इहागच्छे
तु इहतिष्ठतु सुप्रतिष्ठितावरदाभवन्तु इतिप्रतिष्ठाप्य ध्यायेत् कल्याणीमंगलाभद्रा पुराया
पुराणपुरवीतया जयाचविजया चैव सप्तैताजीवमातरः इतिध्यात्वा ॐ कल्याण्यैनमः ॐ मङ्गे
लायैनमः ॐ भद्रायैनमः ॐ पुरायैनमः ॐ पुराणपुरवीतायैनमः ॐ जयायैनमः ॐ विजयायै
नमः इतिनामभिर्मन्त्रैरासनादिनीराजनान्तं सम्पूज्य गुडसर्पिर्भ्यां वसोर्धाराः पातयेत् अथेहा
मुकोहं जीवमातॄणांप्रीतये गुडसर्पिर्भ्यां वसोर्धाराः पातयिष्ये ॐ वसोः पवित्रमसीति
वसोर्धाराः पातयित्वा वृहन्नारीति पुष्पाञ्जलिंसमर्प्य दक्षिणांदद्यात् अक्षभूयसीदक्षि
णा अथेहेत्याचम्याद्यार्थ्य अमुकोहं अमुकराशेरमुकनाम्नास्य बालकस्य दीर्घायुरोग्या
वाप्तये बीजगर्भसमुद्भवेनो निर्वहणाद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतानांनामकरणानि स्क्र
मण मूर्ध्यावलोकन भूम्युपवेशन जीवमातृका पूजनकर्म्मणां साङ्गतासिद्ध्यर्थं कलशे आवा
हितानां ब्रह्मवरुणसहितादि त्यादि नवग्रहाणांप्रीतये इमांभूयसींदक्षिणां नानागोत्रे
भ्योब्राह्मणेभ्यो स्तथान्येभ्यो दीनानाथेभ्यो नटनर्त्तकगायकेभ्यो विभज्यदास्ये ॐ
तत्सत् दक्षिणांदत्वा तत्राचार्यान्महानीराजनादि कारयित्वा अभिषेकतिलकमंत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाढादिकारयेत् ब्राह्मणान्स्वबृंधवर्गाद्दीन्भोजयित्वा स्वयंभुञ्जीत इतिनामकरणानिष्क्र
मणसूर्य्यावलोकन भूमुपवेशन जीवमातृकापूजन विधानम् अथान्नप्राशनविधिः मेमृतृमे
वामासि सम्वत्सरपूर्णेवा पुरुषस्यान्नप्राशनंकुर्य्यात् स्त्रीणांतुपञ्चमे सप्तमे वामासि तत्र
ज्योतिःसाम्योक्ते चन्द्रतारानुकूले दिवसेकर्त्ता कृतनित्यक्रियः शुचिः शुक्लवासाः प्रथमंगणेशं
पूजयेत् स्वासन उपविश्याचम्याघं संस्थाप्य पूजासंकल्पः अद्येहेत्यादिसंकीर्त्य अमु
करणशर्मुकशर्म्माहं अमुकरायो रमुकस्य पुत्रस्य करिष्यमाणान्नप्राशनकर्म्मणि नि
र्विघ्नतयाकार्य्य सिद्ध्यर्थं पूर्वाङ्गत्वेन भगवतागणेशस्य पूजनंकरिष्ये पूर्वोक्तप्रकारेण ग
णेशंसम्पूज्य प्रधानसंकल्पः अद्येहेत्यादुच्चार्य्य अमुकोहं अमुकरायो रस्यवालकस्य
मलप्राशनमुद्दिश्य ब्रह्मवर्चसतेज इन्द्रियादुल्लक्षण फलसिद्ध्यै बीजगर्भसमुद्भवेनो
निर्वहणद्वारा श्रीपरमेश्वरप्रीतये अन्नप्राशन कर्म्मकरिष्ये तत्पूर्वाङ्गत्वेन गौर्य्यादिषोड
शमातृणांपूजनं नान्दीश्राद्धं पुण्याहवाचनंच करिष्ये इतिसंकल्प्य पूर्वोक्तविधिना मा
तृपूजानांदीश्राद्धं पुण्याहवाचनानि विधाय होमार्थं वेदीं कृत्वा तत्रपञ्चभूसंस्कार
पूर्वकमग्निंसंस्थाप्य आचार्य्यब्रह्मणोवरणंकुर्य्यात् अद्येहामुकोहं अमुकरायः
पुत्रस्य अन्नप्राशनाङ्गहोमकर्म्मणि आचार्य्यब्रह्मणोः पूजनपूर्वकंवरणंकरिष्ये इतिसंक
ल्प्य आचार्य्यब्रह्मणोवरणं कृत्वा कलशंसंस्थाप्य तत्रब्रह्मवस्त्रासहितादिस्थादिनव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहानावाह्य सम्पूज्य तत्र ब्रह्मोपवेशनादि आसादनान्ते विशेषोपकल्पनीयान्यासाद्य
तद् अन्नं सव्यंजनं रसाप्य उदुखलपात्रे मधुशक्तुघृतानि पुस्तकयाज्यादिस्थघृतिचिह्नानि
इति स्थापयित्वा ततः पर्युक्षणान्तं कर्म कृत्वा शुचिनामाग्निं संस्थाप्य एतन्ते ॐ भूर्भुवः
स्वः शुचिनामाग्नेऽहागच्छ इति मृ क्षप्रतिस्मृतौ वरदो भवेति प्रतिगृह्य ततः तेदेवाग्निरि
त्यादिना ध्यात्वा ॐ शुचिनामाग्नेयनमः इति नाममन्त्रेण आवाहनादि नीराजनान्तं सम्पूज्य
दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा जुहुयात् द्रव्यत्यागं कुर्यात्
अद्य हामुकोहं अमुकगोत्रः पुत्रस्यान्नप्राशनहोमकर्मणि अस्मिन् तत्र प्रजापतिमिन्द्रमग्निं
सोमं देवीं वाचं आज्येन प्राणमपानं चक्षुः श्रोत्रं च चरुणा श्रोत्रेणाज्यचरुणा स्विष्टकृतं आज्ये
नमहाव्याहृतिदेवताः सर्वप्रायश्चित्तदेवताः प्रजापतिं च यत्रेस्त इदं चरवाज्यं मया परित्यक्तं ॐ
तत्सत् तत्तद्देवताभ्यो यथादेवतमस्तु ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वा
इदमिन्द्राय ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय ततो हि आज्याहुती जु
होति देवीं वाचमिति भार्गव ऋषिस्त्रिष्टुप् छन्दो देवीवाग्देवता आज्याहुतिहोमे विनियोगः
ॐ देवीं वाचमजनयन्तदेवा स्तां विश्वरूपा पशवो वदन्ति सानोमन्द्रेषमूर्जं दुहाना धेनुर्वा
गस्मा उपसुष्टुतैतु स्वाहा इदं वाचे वाजिनीति देवा ऋषिस्त्रिष्टुप् छन्दो अग्निर्देवता आ
ज्याहुतिहोमे वि० ॐ देवीं वाचमिति पुनः पठित्वा ॐ वाजिनोऽअद्य प्रसुवामि दानं वाजिदेवाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋतुभिः कल्पयामि वाजो हि मां सर्वे वीरं जजान विश्वाऽ आसापाजपतिर्व्यजेज अस्वाहा इदं वा
चे वाजाय ततः घृतेरा चरुमभिघार्य्य आज्यप्लुतं च स्थालीपाकेन जुहोति ॐ प्राणेनान्नमशीय
स्वाहा इदं प्राणाय ॐ अपानेन गन्धानशीय स्वाहा इदमपानाय ॐ चक्षुषा रूपाणयशीय
स्वाहा इदं चक्षुषे ॐ श्रोत्रेण शब्दाऽशीय स्वाहा इदं श्रोत्राय तत आज्यचरुभ्यां ब्रह्मा चार
द्वौ जुहुयात् ॐ अग्नये स्विष्टकृते स्वाहा इदम् ततः आज्येन भूराद्या नवाहुतीर्जुहुयात् ततः
संस्रवप्राशनम् पवित्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानम् तत्र संकल्पः अ
द्येत्यादि अमुकोहं अमुकगोत्रः पुत्रस्यान्नप्राशनाङ्गहोमकर्मणः साङ्गतार्थं अपूर्ण
पूर्णार्थं च इदं पूर्णपात्रं सदक्षिणं ब्रह्मन् त्वं संपूजयेद ब्रह्मा गृहीत्वा अक्रन्दमिति मन्त्रा
भिमंत्रयात् ततः कलशं समागते लग्नदानसंकल्पः अद्येत्यादि अमुकोहं अमु
कगोत्रः पुत्रस्यान्नप्राशनलग्ने अवकुचस्थितानां आदित्यादि नवग्रहाणां कुष्ठानां कुष्ठफ
लोपशान्त्यर्थं शुभानां शुभफलाधिक्यप्राप्तये इदं कनकवर्णं इमां दक्षिणां ब्राह्मणाय विभज्य
दास्ये ॐ तत्सत् दक्षिणां दत्वा सर्वान्नरसान् सर्वमन्नं मध्वाज्यसक्तुसहितं एकस्मिन्पात्रे कृ
त्वा सुवर्णान्तर्हितया मुद्रिकया मातुरुत्संगे स्थितं बालकं स्वाङ्के स्थितं वा देवतापुरतोऽना
मिकाङ्गुष्ठाभ्यां हन्तहन्तेति मन्त्रेण पञ्चवारं प्राशयेत् हन्कारं मनुष्माइति श्रुतेः ततो मातस्य
जलेन त्रिवारं मुखं शोधयेत् ततो माता बालकं स्वाङ्के कुर्यात् तदा स बालको वस्त्रग्रन्थि
लवनी पुस्तकापि यदि प्रथमं गृह्णाति तेन तस्य जीविकाभवेदिति ज्ञातव्यम् ततो होमदक्षि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णा कर्मसाङ्गदक्षिणासंकल्पः अद्येहामुकोहं अमुकगोत्रोः पुत्रस्य अन्नप्राशनाङ्गहोमकर्म्मणः
तथान्नप्राशनकर्म्मणः साङ्गफलप्राप्त्यर्थं साङ्गतार्थं चेमां दक्षिणां आचार्य्याय अन्येभ्यो ब्रा
ह्मणेभ्यश्च विभज्य दास्ये तथेमां भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो नट
नर्त्तक गायकादि दीनानाथेभ्यश्च विभज्य दास्ये तथा यथोपपन्नेन यथासंख्याका
ब्राह्मणांश्च भोजयिष्ये ॐ तत्सत् इति संकल्प्य दक्षिणां दत्वा रक्षाबंधनघृत-छाया-
मुखकरणाभिषेक तिलकमंत्रपाठादि कारयित्वा जीवमातृपूजनं महानीराजनं च कृत्वा ब्राह्म
णान्भोजयित्वा सुमृष्टं कृतसहितः स्वयं भुञ्जीत इत्यन्नप्राशनविधिः अथ जन्मोत्सवविधिः
ब्राह्मे मुहूर्त्त उत्थाय तिलकल्कोदकेन स्नायात् स्नानसंकल्पः अद्येहेत्यादि अमुक
गोत्रो अमुकशर्म्माहं आजन्मवृद्धये संवत्सरावच्छिन्न कालप्राप्तिकाम इति
तिलकल्कमिश्रित शीतलोदकेन स्नानं करिष्ये इति स्नात्वा सन्ध्यादिनित्यकर्म्म विधाय
जन्मदिने शनिभौमवासरं त्यक्त्वा तत्तद्धि चितदोष परिहाराय किञ्चित् ब्राह्मणाय दत्वा
अमृमुमृभिर्वा किञ्चिं दिति किञ्चित्संज्ञा तनीनवीन वस्त्रधारणं कुर्य्यात् परिधास्ये इ
त्याथर्वणाक्तृभिः पंक्तिश्छन्दोवासोदेवता वस्त्रपरिधाने विनियोगः ॐ परिधास्ये यशोधा
स्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं जीवाव शरदः पुरूचीरायस्पोषमभिसम्व्ययिष्ये इति न
बंधीतं वस्त्रं परिधाय उत्तरीयधारणं कुर्य्यात् यज्ञोपवीतमित्याथर्वणाक्तृभिः पंक्तिश्छन्दः लिं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोक्षीरदेवता उत्तरीयपरिधाने वि० ॐ यद्यसामाद्यावापृथिवी यद्यसेन्द्रबृहस्पती यद्योभगश्च
सविद यद्योमाप्रतिपद्यताम् सतिवस्यान्तेर यदस्वेतिपरिधाय निम्बयुग्मुल सिद्धार्थदूर्वागोरो
चनादिभिः पोटलिकांकृत्वा एतन्तइतिप्रतिमृष्य ॐ भूर्भुवः स्वः पोटलिके क्षप्रतिमृतावरदा
भवतिप्रतिमृष्य दक्षिणाहस्तेवध्नीयात् ततउक्तविधिनागणेशंसम्पूज्य कलशंसंस्थाप्य
तत्रब्रह्मवरुणसहितादित्यादि नवग्रहानावाह्यसम्पूज्य अर्घंसंस्थाप्य प्रधानसंकल्पं कु
र्यात् अद्येहेत्यादि अमुकगोत्रो अमुकराशिरमुकशर्माहं ममाद्यस्याभिवृद्धये वंशवृद्धि
कर्मकरिष्ये तदङ्गत्वेन दध्यक्षतपुष्पैः आवाहितानां कुलदेवतादि अक्षीदेविपर्यन्तानां
कलशे आवाहितानां ब्रह्मवरुणसहितादित्यादि नवग्रहाणां पूजनंकरिष्ये तत्रस्थाल्यां
नूतनंश्वेतंवस्त्रं प्रसार्य्य दध्यक्षतान् गृहीत्वा उत्तरमुखास्थापयेत् ॐ भूर्भुवः स्वः कुलदे
वते इहागच्छेहतिष्ठ पूजार्थंत्वामावाहयामि १ ॐ भूर्भुवः स्वः स्वनमंत्रेण अमुकइहागच्छे
हतिष्ठ पूजार्थंत्वामावाहयामि ॐ भूर्भुवः स्वः प्रकृतिपुरुषात्मक मातापितरौ इहागच्छत
इहतिष्ठतं क्षप्रतिष्ठितौवरदौभवतम् ॐ भूः ब्रह्मन् ॐ भूः भानो ॐ भूः विघ्नेश ॐ भूः मा
कण्डेय ॐ भूः बले ॐ भूः व्यास ॐ भूः जामदग्न्यराम ॐ भूः अश्वत्थामन् ॐ भूः कृपा
चार्य्य ॐ भूः प्रह्लाद ॐ भूः हनूमन् ॐ भूः बिभीषण ॐ भूर्भुवः स्वः अक्षीदेवी इहागच्छ
इहतिष्ठ क्षप्रतिष्ठितावरदाभव पूजार्थंत्वा आवाहयामि इत्यावाह्य एतन्तइत्यादि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ भूर्भुवः स्वः कुलदेवतादिदेवताः अमृतादिपीठपर्यन्ताः इहागच्छन्तु इहतिष्ठन्तु सुप्रतिष्ठिता
वरदाभवन्तु ॐ वरदाभयपाणाय इति मेवमाध्यानम् मार्कण्डेयध्यानेविशेषः ॐ द्विभुजं जटि
लं सौम्यं कृष्णं चिरजीविनम् मार्कण्डेयं नरोभक्त्या पूजयेत्प्रयतः शुचिः इति ध्यात्वा नाममं
त्रेणपूजनम् ॐ कुलदेवतायैनमः ॐ स्वजन्मनक्षत्रिशाय अमुकायनमः ॐ पृथ्वीपुरुषात्म
कमातापितृभ्योनमः ॐ ब्रह्मणेनमः ॐ भानवेनमः ॐ विष्णवेनमः ॐ मार्कण्डेयायनमः
ॐ वलयेनमः ॐ व्यासायनमः ॐ जामदग्न्यरामायनमः ॐ अश्वत्थाम्नेनमः ॐ कृपाचा
र्यायनमः ॐ प्रह्लादायनमः ॐ हनुमतेनमः ॐ विभीषणायनमः ॐ अमृतेभ्यनमः इति
नाममन्त्रैः आवाहनासनपाद्यार्घ्यस्नानाचमन वस्त्रगंधाक्षतपुष्पधूपदीप नैवेद्यभूषणा
दिभिः सम्पूज्य नाममन्त्रेणजपंविधाय नीराजनंकृत्वा ब्रह्मामुरारीति नवग्रहेभ्यः पुष्पा
ञ्जलिंसमर्प्य मार्कण्डेयंप्रार्थयेत् मार्कण्डेयमहाभाग सप्तकल्पान्तजीवन आयुरा
रोग्यमिच्छामि मत्प्राकंवरदोभव १ चिरजीवीयथात्वंभो भविष्यामितथाभुने रूपया
न्वितवांश्चैव स्त्रियाभुक्तश्चसर्वदाः २ मार्कण्डेयनमस्तेस्तु सप्तकल्पान्त जीवन आयु
रारोग्यमिच्छार्थं प्रसीदभगवन्मुने ३ चिरजीविथथात्वंतु मुनीनांप्रवरद्विज पुरुष्यमुनि
शार्दूल तथामांचिरजीविनम् ४ ततः अमृतींप्रार्थयेत् जयेदविजगन्मातर्जगदानंदका
रिणी प्रसीदमभकल्याणी महाअमृतिनमोस्तुते १ रूपंदेहिजयोदेहि भगंभवतिदे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे २ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च
ब्रह्माविष्णुशिवैर्मह्यं रक्षां कुर्वन्तु नानिमे ३ इति सम्प्राप्य ततो ज्ञात्वा नामाङ्कुरोऽयमाय निवेदितं पयः
पञ्चवारं पिबेत् तत्र मन्त्रः सतिलं गुडसम्मिश्रमञ्जल्यङ्कुमितं पयः माङ्कुरोऽयमाहरं नत्वा पिबा
म्यायुः प्रवृद्धये कृतायाः कुलदेवतादीनां इति पीत्वा मुखं प्रक्षाल्य दक्षिणासंकल्पः अद्येत्या
दि अमुकगोत्रोऽमुकशर्माहं आयुरभिवृद्धये कृतायाः कुलदेवतादीनां आदित्यादिनवग्रहाणां
च पूजायाः साङ्गतायार्थं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् तथा वेदोपपन्न
नान्नेन ब्राह्मणान्भोजयिष्ये इति संकल्प्य दक्षिणां दत्वा अभिषेकनिलकमन्त्रपाठादि
कारयित्वा घृतछायां विधाय ब्राह्मणान्भोजयित्वा स्वयं भुञ्जीत् खराज्ञं नखकेशानां भेष
नाध्यगमोतभ्रा आभिमंकलहं हिंसा वर्मवृद्धौ विवर्जयेत् जन्मतिथिरोदस्मिको ग्राह्या इति ज
न्मोत्सवविधिः अथ कर्णवेधः तत्र व्यासः कर्णचूडव्रतवाले कर्णवेधो विधीयते तद्देशाचार
कुलाचारतोऽवगंतव्यम् वर्षे तृतीये पञ्चमे वेति अयुग्मवर्षे कर्णवेधः तत्र चन्द्रतारानुकूले
शुभदिने कर्णवेधोक्तनक्षत्रे पिता प्रातरुत्थाय स्वकीयं प्रातः कृत्यं निर्वर्त्य गणेशपूजनं कुर्यात्
आचम्य अर्घं संस्थाप्य पूजासंकल्पः अद्येत्यादि अमुकोहं अमुकगोत्रः पुत्रस्य करिष्य
माणकर्णवेधकर्मणि निर्विघ्नतासिद्ध्यर्थं पूर्वांगत्वेन गणेशस्य पूजनं करिष्ये उक्तविधिना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोत्रोत्पन्नस्य प्रधानसंकल्पं कुर्यात् अद्येत्यादि अमुकगोत्रोऽमुकशर्माहं अमुकरा
शेः पुत्रस्य बीजगर्भसमुद्भवेनो निर्वहणाद्वारा पुत्रप्राप्तुः श्रीवृद्ध्यै श्रीपरमेश्वरप्रीतये कर्णवेधकर्म
करिष्ये तत्पूर्वाङ्गत्वेन गणपतिसहित गौर्यादिषोडशमातॄणां पूजनं नान्दीश्राद्धं पुण्याहवाच
नंचकरिष्ये इतिसंकल्प्य उक्तविधिना मातृपूजा नान्दीश्राद्ध पुण्याहवाचनानिकृत्वा कलशं
संस्थाप्य तत्रनवग्रहानावाह्य जलेकेशवादि देवानांपूजन कुर्यात् तत्रसंकल्पः अद्येत्यादि
अमुकगोत्रोः पुत्रस्य कर्णवेधकर्मणि कलशे आदित्यादिनव ग्रहाणां जलेकेशवादि देवानां
पूजनंकरिष्ये इतिसंकल्प्य एतन्तेइति ॐ भूर्भुवः स्वः कलशे आदित्यादिनवग्रहाः जलेकेश
वादिदेवाः सुप्रतिष्ठितावरदाभवन्तु नाममन्त्रेणपाद्यादिभिः पूजयेत् ॐ केशवायनमः ॐ
हरायनमः ॐ ब्रह्मणेनमः ॐ चन्द्रायनमः ॐ सूर्यायनमः ॐ दिगीशेभ्योनमः ॐ नासत्या
भ्योनमः ॐ सरस्वत्यैनमः ॐ गवेनमः ॐ गुरुभ्योनमः इतिनाममन्त्रैर्ध्यानावाहनासन पाद्या
र्घ्यानाचमन वस्त्रगंधाक्षत पुष्पधूपदीप नैवेद्यभूषणादिभिः सम्पूज्य जपंविधाय समर्प्य
नीराज्य पुष्पाञ्जलिंसमर्प्य ततः स्वेष्टदेवंभिषग्वरं ब्राह्मणान्भोजयित्वा च नमस्कृत्य मातृ
संगास्थितं भूषणवस्त्रादिभिरलंकृतं बालकं गुडमोदकादि भोजनार्थंदत्वा अद्येत्यादि
अमुकगोत्रोऽस्यबालकस्य कर्णवेधलग्नादमुकस्थानस्थिते नामुकग्रहेण सूचितारिष्ट
निवृत्त्यर्थं ग्रहाणांप्रीतयेइमांदक्षिणां ब्राह्मणायदास्ये इतिलग्नदानंविधाय ततो देवज्ञ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योधितभुभे लग्नेपितायोचिको ऽन्योवा सुवर्णसूच्या राजतसूच्यावा अयस्कुलस्या ब्राह्मणा वा
लकस्य दक्षिणकर्णं वेधयेत् तत्रमंत्रः भद्रंकर्णेभिरितिप्रजापतिर्ऋषिः त्रिष्टुप्छंदः लिंगो
क्तादेवता दक्षिणकर्णाभिमंत्रणे विनियोगः ॐ भद्रंकर्णेभिः शृणुयामदेवा भद्रंपश्येमाक्षभि
र्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमहिदेवहितंयदायुः अथवामकर्णाभिमंत्रणम्
वक्षन्तीवेतिदेवाऋषयः त्रिष्टुप्छंदोलिंगोक्तादेवता वामकर्णाभिमंत्रणे विनियोगः ॐ
वक्षन्तीवेदवागनीगन्तिकर्णं प्रियंसखायं परिषस्वजानाः ओमेवशिङ्गं वितताधिधन्वज्या
ऽइयंसमनापारयन्ती इत्यभिमंत्र्यकर्णौ वेधयित्वा दक्षिणासंकल्पंकुर्यात् अद्येहा
मुकोहं अमुकराशेरस्य बालकस्य कर्णवेधकर्मणः साङ्गफलप्राप्तये साङ्गुरुयार्थं चेमां
दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् तथाअथोपपन्ने नान्नेन ब्राह्मणाँश्चभो
जयिष्ये इतिसंकल्प्य दक्षिणां दत्वा अभिषेकतिलकरक्षाबंधन घृतच्छाया मन्त्रपाठा
दिकारयित्वा जीवमातृपूजनं महानीराजनंचकुर्यात् इतिकर्णवेधविधिः अथाक्षरस्वी
कारविद्यारम्भो बालकस्यपञ्चमवर्षे कुम्भादिलग्नविवर्जिते उदगयने चन्द्रताराद्यनुकू
ले शुभदिने अक्षरस्वीकारविद्यारम्भंचकारयेत् माङ्गलिकः अभ्यंगस्नानपूर्वंतु गन्धा
द्यैश्चविभूषितः शुक्लवस्त्रसमास्तीर्य तण्डुलोपरिपूजयेत् एवंस्वनिश्चितकाले विद्या
रम्भंतु कारयेत् पूजयित्वाहरिंलक्ष्मीं देवींचैवसरस्वतीम् अथप्रयोगः स्वस्तिवाच

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नपठित्वा अर्घंसंस्थाप्य प्राणानायम्य उक्तविधिनागणेशंसम्पूज्य प्रधानसंकल्पंकुर्या
त् अद्येहेत्यादि अमुकोहं अमुकगोत्रः पुत्रस्य विद्याप्राप्तौ व्यवहारसिद्धये अक्षरारम्भं
विद्यारम्भंचकरिष्ये तत्पूर्वांगत्वेन गणपतिसहितगौर्य्यादिषोडशमातृणां पूजनं नान्दीश्रा
द्धं पुण्याहवाचनंचकरिष्ये इतिसंकल्प्य मातृपूजा नान्दीश्राद्ध पुण्याहवाचनानिविधा
य कलशंसंस्थाप्य तत्रग्रहानावाह्य सम्पूज्य रक्षासूत्रंचकल्पयित्वा वेदिकायां नाम्नपी
ठेवा नवंधौतंशुक्लवस्त्रंसमास्तीर्य्य दध्यक्षतपुञ्जेषु गणेशाद्यर्च्चादौ पञ्चाशद्देवानावाह
येत् तत्रसंकल्पः अद्येहामुकोहं अमुकगोत्रोस्य बालकस्य अक्षरस्वीकारविद्यारम्भ
कर्म्मणि पूर्वाङ्गत्वेन दध्यक्षतपुञ्जेषु गणेशाद्यर्च्चादिदेवानां तथाचजुर्विद्यादीनांच आ
वाहनपूर्वकं पूजनंकरिष्ये इतिसंकल्प्य ॐ भूर्भुवः स्वः गणेश इहागच्छेहतिष्ठ पूजा
र्थं त्वां आवाहयामि इत्युक्त्वास्वदक्षिणतः स्वाभिमुखंस्थापयेत् ॐ भूः विनो ॐ भूः ल
क्ष्मी ॐ भूः देवी ॐ भूः सरस्वति ॐ भूः स्वविद्येयजुर्विद्ये ॐ भूः स्वविद्यासूत्रकारका
त्यायन ॐ भूः ब्रह्मन् ॐ भूः व्यास ॐ भूः गौतम ॐ भूः जैमिने ॐ भूः मनो ॐ भूः
पाणिनि ॐ भूः कात्यायन ॐ भूः पतञ्जलि ॐ भूः आस्क ॐ भूः पिङ्गल ॐ भूः गर्ग ॐ
भूः कणाद ॐ भूः कपिल ॐ भूः वाल्मिके ॐ भूः वामन ॐ भूः धन्वन्तरि ॐ भूः कश्यप
ॐ भूः भरत ॐ भूः विश्वकर्म्मन् ॐ भूः वेदाः इहागच्छन्त पूजार्थंजुष्माना वाहयामि

रामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मि ॐ भूः पुराणानि ॐ भूः न्याय ॐ भूः मीमांसे ॐ भूः धर्मशास्त्र ॐ भूः शिक्षे ॐ भूः कल्प
ॐ भूः व्याकरण ॐ भूः निरुक्त ॐ भूः छन्दांसि ॐ भूः ज्योतिष ॐ भूः वैशेषिक ॐ भूः वेदान्त
ॐ भूः सांख्य ॐ भूः पातञ्जल ॐ भूः काव्य ॐ भूः अलङ्कार ॐ भूः वैद्यशास्त्र ॐ भूः धनुर्वेद
ॐ भूः गान्धर्ववेद ॐ भूः शिल्पशास्त्र ॐ भूः पालकाचार्य्य ॐ भूः शालीहोत्राचार्य्य ॐ भूः
शैनिकाचार्य्य इतिसम्बुध्यन्तनामभिर्मन्त्रैः क्रमेणावाह्य एतन्ना इति प्रतिष्ठाप्य ॐ भूर्भुवः
स्वः गणेशादिशैनिकान्तादेवताः सुप्रतिष्ठिता वरदा भवन्तु अथ सरस्वत्यावाहनविधिः
भूमौ गोचर्ममात्रं विलिख्य पात्रात् आदाय उद्धृतां मृदमानीय सैकतं स्थण्डिलं निर्माय तस्या
परितः आमृदा पञ्चकोणं अष्टकोणं वा सरस्वतीयन्त्रं विलिख्य तस्मिन् सरस्वतीमावाह
येत् ॐ भूर्भुवः स्वः भुवनमातः सर्ववाङ्मयरूपे सरस्वति इहागच्छ इहतिष्ठ पूजार्थं त्वामा
वाहयामि इत्यावाह्य ॐ एतन्ते ॐ भूर्भुवः स्वः अस्यां मृण्मय्यां मूर्तौ सरस्वतिं प्रति
ष्ठिता वरदा भव इति प्रतिमां स्थापयेत् अथ ध्यानम् तत्र पूर्वं गणेशध्यानम् घृतपाशा
ङ्कुशकल्पलतिकः मोदाख्यबीजपूरद्युतः शशिसकलकलितमौलिः त्रिलोचनोऽरुणवपु
ष्यगजवदनः भास्वरभूषणादिप्रो बृहदुदरः पद्मविकोल्लसितो ध्येयोऽनामतेदापद
मरसिरुहः सदामनुजैः १ अथ विघ्नोध्यानम् उद्यत्कोटिदिवाकराभमनिशं शंखेगदां
पंकजं चक्रं बिभ्रतमिन्दिरावक्षमतो मंशोभिपार्श्वद्वयम् कोटीराङ्गदहार कुण्डलधरं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पीताम्बरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजेत् २ अथ लक्ष्मीध्यानम् का
न्त्याकाञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः हस्तोत्क्षिप्तहिरण्मयामृतघटैः रासिच्यमा
नांशियं विश्वाणांवरमञ्जु कुम्भमभयं हस्तैः किरीटोज्वलां क्षौमावद्धनितम्ब बिम्बललितां
वन्देरविन्दस्थिताम् ३ अथ देवीध्यानम् अध्यारूढं मृगेन्द्रे सजलजलधरश्यामलांहस्तप
द्मैः शूलं बाणं कृपाणं वरिजलजगदाचोपवाणान्वहन्तीम् चन्द्रार्द्धांसांत्रिनेत्रां चतसृभिरभि
तः खेटकं बिभ्रतीभिः कन्याभिः सेव्यमानां प्रतिभटमदां भूलिनींभावयामि ४ अथ सर
स्वतीध्यानम् अङ्कान्मुक्तशशाङ्ककोटिसदृशी माषीनतुङ्गस्तनीं चन्द्रार्द्धाङ्कितशेखरां मध
मदा भालोलनेत्रत्रयाम् बिभ्राणामनिशं वरंजपवटीं विद्यांकपालंकरे राजोद्योवनगर्वि
तांत्रिभुवनं वागीश्वरीमाश्रये ५ इतिध्यात्वा ॐ वरदाभयपाशाय प्रतिमेवमांध्यानम्
ततश्चतुर्थ्यन्तैर्नाममन्त्रैः सर्वमापूजनम् ॐ गणेशायनमः ॐ विष्णवे· ॐ लक्ष्म्यै· ॐ दे
व्यै· ॐ सरस्वत्यै· ॐ स्ववविद्यायै ऋग्वेदायै· ॐ स्ववविद्यासहत्रकाशकात्मायनाय· ॐ ब्रह्म
णे· ॐ व्यासाय· ॐ गौतमाय· ॐ जैमिनये· ॐ मनवे· ॐ पाणिनये· ॐ कात्यायनाय· ॐ
पतञ्जलये· ॐ भास्कराय· ॐ पिङ्गलाय· ॐ गर्गाय· ॐ कणादाय· ॐ कपिलाय· ॐ
वाल्मीकये· ॐ वामनाय· ॐ धन्वन्तरये· ॐ कृष्णाय· ॐ भरताय· ॐ त्रिम्बकमुनये·
ॐ वेदेभ्यः· ॐ पुराणेभ्यः· ॐ न्यायाय· ॐ मीमांसायै· ॐ धर्मशास्त्राय· ॐ शिक्षायै·

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ कल्पाय ॐ व्याकरणाय ॐ निरुक्ताय ॐ छन्दोभ्यो नमः ॐ ज्योतिषाय ॐ वैशेषिकाय
ॐ वेदान्ताय ॐ सांख्याय ॐ पातञ्जलाय ॐ काव्याय ॐ अलङ्काराय ॐ वैद्यशास्त्राय
ॐ धनुर्वेदाय ॐ गान्धर्ववेदाय ॐ शिल्पशास्त्राय ॐ पाल्कापाचार्य्याय ॐ शालीहोत्राचा
र्य्याय ॐ शौनिकाचार्य्याय इतिनाममन्त्रैः ॐ गणानान्त्वा ॐ तद्विष्णोः ॐ श्रीश्चते ॐ सम
रयै ॐ सरस्वतीयोन्यां गर्भमन्तरग्निमात्मन्वी सुकृतं विभर्ति अपाक्षसेन वरुणो सोम्र
न्द्रश्च स्त्रियेजनयन्न सुराजाः इतिवैदिकमन्त्रैश्च सेवां आसन पाद्यार्घ्याचमनवस्त्र
यज्ञोपवीत गन्धाक्षतपुष्पधूपदीपनैवेद्यभूषणताम्बूल नीराजनान्तं पूजनं विधाय नाममं
त्रैः पुष्पाञ्जलिं समर्प्य सर्वविद्याब्रह्मऋषिरायै श्रीसरस्वत्यै नमः इतिसरस्वत्यै पुष्पाञ्जलिं
समर्प्य नमस्कार प्रदक्षिणाः कुर्य्यात् ततोवेदांपञ्चभूसंस्कार पूर्वक मग्निंसंस्थाप्य
आचार्य्यब्रह्मणोवरणं कुर्य्यात् एतन्नोतिपृथिवीद्वनामाग्निं प्रतिष्ठाप्य ॐ भूर्भुवःस्वः
पृथिवीद्वनामाग्ने सुप्रतिष्ठितोवरदोभव तदग्निरितिध्यात्वा पृथिवीद्वनामाग्नयेनमः
इतिनाममन्त्रेण पाद्यादिनीराजनान्तं समृज्य ब्रह्मोपवेशनादिपर्य्युक्षणान्तं कर्म्मसमाप्य
द्रव्यत्यागंकुर्य्यात् अद्यहामुकगोत्रस्यबालकस्य अक्षरारम्भविद्यारम्भहोमकर्म्मणाहं
मक्षे तत्रेदमाज्यं आघारान्तभागदेवताभ्यो गणेशादिदेवताभ्यो महाव्याहृतिदेवताभ्यः
सर्वप्रायश्चित्तदेवताभ्यः अग्नयेस्विष्टकृतेच मयापरित्यक्तंअष्टादेवतमस्तु ब्रह्मणा वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुद्रो मनसा प्रजापतिं ध्यात्वा जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये इत्याघारावाज्यभागौ
हुत्वा प्रधानहोमं कुर्यात् ॐ गणेशाय स्वाहा इत्यादिभिर्नामकान्तं चतुर्थ्यन्तस्वाहान्तमन्त्रैर
केकामाज्याहुतिं हुत्वा ततो भूरादिनवाहुतिहोमं स्विष्टकृतं च हुत्वा सम्प्रवप्राशनादिपूर्णपा
त्रदानान्तं विधाय होमदक्षिणां अद्येहामुकगोत्रः पुत्रस्य ब्रह्मचारम्भविद्यारम्भकर्मणि एत
द्धोमकर्मणः साङ्गतायार्थं इमां दक्षिणां आचार्याय ददामि तत्सत् इति दत्वा धात्रीं वस्त्रभूष
णादिभिः संतोष्य आचार्यं वस्त्रालंकारादिभिः सम्पूज्य लग्नदानं कुर्यात् अद्येहामुक
गोत्रः पुत्रस्य ब्रह्मचारीकारं विद्यारम्भलग्नाद्यत्रकुत्रस्थितानां ग्रहाणां शुभानां शुभफला
धिक्यप्राप्त्यै दुष्टानां दुष्टफलनिवारणार्थं इमां दक्षिणां ब्राह्मणाय ददामि इति लग्नदा
नं विधाय ब्राह्मणान् संतोष्य अभ्यङ्गस्नानपूर्वकं वस्त्रस्रग्गन्धालंकारादिभिर्भूषितं बाल
कं गणेशादिदेवेभ्यः प्रणम्य प्राङ्मुखोपविष्टः पश्चिमाभिमुखं बालकं गणेशादिदेवेभ्यः
प्रणम्य प्राङ्मुखोपविष्टः पश्चिमाभिमुखं बालकं प्रणवपूर्वकं ब्रह्मचारीकारं कारयेत् तत्र प्र
थमं गुरुनमस्कारः ॐ अज्ञाननिमिरान्धस्य ज्ञानाञ्जन शलाकया चक्षुरुन्मीलितं येन
तस्मै श्रीगुरवे नमः ततः पालाशादिदण्डोद्धृत शुभधूलिसंस्कृते शुभपीठे पञ्चकोणं मध्यको
णं कामसरस्वतीयन्त्रं विलिख्य तत्र सरस्वतीं प्रणमेत् ॐ सरस्वति नमस्तुभ्यं वरदे कामरू
पिणि विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा इति प्रणम्य गन्धाक्षतपुष्पपूगीफला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिभिः सम्पूज्य स्फटिकशलाकयारोप्यशलाकया वा अकारादिक्षकारान्तान् वर्णान् लिखित्वा
वाचयेत् यथा ॐ नमः सिद्धं अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः क ख ग घ ङ च
छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह ल क्ष इत्यक्षराणि त्रिवारं वाच
यित्वा विद्यारम्भं कारयेत् यस्य ज्ञानदयासिन्धोरिति वागर्थाविवेति च पठित्वा गुरुं दक्षिणादि
भिः संतोष्य प्रणम्य भूयसीं संकल्पयेत् अद्येहामुकराशेर्बालकस्य अक्षरस्वीकारविद्या
रम्भकर्म णोरङ्कुरेन अक्षतपुष्पैः गणेशादिदेवानां पूजनस्य होमकर्मणश्च साङ्गराज्यार्थं
साङ्गफलप्राप्त्यर्थं चेमां दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् तथा
यथोपपन्नान्नेन ब्राह्मणाँश्च भोजयिष्ये इति संकल्प्य दक्षिणां दत्वा स्नापनं च आत्म
मकरणाभिषेक तिलकमंत्रपाठादिकारयित्वा ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा यथा
स्फुरं विहरेत् इत्यक्षरस्वीकारविद्यारम्भो अथ चूडाकरणम् तत्र चूडाकर्मदिवसात् पूर्वे
द्वित्रौ गणपतिपूजनपूर्वकं केशाधिवासनं कुर्यात् तत्र पीतवस्त्रनवखण्डेन हरिद्रादूर्वा
शमीपल्लवादि मङ्गलद्रव्याणि क्षिप्त्वा सूत्रेण त्रिगुणेष्टकं बध्वा नवपीठलिकानिर्मिमीत तस्मै
कादशमीं च निर्माय स्थापयेत् ततः स्वस्तिवाचनपूर्वकं शुभासनमुपविश्याचम्य गणेशा
पूजनं कुर्यात् तत्र संकल्पः अद्येहत्यादि अमुकोहं अमुकराशेः पुत्रस्य करिष्यमाणचू
डाकरणापयोगि केशलतिकाधिवासनकर्मणि निर्विघ्नतासिद्ध्यर्थं भगवतो गणेश्वरस्य मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आमिलितोपचारैः पूजनं करिष्ये इतिसंकल्प्य गणेशपूजन विधिना गणेशं सम्पूज्य प्रधानसं
कल्पं कुर्य्यात् यथा अद्येहेत्यादि अमुकोहं अमुकराशेः पुत्रस्य श्वः करिष्यमाण चूडाक
र्म्मसिद्ध्यर्थं केशाधिवासनं करिष्ये इतिसंकल्प्य निर्म्मिताः पोटलिकाऽऽदाय एकै
कया पोटलिकया एकैकां जूटिकां केशेषु बध्नीयात् तत्रक्रमः पूर्वं शिरोदक्षिणतस्त्रिस्त्रः
ततः पश्चात्त्रिस्त्रः तत उत्तरतोपि त्रिस्त्रः ततएकया मध्ये मध्योचितां शिखां मङ्गलघोषपुरस्स
रं बध्नीयात् आचार्य्यः पोटलिके अन्ये निर्म्माय तयोरेकां कलशे एकां शालल्यां च बध्नीया
त् ततः एतन्त्रो ॐ भूर्भुवः स्वः चूडाकर्म्मजूटिकाः सुप्रतिष्ठिता भवन्त्विति प्रतिष्ठाप्य द
क्षिणासंकल्पः अद्येहेत्यादि अमुकराशेः पुत्रस्य केशाधिवासनकर्म्मणः साङ्गतासिद्ध्यर्थं इ
मां दक्षिणां ब्राह्मणेभ्योदास्ये ॐ तत्सत् इति दक्षिणां दत्वा पोटलिका उष्णिमादिना व
ध्वा सेवशेषं दिनिकेशाधिवासनम् अथ चूडाकर्म्मदिवसे प्रातरुत्थाय स्वकीयं नित्य
कर्म्म समाप्य गीतवादित्रादि पञ्चघोषपूर्वकं पश्चिमद्वारेण शालां प्रविशेत् सा च शाला
नवग्रहभागसिद्ध्यै तत्रस्वासन उपविश्याचम्य अर्घ्यं सम्पाद्य प्राणायामं विधाय ग
णेशपूजनविधिना गणेशपूजनं विदध्यात् तत्र प्रधानसंकल्पः ॐ विष्णुः अद्येहेत्यादि
अमुकोहं अमुकस्य करिष्यमाण चूडाकरणोपनयनवेदारम्भसमावर्त्तनकर्म्मसु स
र्वाभ्युदयप्राप्त्यर्थं गणपतिसहित गौर्य्यादि षोडशमातॄणां पूजनं करिष्ये इतिसंकल्प्य मातृः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूजयित्वा वसोर्धाराः पातयित्वा दक्षिणांदद्यात् ततः आम्युदयिकश्राद्धं कुर्यात् पुराश्राद्धपाव
नंचविधाय साम्प्रतिकाचारात् गणेशपूजनमात्रंविधाय चूडाकरणवेदीसमीपमागत्यापवि
त्रमाचम्याघमंसंस्थाप्य प्रधानसंकल्पंकुर्यात् यथा अद्येत्यादिसंकीर्तनान्ते अमुकोहं
अमुकगोत्रः पुत्रस्य बीजगर्भसमुद्भवेनो निर्वहणो बलाद्युवेधाभिवृद्धिद्वारा ॐ तत्सत् श्रीपरमे
श्वरप्रीतये उपनयनात्प्राक् चूडाकर्मसंस्कारं करिष्ये तत्र चूडाकर्माधिकार सिद्ध्यर्थं त्री
न्ब्राह्मणान्भोजयिष्ये इतिसंकल्प्य तत्राचार्यब्रह्मकर्मकर्तृ आचार्यब्रह्मणोह
कविधिनावरणंकुर्यात् ततः आचार्यः चूडाकरणविधायश्च भू संस्कारपूर्वकमग्निंस्था
पयेत् अत्रावसरे माताकुमारं मङ्गलद्रव्ये संलाप्य गृहेवाससीपरिधाय स्वयंचनवीन
वस्त्राणिपरिधाय कुमारमङ्के निधाय पञ्चघोषपुरःसरं पश्चिमद्वारेणशालां प्रविश्य अग्नेः
पश्चात्पत्न्युवामत उपविशति ततः पितावृद्धोपवेशनादि पर्य्युक्षणान्तंकर्म समाप्य आ
सादनान्ते विशेषवस्तूनिस्थापयेत् शीतोष्णोदकमिश्रणार्थं भेकंपात्रंशीतंजलमुष्णं
जलमुष्णं नवनीतपिण्डं घृतपिण्डं दधिपिण्डंवा त्रीणीशलली त्रिकुशानमुष्येतत्यर्थः सप्त
विंशतिदर्भपिञ्जूलाः पवित्रलक्षणाः ताम्रसौकार्य्यानतिस्वस्तिस्वः सूत्रवेष्टिताः क्रिय
न्ते क्षुरस्ताम्रमयः ताम्रपरिष्कृतौलौहौवा आनकुहं गोमयं नापितस्येति ततः पवित्रच्छेदना
दिपर्य्युक्षणान्तं कर्म कृत्वा सम्भवनामाग्निंसंस्थाप्य एतन्तद्यति ॐ भूर्भुवःस्वः सम्भवनामा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जेस्कप्रतिमिमृतोवरेदाभव तेदवाग्निरिति चत्वारिशृङ्गाइतिच ध्यानावाहन पाद्यादिनीराजनान्तं
सम्पूज्य द्रव्यत्यागंकुर्य्यात् अद्येत्यादि अमुकोहं अमुकराशेः पुत्रस्य चूडाकर्म्मणाग्नेस
तत्रप्रजापतिमिन्द्रमग्निं सोममग्निंवायुं सूर्य्यं अग्नीवरुणावग्नी वरुणावग्निंवरुणं सवि
तारंविष्णुं विश्वान्मरुतः स्वर्द्यान् वरुणमदितिं प्रजापतिमग्निं स्विष्टकृतं चाज्येनाहुत्यस्ते
दुरमाज्ये तत्तद्देवताभ्यो मयापरित्यक्तं यस्यदेवतमस्तु इतिद्रव्यत्यागसंकल्पः दक्षिणां
जान्वाच्य ब्रह्मणान्वारब्धोमनसाप्रजापतिंध्यात्वा जुहुयात् ॐ प्रजापतयेस्वाहा इदं प्र॰
ॐ इन्द्रायस्वाहा इदमि॰ ॐ अग्नयेस्वाहा इदम॰ ॐ सोमायस्वाहा इदंसोमाय इत्याघा
राज्यभागौकृत्वा मूलादिहोमंकुर्य्यात् ब्रह्मणेपूर्णपात्रदानम् अद्येहामुकोहं अमुक
राशेरमुकनाम्नः पुत्रस्यचूडाकर्म्माङ्गहोमकर्म्मणः साङ्गफलप्राप्तये साकुराशाथेच इदं
पूर्णपात्रं सक्षत्रणं ब्रह्मणेकुम्भमहं सम्प्रददे अक्रन्कर्म्म कर्म्मकृत इतिमन्त्रपाठः ततो
दैवज्ञबोधित शुभलग्नेन दृलग्नदानंकुर्य्यात् तत्रसंकल्पः अद्येहामुकराशेरस्यकुमारस्य
चूडाकर्म्मलग्नाद्यत्रकुत्रस्थानस्थितानां अद्यादित्यादि नवग्रहाणां दुष्टानांदुष्टफलोप
शानाये शुभानांविशेषतः शुभफलप्राप्तये इदंसक्षत्रणं सुवर्णनिष्क्रयीभूतं द्रव्यम्वा दैव
ज्ञायदातुमहमुत्सृजे ॐ तत्सत् दैवज्ञंसम्पूज्यदद्यात् ततउपकल्पितपात्रे शीतास्क
अपक उष्णा आपआसिञ्चति अनेनमंत्रेण उष्णेनवाजयति परमेष्ठीब्रह्मणिः प्रतिष्ठा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छन्दोलिंगोक्तोदेवता उष्णोदकासेचने विनियोगः ॐ उष्णेनवाय उदकेनेक्षपदितेकेशान्वप इति
तत्रतूष्णींनवनीतपिण्डं घृतपिण्डंदधिपिण्डंचप्रक्षिपति ततश्चपश्चादस्य पूर्वमधिवासितं
दक्षिणांगादानमुन्दयति क्लेदयति आर्द्रीकरोतीत्यर्थः तत्रमंत्रः सवित्रेति प्रजापतिर्ऋषिर्गा
यत्रीछन्दः आपोदेवता उन्दनेविनियोगः ॐ सवित्राप्रसूतादेव्या आपउन्दन्तु तेतनूमृदी
घामुत्यावलाभवर्चसे इति ततस्त्रिराचामेत्तल्पा तूष्णींक्षुरमिश्रान्केशान्विवीनीय पृथ
क्कृत्य तेष्वेवकेशेषु कुशतरुणान्यंतर्दधाति तत्रमंत्रः ओषधइति प्रजापतिर्ऋषिर्यजुश्छन्दः
ओषधिर्देवता कुशतरुणान्तर्द्धानेविनियोगः ॐ ओषधेत्रायस्व स्वधितेमैनंहिंसीः
इतिसकुशतरुणान्केशान्सव्यहस्तेधृत्वा दक्षिणाहस्तेनक्षुरमादत्ते तत्रमंत्रः शिवोनामेति
प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरोदेवताक्षुरग्रहणेवि० ॐ शिवोनामासिस्वधितिस्ते पिता
नमस्ते अस्तुमामाहिंसीः इति ततः सकुशतरुणान्केशान्क्षुरंप्रवपति निदधाति से
लग्नीकरोतीत्यर्थः तत्रमंत्रः निवर्त्तयामीति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरोदेवता प्रवप
त्रविनियोगः ॐ निवर्त्तयाम्यायुषे अन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वायसु
वीर्य्याय इतिततस्तान्केशान्क्षुरेणाच्छिनत्ति अनेनमन्त्रेण येनावपदिति लंबायनऋषिः
पंक्तिश्छन्दः सवितादेवता केशच्छेदनवि० ॐ येनावपत्सविताक्षुरेण सोमस्यराज्ञो वरुणस्य
विद्वान् तेनब्राह्मणोवपतेदमस्यायुष्मज्जरदष्टिर्यथासत् इतिसकेशानि कुशतरुणा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निप्रच्छिद्य उत्तरतोधिष्ठमाणो आनडुहे गोमयपिण्डे निक्षिपेत् तत्रविशेषः पितासेक
ग्रानिपि कृत्वानिक्षिप्य प्रागग्राणि शिशुमातृ हस्तेनिदधाति सा प्रागग्रारायानडुहे
गोमयपिण्डे निदधाति अथ पश्चिमगोदाने उन्दनंविनयनं कुशतरुणान्तर्द्धानंच पू
र्वोक्तैरेव मन्त्रैः कुर्य्यात् क्षुरस्तु मन्त्रेणगृहीत्वा नपुनर्संस्कारमर्हति द्रव्याभेदात्
प्रवपनंच पूर्वोक्तमन्त्रेणकुर्य्यात् छेदने मंत्रविशेषः आयुषमिति नारायणऋषि
रनुष्टुप्छन्दोग्निर्देवता कश्यच्छेदने विनियोगः ॐ आयुषमज्जमदग्नेः कश्यपस्यायु
षम् अङ्गिरसां आयुषम् मन्नो अस्तु आयुषम् इतिछित्वा पूर्ववद्गोमयपिण्डे
निदध्यात् एवं पुनर्वारद्वयं क्षुरयोः पश्चिमगोदानयोः पश्चिमगोदानयोः उन्दनं वि
नयनं कुशतरुणान्तर्द्धानं क्षुरादानं प्रवपनं छेदनं गोमयप्राशनं च नूतनीकुर्य्यात् अथ
प्रोक्तगोदाने उन्दनविनयन कुशतरुणान्तर्द्धान क्षुरादानप्रवपनानिकुर्य्यात् छेद
नेतुमन्त्रविशेषः अनेतिप्रजापतिर्ऋषिः अनुष्टुप्छन्दः क्षुरोदेवताकश्यच्छेदने विनि०
ॐ अनभूरिष्यरादिवञ्जाक्रपश्याधिस्तूर्य्यम् मनेतवपामिब्रह्मणाजीवातवेजी
वनाय सुश्लोकपाप्मस्वस्तये इतिमन्त्रेणछित्वा गोमयप्राशनम्पूर्ववत् एवं पुनर्वारद्व
यं क्षुरयोस्तरुणोदानयोः उन्दनंविनयनं कुशतरुणान्तर्द्धानं क्षुरादानं प्रवपनं छेदनंगो
मयप्राशनं चनूतनीकुर्य्यात् अथत्रिःक्षुरेणशिरःप्रदक्षिणंपरिहरति शिरसः समंतात्प्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दक्षिणं परिभ्रामयतीत्यर्थः सकृन्मंत्रेणाहितूष्णिम् तत्र मंत्रः अत्क्षरेणेति वामदेवऋषिर्य
जुश्छन्दः क्षुरोदेवता क्षुरपरिहरणे वि० ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्ता वापयति के
शान्निधिशिरोमास्माकुः प्रेमाभीः इति अथोष्णेनोदकेन जलेन सर्वं शिरआर्द्रीकृत्य मु
खवपनार्थं नापिताय क्षुरं प्रयच्छेत् क्षुरं परिवेपेति अक्षुरमिति वामदेवऋषिर्मंजु
ष्टुप् क्षुरोदेवता क्षुरप्रदानविनियोगः ॐ अक्षुरं परिवपेति परिवपामीति नापितो
वदेत् अथ यथाकुलाचारं शिखावर्जं वपनं कृत्वा ततः सकेशं गोमयपिण्डं पल्यले
गोमूत्रोदकान्तेवानिधापयेत् ततः स्नातं पर्युप्तशिरसं पुष्पमालाभिश्चालङ्कृतं
भाणवकं आचार्यसमीपमानीय अग्नेः पश्चादवस्थापयेत् अथ पिता स्वाचार्यो
ववदति कुमारस्याचार्याभावात् अग्रेहेत्यादि अमुकगोत्र अमुकनाम्नः पुत्रस्य
चूडाकर्मकृद्धोमकर्मणः चूडाकर्मणाख्यसङ्कल्पफलप्राप्तये साकुरायार्थं च इदं क
वर्णं अग्निदैवतं आचार्याय तुभ्यमहं सम्प्रददे ॐ तत्सत्ममेति संकल्प्य दद्यात्
इति चूडाकर्मपद्धतिः अथ उपनयनम् प्रथमं प्रायश्चित्तं कुर्यात् तत्र संक
ल्पः अग्रेहेत्यादि अमुकोहं स्वस्योपनेतृत्वयोग्यतायै कृच्छ्रत्रयगोत्रजनिष्क्र
यी भूतसुवर्णतिलपात्रं ब्राह्मणायदास्ये तस्योपनेतृत्वेपि प्रायश्चित्तसंकल्पं कु
र्यात् अग्रेहेत्यादि अमुकोहं स्वस्योपनेतृत्वयोग्यतायै कृच्छ्रत्रयगोत्रजनिष्क्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भीभूतं सक्तवर्णांतिलपात्रं ब्राह्मणाय दद्यात् अथाचार्य्यः पि
ता उपनयनवेदीसमीपमागत्य वेद्यांपश्चभूसंस्कारपूर्वकं समुद्भवनामाग्निमावा
ह्य संस्थाप्य प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि अमुकराशौ अमुकगोत्रोऽहं
अमुकशर्म्मणोऽस्य पुत्रस्य नीजगर्भे समुद्भवोनिर्विघ्नाद्वारा ॐ तत्सत् श्रीपरमेश्व
रप्रीत्यर्थं वेदाध्ययनादिकर्म्माधिकारसम्पादकद्विजत्वसंसिद्धिकाम उपन
यनाख्यंकर्म्मकरिष्ये तत्पूर्वांगत्वेन श्रीब्राह्मणान्सहोनेन वटुनाभोजयिष्ये
इति संकल्प्य ब्राह्मणान्भोजयित्वा तैः सहकुमारं चभोजयेत् अथाचार्य्यो द्र
ष्टमोपवेशनादि अवेक्षणमध्ये दीर्घाकारकुतीरित्यन्तं विधाय विशेषोपकल्प
नीयावस्तूनामादत्वेत् तानिच कौपीनम् मेखला यज्ञोपवीतम् अजिनम्
दण्डः समिधस्तिस्रः भिक्षापात्रंचेति अथ पर्य्यङ्कशिरसं कुमारं मङ्गलकृत्के
लापयित्वा पुष्पमालादिभिश्च अलङ्कृत्य वेदगीतवादित्र घोषपुरःसरं
प्रदक्षिणमाग्निंपरिक्रमयन् आचार्य्यसमीपमानयन्त्याचार्य्यः पुरुषाः
अथाचार्य्योभागावकं स्वस्यदक्षिणतोग्निः पश्चात् उदङ्मुखंदण्डपवेशम
ॐ ब्रह्मचर्य्यमागाः इतिब्रूयात् ॐ ब्रह्मचर्य्यमागाम् इतिभाणयकोवदेत् पुन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रचार्य्यः ब्रह्मचार्य्यसीति पृच्छति माणवकोऽपि ब्रह्मचार्य्यस्मीति ब्रूयात् अथाचार्य्यो
माणवकं कौपीनवासः परिधापयति मन्त्रेण येनेन्द्रायेत्यङ्गिरा ऋषिर्बृहती छन्दो बृहस्पति
र्देवता वासः परिधानेविनियोगः ॐ येनेन्द्रा बृहस्पतिर्धासः पर्य्यदधामृतम् तेन त्वा परिदधा
म्यायुषे दीर्घायुत्वाय बलाय वर्चसे इत्याचार्य्यस्यैवमन्त्रपाठः परिदधामीति मन्त्रलिङ्गात्
अत्रापि द्विराचमनम् भूद्रुणहिममस्ता वधावेहदेनयोजितः उपनेयो माणवको द्विरपः प्राश्य
नंततः तदप्यमन्त्रकम् अथ मेखलां बध्नाति अनेन मन्त्रेण इयं हि रुक्मिति वामदेव ऋषि
र्गायत्री छन्दो मेखलादेवता मेखलाबंधनेविनियोगः ॐ इयं हि रुक्मं परिपाधमानाय
म्पवित्रं पुनतीमः आगात् प्राणापानाभ्यां बलमादधाना स्वसादेवी भगो मेखलेय
म् इति मन्त्रं पठन्तो माणवकस्य कटिप्रदेशे मेखलां त्रिरावेष्ट्य प्रवरसङ्ख्यां ग्रन्थीं क
रोति माणवकस्यैवमन्त्रपाठः मः आगादिति मन्त्रलिङ्गात् तत्र मेखलाश्च मौञ्जी
त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्येति
क्रमेण सूत्रोक्ता ग्राह्या अत्रावसरे प्रणवपूर्वं व्याहृतयः शिखाबंधनं कुर्य्यात्
अत्र यज्ञोपवीतदानधारणे सूत्रकारेणोपात्तं तथापि विभृयाद्दण्डकौपीनो
पवीताजिनमेखला इति व्यासवचनात्तत्कार्य्ये अवसरस्य प्रौचित्यान्मेखलाबंध
नानन्तरं एकं यज्ञोपवीतं धारयेत् अथ पृक्तत्वात् यज्ञोपवीतविधानम् कल्पग्रन्थ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिस्थापयेत् ॐ भूर्भुवः स्वरोम् इतिसंस्थाप्य ॐ यज्ञोपवीतं प्रतिमृत्पत्वा मीतिवेदत्र य
तन्तइतिप्रतिमृष्य ॐ कारस्वेत्याद्यप्रथमतंतवेनमः ॐ अग्निदेवत्याद्यद्वितीयतंतवेन
नमः ॐ भगदेवत्याद्य तृतीयतंतवेनमः ॐ सोमदेवत्याद्य चतुर्थतंतवेनमः ॐ पितृदेव
त्याद्यपंचमतंतवेनमः ॐ प्रजापतिदेवत्याद्यषष्ठतंतवेनमः ॐ वायुदेवत्याद्यसप्तमतंत
वेनमः ॐ सूर्य्यदेवत्याद्यामृमतंतवेनमः ॐ सर्वदेवत्याद्यनवतंतवेनमः इतितन्तुदेवताः
सम्पूज्य ग्रन्थित्रयाधिपान्हरिब्रह्मेश्वरान्सम्पूज्य ॐ हरवेनमः ॐ ब्रह्मणेनमः ॐ
ईश्वरायनमः ॐ यज्ञोपवीतकारस्याधिपाय परब्रह्मणेनमः इतिचसम्पूज्य तदादा
य ॐ आकृष्णेनेतिमन्त्रेण आदित्याद्यप्रदर्शयेत् पुनः कलशोपरिसंस्थाप्य अमृतो
त्तरशतकृत्वः प्रणवंसकृद्गायत्रीं च जपन्स्पृशेत् ततः प्राणानायम्य अम्बकमन्त्रंज
पन्दक्षिणहस्तेनस्पृशेत् ततोदशकृत्वः सावित्र्याभिमंत्रिताभिरद्भिः सिञ्चेत् एवं
संस्कृतंयज्ञोपवीतं धारयेत् अनेनमन्त्रेण यज्ञोपवीतमितिपरमेष्ठीऋषिः त्रिष्टु
प्छंदः लिंगोक्तादेवता श्रौतस्मार्त कर्म्मानुष्ठानसिद्धये यज्ञोपवीत परिधाने विनियोगः
ॐ यज्ञोपवीतं परमपवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुञ्चशु
भ्रं यज्ञोपवीतंबलमस्तुतेजः ॐ यज्ञोपवीतमसियज्ञस्त्वत्वा यज्ञोपवीतेनोपनह्या
मि एवंमन्त्रंपठतोमाणवकस्य दक्षिणबाहुमुद्धृत्य वामांसोपरिनिदध्यात् ततः प्रद

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षिणमग्निंपरीत्य माणवकोग्नेः पश्चात्स्थित्वा आचमनंकृत्वा स्ववर्णोक्तंमेखलामादिचर्म्मः
यज्ञोपवीतवत्परिदध्यात् मन्त्रः मित्रस्यचक्षुरिति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्निदेवता
अजिनधारणेविनियोगः ॐ मित्रस्यचक्षुर्द्रुणंवलीयस्तेजोयशस्वी स्थविरंप्रतीकम् समिद्धम्
अनाहतस्यंवसनंजरिष्णु परीतंवाज्यजिनं दधेहम् एतिमन्त्रेण मेखलां ब्राह्मणः रौरवंक्षत्रि
यः मैमचर्म्मवैश्यः परिदध्यात् अथाचार्य्यः पादादिकेशप्रमाणं स्ववर्णोक्तं पालाशं वैल्वोदु
म्बरजातं दण्डंतत्तद्वर्णाय माणवकाय प्रयच्छति सचमन्त्रेणादत्ते ओमेदण्डइति प्रजापतिऋ
षि अनुष्टुप्छन्दो दण्डोदेवता दण्डग्रहणेविनियोगः ॐ ओमेदण्डः पराप्तेहेमयोधिभू
म्याम् तमहंपुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चसाय इतिप्रतिगृह्य मन्त्रेण कुर्यात्
उच्छ्रयस्वेति प्रजापतिऋषिर्अनुष्टुप्छन्दो दण्डोदेवता दण्डोच्छ्रयणेविनियोगः ॐ उच्छ्र
यस्व वनस्पतऊर्द्ध्वमापाह्यथ हृतः अस्यमज्ञस्योदृचः अथा चाप्योद्भिःस्वमञ्जलि
मापूर्य्य तेनमाणवकाञ्जलिमापूरयति मन्त्रैः आपोहिष्ठेत्यादि तिसृणांसिन्धुद्वीपऋषि
र्गायत्रीछन्दो आपोदेवताः माणवकाञ्जलिपूरणेवि० ॐ आपोहिष्ठामयोभुव स्तान
ऊर्जेदधातनः महेरणायचक्षसे १ ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः उशती
रिवमातरः २ ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनः ३
अथाचार्य्यो माणवकं प्रतीमूर्द्धमुदीक्ष्य स्वेति पैजंददाति माणवकः मूर्द्धमुदीक्ष्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नम्भालिस्थे जलंसूर्य्यायप्रक्षिप्योर्द्ध्वाहु। रादित्यमुपतिष्ठते अनेनमन्त्रेण तच्चक्षुरिति
दध्यङ्ङाथर्वणऋषिः त्रिष्टुप्छन्दः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः ॐ तच्चक्षुर्देवहि
तम्पुरस्ता च्छुक्रमुच्चरत्पश्येमशरदः शतञ्जीवेमशरदः शतं शृणुयामशरदः शतम्प्रब्रवा
मशरदः शतमदीनाः स्याम्शरदः शतम्भूयश्चशरदः शतात् अथाचार्य्योमाणवकस्य
दक्षिणांसोपरिस्वदक्षिणाहस्तंनीत्वा हृदयमालभेत अनेनमन्त्रेण ममव्रतेतइतिप्रजा
पतिऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता हृदयालम्भने वि० ॐ ममव्रतेते हृदयन्दधामि
ममचित्तमनुचित्तं तेस्तु ममवाचमेकमनाजुषस्व बृहस्पतिस्त्वानियुनक्तुमह्यम् इति अथा
चार्य्योमाणवकस्य निरङ्कुंदक्षिणाहस्तं गृहीत्वा कोऽ नामासीत्याह वटुः अमुक
शर्म्माहंभोः इतिप्रत्याह पुनराचार्य्यो माणवकंपृच्छति कस्यब्रह्मचर्य्यसि भवतः
इतिमाणविकोवदेत् भवतइत्युच्यमाने ॐ इन्द्रस्यब्रह्मचार्य्यस्मिन्नाचार्य्य स्तवाह
माचार्य्यस्तवः अमुकशर्म्मन् इतिवटुनामोदेशान्तमुक्त्वा अथैनंभूतम्भः परिददाति
तत्रमंत्रः ॐ प्रजा पतेस्त्वापरिददामि देवानांत्वासवित्रे परिददाम्यद्भ्यस्त्वोमधीभ्यः
परिददाम्यग्निकृपे इति अथकुमारोऽग्निंप्रदक्षिणंपरीत्य आचार्य्यस्योत्तरतउपवि
शति अथाचार्य्यो ब्रह्मोपवेशनादि पर्य्युक्षणान्तं कर्म्मकृत्वा समुद्भवनामाग्निंसं
स्थाप्य एतन्तइतिप्रतिमृष्य ॐ भूर्भुवः स्वः समुद्भव नामाग्ने स्त्वप्रतिष्ठितोभव तद

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाग्निरीति ध्यानावाहनादिनी राजनान्तं सम्पूज्य देवताभिध्यानं करोति अद्येहामुकोहं
अमुकगोत्रो रूपनयन कर्म्मणाद्यक्षे तत्र प्रजापतिमिन्द्रमग्निं सोममग्निवायुं सूर्य्यम
ग्नी वरुणावग्नि वरुणावग्निं वरुणं सवितारं विष्णुं विश्वान्देवान् सर्वान् वरुणमदितिं
प्रजापतिं स्विष्टकृतं चाज्येनाहुत्यक्षे एतद्धोमद्रव्यं तत्तद्देवताभ्यो मया परित्यक्तं ॐ
तत्सत्यं यथा देवतमस्तु इत्याघारावाज्यभागौ कृत्वा भूरादिनवाहुतिहोमे स्विष्टकृतं च
कृत्वा संभवप्राशनम् प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानम् अद्येहामुकोहं अमु
करणोः पुत्रस्य उपनयनाङ्गहोमकर्म्मणः साङ्गतार्थं अपूर्णपूर्णार्थं च इदं पूर्णपा
त्रं सकवर्णं ब्रह्मन्तुभ्यं सम्प्रददे इति दद्यात् अथाचार्य्यो वटुं संशास्ति शिक्षयती
त्यर्थः यथा ब्रह्मचारी असि इत्याचार्य्यो वदेत् आसानि इति वटुः कर्म्मकृत् करवा
णि भादिवासमुष्ठाः वस्त्रपामि वार्वयच्छ अच्छानि समिधमादधि आदधानि
इति अथ देवज्ञो बोधितदीक्षानिमित्तं लग्नदानं कुर्य्यात् अद्येहामुकोहं अमुकगोत्रोः
अस्मपुत्रस्य सावित्रीग्रहणलग्नात् अमुकस्थानास्मितेन अमुकग्रहेण सूचितारि
ष्टनिवृत्तिद्वारा शुभफलप्राप्तये ग्रहाणां प्रीतये इदं सकवर्णं सुवर्णनिष्क्रयीभूतं द्रव्यं
वा देवज्ञाय ब्राह्मणाय अहं ददे ॐ तत्सत्यमम इति अथ आत्मे सावित्रीमन्वा होतार
तोग्नेः प्रत्यङ्मुखोपविष्टाम् सकप्रसन्नाम् गुरुं समीक्षमाणाम् गुरुणा समिद्धिना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

य दक्षिणातस्तिष्ठन् आसीनायवा स्वयं पूर्वाभिमुखोगुरुः अयवटुः फलपुष्पादिभिर्गुरोः पा
दांउपसंगृह्णीयात् गीतवादित्रैर्वजायमाने व्यस्तहस्ताभ्यां दक्षिणाहस्तेन दक्षिणांपादं वाम
हस्तेनवामंपादंगृहीत्वा अमुकगोत्रो अमुकप्रवरो अमुकवेदान्तर्गता मुकशाखाध्यायी अ
मुकशर्माहं भोगुरोत्वामभिवादये इत्येतदुपसङ्गृह्णां नामगुरुस्य आयुष्मान्भवसौम्यामुक
शर्मन्भो इत्याशिषंप्रयुञ्जीत ततः सावित्रीदानम् गायत्र्याविश्वामित्रऋषि गायत्रीछं
दः सवितादेवता सावित्रीदानेविनियोगः इत्यार्षादिकंस्मृत्वा प्राणायामादिकंकृत्वा पूर्वां गाय
त्रींपच्छोवूयात् तद्यथा ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं इतिप्रथमंवारं ॐ भूर्भुवः स्वः त
त्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि इतिद्वितीयंवारं ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्य
भर्गोदेवस्य धीमहिधियोयोनः प्रचोदयात् ॐ इतितृतीयंवारं सर्वांगायत्रीं प्रतिब्रूया
त् इतिब्रह्मगायत्री क्षत्रियायत्रिष्टुप्छंदस्कां बृहस्पतिदेवतां सवितृदेवतां दे
वस्यसवितुरित्यादिकामृचंब्रूयात् ॐ देवस्यसवितुर्भर्गमामवश्विश्व देव्यम् धि
याभगम्भनामहे इतिक्षत्रियगायत्री वैश्यायजगतीछंदस्कां विश्वाहपाणीति ऋ
चंब्रूयात् ॐ विश्वाहपाणि प्रतिमुञ्चतोकविः प्रासावीद्भद्रं द्विपदेचतुष्पदे विनाक
मुष्मत्सवितावितारीदो उप्रयाणमुखस्योषिराजानि इतिवैश्यगायत्री ततोब्रह्मचा
रीस्वाचार्यायवरंदद्यात् अद्यहअमुकराशि अमुकशर्मा अमुकवर्मा अमुकगुप्ता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा अग्रहं क्रतेनतद्ब्रह्मचारीग्रहणकर्मणः साङ्गुष्ठाभ्यां दर्भकूर्चं मग्निदैवतं वारुपेणाचार्याय तु
भ्यं सम्प्रददे इतिसंकल्प्य गुरोः पादयोः प्रणिपत्य समर्प्येत गुरुरप्याशीर्भिरभिनंद्य ततो
ब्रह्मचारी कालोपस्थितां मध्याह्नसंध्यामुपास्य समिधादानंकुर्यात् तत्रोपकल्पनीयानि
वस्तून्यासादयेत् इन्धनंपञ्चधात्रिधावाविभक्तम् पर्युक्षणार्थमुदकम् समिधस्तिस्रः
होमार्थं कुशरिन्धनवारिणी ततोब्रह्मचारीअग्नेः पश्चादुपविश्य प्रथमतोग्निं पञ्चभिर्म
न्त्रैः सन्धक्षयति पाणिनाग्निं परिसमूहयति समृद्धीकरोतीत्यर्थः पाणिनेति स्रुवादर्नि
रासः अग्नेसक्रवदुत्यादीनां पञ्चानांब्रह्माऋषिर्गायत्रीछन्दः अग्निर्देवतापरिसमू
हनेवि० ॐ अग्नेसक्रवसक्रव सम्भाकुरु १ ॐ यथात्वमग्नेसक्रवसक्रवाऽसि २ ॐ
एवम्माश्च सक्रवसोश्रवसंकुरु २ ॐ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाऽसि ४ एव
महंमनुष्याणां वेदस्यनिधिपोभूयासं स्वाहा इत्यग्निंपरिसमूह्य ततः उपकल्पितो
दकेन प्रदक्षिणमग्निं पर्युक्षोत्थाय अग्नयइतिमन्त्रेणसमिधमादधाति अग्नयइतिप्र
जापतिर्ऋषिः पङ्क्तिश्छन्दः समिद्देवतासमिधादानेवि० ॐ अग्नयेसमिधमाहार्षं बृह
ते जातवेदसे यथात्वमग्नेसमिधासमिध्यस एवमहमायुषा मेधयावर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन समिन्धेजीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्वर्चा
स्वी तेजस्वी ब्रह्मवर्चस्यन्नादोभूयासं स्वाहा इत्येकांसमिधमादाय घृताक्तांकृत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दक्षिणाकर्णं स्पृष्ट्वा जुहुयात् एवं द्वितीयां तृतीयां च समिधं होमयित्वा ततः स्रुचीमुपवि
श्य पूर्ववत् अग्नेस्तन्वं इत्यादि पञ्चभिर्मन्त्रैः परिसमूहनं उपकल्पिताभिरद्भिः प्रदक्षि
णं पर्युक्षणं च विधाय स्रुचीं पाणौ प्रतप्य भुवं विमृज्य यथा तनूपाऽग्ने इत्यादीनां
बृहदेवाकृतयो यजुश्छन्दोऽग्निर्देवता मुखमार्जने विनियोगः ॐ तनूपाऽग्ने सितन्वं
मे पाहि ॐ आयुर्दाऽग्ने स्वायुर्मे देहि ॐ वर्चोदाऽग्नेऽसि वर्चो मे देहि ॐ अग्नेऽग्
न्मे तन्वोऽकर्तं तन्मऽआपृण ॐ मेधां मे देवः सविताऽआदधातु ॐ मेधां देवी सरस्वती
आदधातु ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं
ललाटाद्यं चुकपर्यन्तं भुवं प्रोञ्छति ततः प्रङ्गानि च मऽआप्यायन्तां इति वाहु
भ्यां सर्वाङ्गं मार्जयेत् शिरसऽआपादम् वाक्च मऽआप्यायताम् इति मुखे प्राणश्च म
ऽआप्यायताम् इति नासिकायाम् ॐ चक्षुश्च मऽआप्यायताम् इति नेत्रयोः श्रो
त्रं च मऽआप्यायताम् इति श्रोत्रयोः यशो बलञ्च मऽआप्यायताम् इति वाहोः च
ङ्गालम्भननिमित्तकं उदकस्पर्शः ततोऽनामिकया अग्नेः भस्म गृहीत्वा आयुरंकु
रुते आयुरमिति नाराजनाकृतिं यजुश्छन्दोऽग्निर्देवता आयुरंकरणे विनियोगः
ॐ आयुर्जमदग्नेः इति ललाटे कश्यपस्य आयुरम् इति ग्रीवायाम् अङ्गिरसां
आयुरम् इति दक्षिणांसे तन्नो अस्तु आयुरम् इति हृदि अथाग्न्यभिवादनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमुकगोत्रो अमुकप्रवरो यजुर्वेदान्तर्गता मुकशाखाध्यायी अमुकशर्माहं भो अग्रेनत्वां
अभिवादये ततो व्यस्तपाणिभ्यां गुरोः पादावुपसंगृह्णीयात् यथादक्षिणेन पाणिना द
क्षिणं पादं वामेन वामं पादं गृहीत्वा अमुकगोत्रो अमुकप्रवरो यजुर्वेदान्तर्गता मुकशा-
खाध्यायी अमुकशर्माहं भो गुरो त्वामभिवादये इतिवाक्यमुक्त्वा शिरसाभिवादयेत्
अभिवादितो गुरुस्तं आयुष्मान्भव सौम्यामुकशर्मन् इत्याशिषमदद्यात् इतिशुक्लवेद
नविधाय अन्यानप्यभिवादयेत् केचित् अभिवादनात्पूर्वं सन्ध्योपासनमामनन्ति
तत्र ब्रह्मचारी सन्ध्यामुपास्याग्निकार्यं गुरूपसङ्करणं वृद्धजनमस्कारं च कृत्वा
भिक्षार्थं गच्छेत् नदुक्तमाक्षवल्क्येन गुरुश्चैवाप्युपासीत स्वाध्यायार्थं समाहितः
आकृतस्याप्यधीयीत नचैवास्मै निवेदयेत् आदिमध्यावसाने च भवच्छब्दोपलक्षि
ता ब्राह्मणक्षत्रियविशां भैक्षचर्याणि यथाक्रमम् इति सूत्रेण भवत्पूर्वा ब्राह्मणाभि
क्षेत भवन्मध्याश्च राजन्यो भवदन्त्यां विशः तिस्रो प्रत्याख्यायिनः मरुद्भ्यश्च
परिमितावा मातरं प्रथमाम् इति तत्रक्रमः भिक्षापात्रं स्कन्धेऽवलम्ब्य भवतिभिक्षां
देहि मातः इति ब्राह्मणो वा वेत भिक्षां भवति देहि मातः इति राजन्यस्य देहि भिक्षां
भवति मातः इति वैश्यस्य ब्राह्मणोदत्तां भिक्षां ॐ स्वस्तीत्युक्त्वा प्रतिगृह्य आचार्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनिवेदयेत् भोगुरो इमं भिक्षामयाचन्ध्या इतिनिवेद्य आत्मभोजनार्थं स्वीकुर्य्यात् इति
भिक्षा वरणम् गायत्र्यमृतेन जपित्वा मन्त्रांविदध्यात् लोपत्वजुतंजपेत् इति नेतोहो
मदक्षिणा अद्य हामुकोहं अमुकगोत्रपुत्रस्योपनयनाङ्गं होमकर्म्मणः साङ्गुण्यार्थं
इदंकृच्छ्रवर्णं वरूपेण आचार्य्यामतुभ्यं सम्प्रददे ॐ तत्सत् इतिदत्वा आशिषंप्रतिगृह्णी
यात् इत्युपनयनम् अथवेदारम्भप्रयोगः आचार्य्योवेदारम्भवेदीसमीपमागत्योप
विश्याचम्य गणेशंनमस्कृत्य पञ्चभूसंस्कारपूर्वकमग्निस्थापनंविधाय अर्घ्यं
संस्थाप्य ब्रह्मोपवेशनादि पर्य्युक्षणान्तं कर्म्मकृत्वा संकल्पंकुर्य्यात् अद्येहेत्या
दि अमुकगोत्रस्यवटोः अद्यवेदादिक्रमेण वेदारम्भंकरिष्ये इतिप्रतिज्ञाय श्रुवेण
मध्यदीर्घाकारा कुतीरित्य न्तांविधाय अग्निं प्रति मृष्ट्वा एतन्नइत्यादि ॐभूर्भु
वः स्वः हरिनामाग्ने स्वप्रतिष्ठितोवरदोभव तेदवाग्निरितिमन्त्रेण ध्यानादिनीरा
जनान्तंसम्पूज्य दक्षिणांजान्वाच्य ब्रह्मणान्वारब्धोमसाप्रजापतिंध्यात्वाद्रव्य
त्यागसंकल्पः अद्येह अस्मद्वटोः वेदारम्भकर्म्मणाहंवक्ष्ये तत्रप्रजापतिमिन्द्र म
ग्निं सोममन्तरिक्षंवायुं ब्रह्माणं छंदांसि प्रजापतिं देवान् ऋषीन् श्रद्धांमेधां
सदस्पतिमनुमतिमग्निं पावकं सूर्य्यं अग्निवरुणावग्निं वरुणावग्निं वरुणंसावि
तारं विष्णुंविश्वान् मरुतः स्वर्कान् वरुणमदितिं प्रजापतिंत्रिष्टुभं चाज्येनाहं

राम:
६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञे आघारावाज्यभागौ कृत्वा ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वाहा इदमिन्द्राय
ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय अथ यजुर्वेदाहुतयः ॐ अन्तरि
क्षाय स्वाहा इदमन्तरिक्षाय ॐ वायवे स्वाहा इदं वायवे ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॐ
छन्दोभ्यः स्वाहा इदं छन्दोभ्यः ॐ प्रजापतये स्वाहा इदं प्र॰ ॐ देवेभ्य स्वाहा इदं देवेभ्यः ॐ
ऋषिभ्यः स्वाहा इदं ऋषिभ्यः ॐ श्रद्धाये स्वाहा इदं ॐ मेधाये स्वाहा इदं मे॰ ॐ सद
सस्पतये स्वाहा इदं स॰ ॐ अनुमतये स्वाहा इदमनुमतये अथ ऋग्वेदाहुतयः ॐ पृथि
व्यै स्वाहा इदं पृथिव्यै ॐ अग्नये स्वाहा इदमग्नये इति ह आहुति ब्रह्मणे छन्दोभ्य इ
त्यादयो नवाहुतयः पूर्ववत् अथ सामवेदाहुतयः ॐ दिवे स्वाहा इदं दिवे ॐ सूर्याय
स्वाहा इदं सूर्याय इति ह ब्रह्मणे छन्दोभ्य इत्यादयो नव पूर्ववत् अथाथर्ववेदाहु
तयः ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यः ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे इति ह ब्रह्मणे
छन्दोभ्य इत्यादयो नव पूर्ववत् ततो भूरादिनवाहुतिहोमं स्विष्टकृतं च कृत्वा संस्रव
प्राशनमृ पवित्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानसंकल्पः अद्य
हामुकोहं अमुकगोत्रस्य पुत्रस्य वेदारम्भाङ्गहोमकर्मणः साङ्गफलप्राप्तये अ
पूर्णापूर्णाद्य इदं पूर्णपात्रं सक्तपर्णं ब्रह्मन्तुभ्यं सम्प्रदे इति दद्यात् ब्रह्मा च अक्र
न्कर्मणि मन्त्राभिमंदद्यात् अथ वेदारम्भकर्मः यथा अद्य हामुकोहं अमुकग

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेणोः वेदारम्भकर्म्मणः पूर्वाङ्गत्वेन गणेशादीनां स्थापनं आवाहनं पूजनं करिष्ये तासु
स्थाल्यादौ रक्षतां गृहीत्वा उत्तरपृष्ठे स्थापयेत् ॐ भूर्भुवः स्वः गणेश इहागच्छ इह
तिष्ठ पूजार्थं त्वामावाहयामि ॐ भूर्भुवः स्वः विष्णो ॐ भूर्भुवः स्वः सरस्वति ॐ भूर्भुवः
स्वः लक्ष्मि ॐ भूर्भुवः स्वः स्वविद्यासूत्रकार कात्यायन एतन्नश्रुतिप्रतिपाद्य नाम
मन्त्रेण ध्यानादि नीराजनान्तं सम्पूज्य ततो ब्रह्मचारिणो वेदमध्यापयेत् यथा अग्नि
रुत्तरतो ब्रह्मचारिणमुदङ्मुखं प्राङ्मुखं वा प्रागग्रेषु कुशेषूपविश्य स्मार्त्तोपनयनं
प्राणायामं च ब्रह्माञ्जलिं कारयित्वा महाव्याहृतिपूर्वं ॐकारपूर्वं त्रिवारं गायत्रीं
पठित्वा सावेदारम्भं कुर्यात् तत्र यजुर्वेदारम्भे विनियोगः ॐ इमे त्वा नियुत्वन्तः स्वाहान्तस्य
माध्यन्दिनीयकस्य वाजसनेयकस्य विवस्वान् ऋषिः गायत्र्यादीनि सर्वाणि छन्दां
सि सर्वाणि यजूंषि सामानि प्रतिलिंगोक्तदेवता यजुर्वेदारम्भे विनियोगः ॐ हरिः
ॐ भूर्भुवः स्वः ॐ इषे त्वोर्जे त्वा वायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मणः आप्यायध्वमघ्न्याः इन्द्राय भागम् प्रजापतिरनमीवाः अयक्ष्मा मा वस्तेन
ईशतमाघशंसोध्रुवाः अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॐ व
सोः पवित्रम् इति स्वे त्वारम्भं कारयित्वा अध्यात्मादीन्यृतिवृत्तात् ॐ कृण्वोसि २
समिधाग्निम् २ एदम् ४ अग्नेस्तनूः ५ देवस्त्वा ६ वाचस्पतये ७ उपयामगृ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हीतोसि ८ देवसवितः ९ अपोदेवाः १० युञ्जानः प्रथमम् ११ दृशानोरुक्मः १२ मयिगृह्णामि १३
ध्रुवक्षितिर्ध्रुवयोनिः १४ अग्निजातान् १५ नमस्ते १६ अग्नयेमन्यूंश्च १७ ध्वाजस्य १८ स्वाहा
त्वा १९ अत्रस्मयोनिः २० इमेम्म २१ तेजोसि २२ हिरण्यगर्भः समम् २३ अग्न्यस्मृपरः २४
आदन्दद्भिः २५ अग्निश्च २६ समारत्वा २७ होताजसात् २८ समिद्धो अग्नम् २९ देवसवि
तः ३० सहस्रशीर्षापुरुषः ३१ तेदव ३२ अस्याजरानः ३३ यज्जाग्रतः ३४ अपेतः ज
लस्यग्रः विलोवास्मरणम् ३५ ऋचंवाच ३६ देवस्यत्वा ३७ देवस्यत्वा ३८ स्वाहाप्रा
णेभ्यः ३९ ॐ इशावास्यमिद ४० सर्वंयत्किञ्च जगत्यांजगत् तेनत्यक्तेनभुञ्जीथामा
गृधः कस्यस्विद्धनम् ४० ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितंमुखम् योसावादि-
त्ये पुरुषः सोसावहम् इतिमन्त्रैर्वेदारम्भः अथऋग्वेदादिमन्त्रस्य प्रजापतिर्ऋषि
गायत्रीछन्दो निर्देवता स्वाध्यायविनियोगः ॐ अग्निमीलेपुरोहितं यज्ञस्यदेवमृ
त्विजम् होतारंरत्नधातमम् इतिऋग्वेदारम्भः अथसामवेदादिमन्त्रस्य गौतमऋषि
गायत्रीछन्दो निर्देवता स्वाध्यायविनियोगः ॐ अग्नऽआयाहिवीतये गृणानोहव्य
दातये निहोतासत्सिबर्हिषि इतिसामवेदारम्भः आन्नोदेवीरिति दध्यङ्ङाथर्वण ऋ
षिर्गायत्रीछन्दो निर्देवतास्वाध्यायविनियोगः ॐ आन्नोदेवीरभिष्टयऽआपोभवन्तु
पीतये शंयोरभिस्रवन्तुनः इत्यथर्ववेदारम्भः पुनः पूर्ववत् महाव्याहृतिप्रणवपू

Kirtikant Sharma Collection, Nalagarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्भिकौ गायत्रीं त्रिरुक्त्वा ॐ विरामोस्तु इति वदन्तं गुरुं शिष्यः पादोपसङ्ग्रहणपूर्वकं प्रणम्य
विरमेत् अधीत्य निराकरणमन्त्रान्पठेत् अधीत्याधीत्याधीत्य निराकरणम् प्रतीक
मेवियमणं जिह्वामेमधुमत्तमः कर्णाभ्यां भूरिविश्रुवं मात्याहार्षीः श्रुतं मयि ॐ
ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोसि समिरसि शान्तिरस्यनि
ष्टस्य निराकरणमसि ब्रह्मकोशोम्भिवि वाचात्वयि दधामि तिष्ठ प्रतिष्ठ करण इत्यो
कृपकरालो रस्यग्रहश्च राधारणो धारणशक्तिर्मयि भवत्या प्यायन्तु मेङ्गानि वाक्प्रा
णचक्षुः श्रोत्रं अक्षोवलं अन्मेश्रुतमधीतन्तन्मे मनसि तिष्ठतु तिष्ठतु ॐ मृ इति त्रया
चारात् अस्मिन्वसे वर्षं पाठ्यं वाराणसीं प्रति प्रस्थापयन्ति वेदानां ग्रहणे सूत्रम्
अष्टचत्वारिंशदाब्दानि वेदब्रह्मचर्यं चेत् द्वादशद्वादशवा प्रतिवेदं आवग्रहणं
वेति अध्ययननियमाः आचार्येणाहूतोऽधीयीत शयानं चेदासीनः आसीनं चेत्ति
ष्ठन् तिष्ठन्तं चेदभिधावन् अभिधावन्तं चेदभिक्रामन् गुरुमेवं वर्त्तमानो ब्रह्मचारी
ब्रह्मभूयाय कल्पते इति अथ दक्षिणार्थं संकल्पः अद्येहामुकोहं अमुकशर्मणोप
वेशः वेदारम्भहोमकर्मणः वेदारम्भकर्मणश्च साङ्गतासिद्ध्यर्थं साङ्गुण्यार्थं च
इदं कृष्णमग्निं देवतं वरूपेणाचार्याय तुभ्यं सम्प्रददे इति दद्यात् आचार्या
स्वाशिषं दद्यात् इति वेदारम्भविधिः अथ समावर्त्तनविधिः अथ स्नातको वरूपेण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गवादिकमाचार्य्यायदद्यात् तत्रसंकल्पः अद्येहमुकोऽहं स्नातकत्वाधिकारसिद्धये
सांगांगोप्रत्याम्नायीभूतंसुवर्णंवा आचार्य्यायतुभ्यंसम्प्रददे इतिगुरवेदत्वा भो
गुरो अहं स्नास्ये इतिसम्प्रार्थ्य स्नाहिइतिलब्धानुज्ञः स्नायात् अत्रस्नानादौ ब्रह्म
चार्य्येवाधिकारी स्नायादितिकर्त्तरि प्रत्ययविधानात् अथाचार्य्यः समावर्त्तनवे
दीसमीपमागत्य उपविश्य तत्रपञ्चभूसंस्कारपूर्वकमग्निंसंस्थाप्य प्रतिज्ञासं
कल्पं कुर्य्यात् अद्येह अमुकोऽहं अमुकगोत्रस्यवटोः स्नातकत्वसिद्धये समाव
र्त्तनकर्म्मकरिष्ये इतिसंकल्प्य ब्रह्मोपवेशनादि पात्रासादनान्ते विप्रोमोपकल्प
नीयानि वस्तून्यासादयेत् तानिच अग्निकार्य्ये इन्धनंपञ्चधाविभक्तम् पर्य्यु
क्षणार्थमुदकम् समिधस्तिस्रः पुनरिन्धनवारिणी हरिताः कुशाः स्नानाधिकरण
भूताः सर्वौषधिमिश्रित तीर्थवारिपूर्णा अश्वोकुम्भाउदकसंस्थाः मृत्योपस्था
नार्थंवस्त्रम् भोजनार्थंदधितिलाः सौवर्णमंगापित स्नानार्थंवारि औदुम्बरं दन्त
धावनम् उत्सादनीयमुन्नमुदकम् चन्दनम् अहतेवाससी पुष्पमाल्यानीरोचनम्
कज्जुकादीनि परिधानवस्त्राणि कर्णावेष्टन हस्तभूषण मुद्रिकादीनिभूष
णानि अञ्जनमादर्पणम् नूतनम् छत्रम् उपानहौ वेणवो दण्डः सहस्रधारावि
नि ततः पवित्रच्छेदनादि पर्य्युक्षणान्तं कर्म्मकृत्वा राजपुत्रनामाग्निंस्थापयेत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतन्तद्इत्यादि ॐ भूर्भुवःस्वः राजपुत्रनामाग्नेस्तप्रतिमिति वरदेभव तेदेवाग्निरित्यादिभि
र्ध्यानावाहनपाद्यादिनी राजनाम्नं सम्पूज्य दक्षिणांजान्वाज्य ब्रह्मणान्वारब्धोमन
साप्रजापतिंध्यात्वा आघारावाज्यभागौकृत्वा वेदारम्भवत्प्रधानकृतिंजुहुयात् द्रव्य
त्यागंकुर्य्यात् अथ हस्तवटोः समावर्तनकर्म्मणाहंवक्षे तत्रप्रजापतिमिन्द्रम
ग्निं सोमं अन्तरिक्षंवायुं ब्रह्माणं छंदांसि प्रजापतिं देवान् ऋषीन् श्रद्धांमेधां
सदस्पतिमनुमतिं पृथिवीमग्निं दिवंसूर्य्यंदिशश्चन्द्रमसं अग्निवायुंसूर्य्यं अग्नि
वरुणावग्निवरुणावग्निं वरुणंसूर्य्यं सवितारं विष्णुंविश्वान्मरुतः स्वक्लान्वरुण
मदितिं प्रजापतिंविश्वकृतं चाज्येनाहंवक्षे इदमाज्यंतत्तेदेवताभ्यो ममापरि
त्यक्तंयथादेवतमस्तु ॐ प्रजापतयेस्वाहा इदंप्रजापतये ॐ इन्द्रायस्वाहा इदमि
ॐ अग्नयेस्वाहा इदमग्नये ॐ सोमायस्वाहा इदंसोमाय अथयजुर्वेदाहुत
यः ॐ अन्तरिक्षायस्वाहा इदमन्तरिक्षाय ॐ वायवेस्वाहा इदंवायवे ॐ ब्रह्म
णेस्वाहा इदंब्रह्मणे ॐ छन्दोभ्यः स्वाहा इदंछन्दोभ्यः ॐ प्रजापतयेस्वाहा-
इदं प्रजापतये ॐ देवेभ्यः स्वाहा इदंदेवेभ्यः ॐ ऋषिभ्यः स्वाहा इदंऋषिभ्यः
ॐ श्रद्धायैस्वाहा इदंश्रद्धायै ॐ मेधायैस्वाहा इदंमेधायै ॐ सदसस्पतयेस्वा
हा इदंसदसस्पतये ॐ अनुमतयेस्वाहा इदमनुमतये अथऋग्वेदाहुतयः ॐ

एमः
७१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ पृथिव्यै स्वाहा इदं पृथिव्यै ॐ अग्नये स्वाहा इदमग्नये इति द्वे आहुती ब्रह्मणो छन्दोभ्य
इति नवपूर्ववत् अथ सामवेदाहुतयः ॐ दिवे स्वाहा इदं दिवे ॐ सूर्याय स्वाहा इदं सूर्या
य इति द्वे आहुती ब्रह्मणे छन्दोभ्य इत्यादि मानवपूर्ववत् अथाथर्ववेदाहुतयः ॐ
दिग्भ्यः स्वाहा इदं दिग्भ्यः ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे इति द्वे ब्रह्मणो छन्दोभ्य इ
त्यादि मानवपूर्ववत् ततो भूरादिनवाहुतिहोमं स्विष्टकृतं च कृत्वा सम्भवप्राशनं पवि
त्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानसंकल्पः अद्येत्यादि अमुकोहं
अमुकगोत्रोऽस्यवेदोक्तसमावर्तनाङ्गहोमकर्मणः साङ्गफलप्राप्तये अपूर्णपूर्णार्थं
च इदं पूर्णपात्रं सक्तवर्णं ब्रह्मन्तुभ्यं सम्प्रददे अक्रन्कर्मेति मन्त्रपाठः ततो ब्रह्म
चारी अग्नेस्क्षत्रवदित्यादिमन्त्रैः अग्निषु परिसमूहनं कुर्यात् अग्नेस्क्षत्रवदित्या
दीनां पञ्चानां ब्रह्मा ऋषिः जगच्छन्दोऽग्निर्देवता अग्निपरिसमूहने विनियोगः
ॐ अग्नेस्क्षत्रवस्क्षत्रवसम्भाकुरु १ ॐ यथात्वमग्नेस्क्षत्रवस्क्षत्रवाऽसि २ ॐ
एवमाछ स्क्षत्रवसोत्रवसं कुरु २ ॐ यथात्वमग्नेयज्ञस्यनिधिपाऽसि ४ ॐ ए
वमहमनुष्याणां वेदस्यनिधिपो भूयासछ स्वाहा प्रदक्षिणमग्निं पर्युक्षोत्थाय
एकां समिधमादायाति ऋ अग्नये समिधमिति प्रजापतिर्ऋषिः राक्षतिश्छन्दः
समिद्देवता समिधादाने विनियोगः ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथात्वमग्नेसमिधासमिध्यस एवमहमायुषा मेधयावर्चसा प्रजयापशुभिर्ब्रह्मवर्चस-
मिन्धेजीवपुत्रोममा चार्य्यो मेधाव्यहमसानिराकरिष्णु यशस्वी तेजस्वी ब्रह्मवर्च
स्यन्नादोभूयासम् स्वाहा इतिमन्त्रेणादक्षिणाकर्णंस्पृष्ट्वा होमयेत् एवंद्वितीयातया
तृतीयांचसमिधंहोमयित्वा उपविश्य अग्नेस्तृणवद्भ्रात्यादिपञ्चभिर्मन्त्रैः पूर्ववत्परि
समूहनं पर्य्युक्षणंचविधाय तूष्णींपाणीप्रतप्य मुखंविमृज्य ॐ तनूपाऽअग्नेसितन्वं
मेपाहि ॐ आयुर्दाऽअग्नेस्मायुर्मेदेहि ॐ वर्चोदाऽअग्नेसिवर्चोमेदेहि ॐ अग्ने
यन्मेतन्वाऽऊनंतन्मऽआपृण ॐ मेधाम्मेदेवःसविताऽआदधातु ॐ मेधांदेवीसर
स्वतीऽआदधातु ॐ मेधामश्विनौदेवावाधत्तामुष्करस्रजौ इतिप्रतिमन्त्रंलल्लाट
दाक्षिणकपर्य्यन्तं मुखंप्रोञ्छति ततः अङ्गानिचमऽआप्यायन्ताम् इतिशिरसश्चा
पादमङ्गान्यालभेत् ॐ वाक्चमऽआप्यायतामितिमुखम् ॐ प्राणाश्चमऽआप्याय
ताम् इतिनासिकाभ्याम् ॐ चक्षुश्चमऽआप्यायताम् इतिचक्षुषी ॐ श्रोत्रंचमऽआ
प्यायताम् इतिश्रोत्रे ॐ अंसौबलञ्चमऽआप्यायताम् इतिबाहू ततउदकस्पर्शः
अथानामिकयाग्नेर्भस्मगृहीत्वा आयुष्माणिकुरुते ॐ आयुष्मज्जमदग्नेः इति
ललाटे ॐ कश्यपस्यआयुषम् इतिग्रीवायाम् ॐ अत्रेरायुषम् इतिदक्षि
णांसे ॐ तन्नोऽअस्तुआयुषम् इतिहृदि ॐ आयुषमितिसर्वमन्त्रेणसर्वाङ्गे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथाभ्यभिवादनम् व्यस्तपाणिभ्यांकार्य्यम् अमुकगोत्रो अमुकप्रवरो अमुकवेदान्त
गताऽमुकशाखाध्यायी अमुकशर्म्माहं भो अभिवादये इत्यग्निमभिवाद्य ततः
कर्णौस्पृष्ट्वा गृह्णीयात् व्यस्तपाणिभ्यां अमुकगोत्र इत्यादि पूर्ववदभिवादनवाक्यमुक्त्वा
भागुरी त्वामभिवादये इति गुरुमभिवादये गुरुश्च आशीर्भिरभिवाद्य सोमश्चामुकशर्म्मन्
इत्याशिषमं ददाति अथ परिश्रितः स्थण्डिलस्तरणः कुम्भानां पुरस्तात् प्राग्गाग्रान्कुशानास्तीर्य
तेजस्वी संस्थितो ब्रह्मचारी प्राङ्मुखोदङ्मुखकर्म्माणि भवन्तीति न्यायात् दक्षिण
स्यां प्रथमत्वं सूत्रकारेणोपात्तं तस्मादित्येवं क्रमेण प्रथमादुदकुम्भा दपश्चादन्ते अन
नमन्त्रेण अपस्पंतरिति प्रजापतिर्ऋषिः अनुष्टुप् छन्दः आपोदेवता आपामादाने विनियोगः
ॐ अपस्पंतरनयः प्रतिगृह्णाऽउपगृह्णो मधुरवामनोहास्यवलो विमृजस्तनूदुज
रिन्द्रियहान्तान्विजहामियो रोचनस्तमिगृह्णामि इति प्रथमोदककुम्भा दक्षिणाङ्गु
लेन आपोगृहीत्वा आत्मानमभिषिञ्चति मन्त्रेण तेनेति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः
आपोदेवता आत्माभिषेचने विनियोगः ॐ तेनाभिषिञ्चे तेनमामभिषिञ्चामि श्रियै
यशसे ब्रह्मणे ब्रह्मवर्चसाय इति १ अथ द्वितीयोदककुम्भात् पूर्ववत्पस्पंत
रितिजलादानम् आत्माभिषेचने मन्त्रविशेषः येनेति प्रजापतिर्ऋषिः अनुष्टुप् छन्द
आपोदेवता आत्माभिषेचने विनियोगः ॐ येनश्रियमकृण्वतां येनावमृ ताऽकुरु
मृ येनाक्षावभ्यषिञ्चतां तेन दातदभिषिञ्चामि इति अथ तृतीयोदककुम्भात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेसंतरिति पूर्ववदपोगृहीत्वा आपोहिष्ठेत्यादिति मृणांसिन्धुद्वीपकृमि गायत्रीछंदः
आपोदेवता अभिमंत्रणे विनियोगः ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेर
णायचक्षसे इत्यभिमिश्र अथवतुर्थकुम्भात् अंसंतरिति पूर्ववज्जलमादाय ॐ
योवःशिवतमोरसस्तस्यभाजयेतहनः उशतिरिवमातरः इतिमिश्रेत अथपञ्चमकु
म्भात् अंस्वंतरितिपूर्ववज्जलमादाय ॐ तस्माअरङ्गमामवो अस्मेक्षयायजिन्वथ
आपोजनयथाचनः इतिशिरोभिमिश्रेत ततः अमृतात् सप्तमात् अष्टमात् चतुरकुम्
भात् अंस्वंतरितिमंत्रेणापोगृहीत्वा मूर्ध्नीशिरोभिमंत्रनंकुर्यात् ततोऽभिमंत्रका
वशिष्टं जलेन सहस्वधाणांशिरसिधृत्वा स्नात्वा समाख्यानात् उत्साद्य पुनः स्नातेति
पुनः पादिपादानाश्च अथमेखलान्मोक्षः तत्रपूर्वदृतांमेखलां वदुः मन्त्रे पवनस्व
अमेवशिरोमोक्षेण निस्सारमेत् उदुत्तममिति पुनः शोफकृमि त्रिष्टुप्छंदः मेख
लादेवता मेखला मोक्षे वि० ॐ उदुत्तमंवरुणपाशं मस्मदवाधमंविमध्यमश्रथा
य अथावमादित्य व्रतं तवानागसो अदितेमस्याम मेखलान्मुच्य निधायेति
सूत्रात् साहचर्यात्यदाडमजिनं च मूर्ध्नीनिधाय आचामेत् ततउपकल्पितमन्त्र
ठासा मूर्ध्नीपरिधाय आदित्यमुपतिष्ठेत मन्त्रेण उद्यन्नाजिहुरिति प्रजापतिर्ऋषिः
गायत्रीछंद आदित्योदेवता आदित्योपस्थाने विनियोगः ॐ उद्यन्नाजिहुरिन्द्रमह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्विरस्तात्प्रातर्व्यो वभिरस्ता हृग्रासनिरसि हृग्रासनिं मा कुर्वो विदन्मागमयो घन्वार्जिह्वरि
न्द्रोमरुद्भिरस्ताद्दिवाया वभिरस्ता च्छ्रुतसनिरसि श्रुतसनिं मा कुर्वो विदन्मागमयेति मन्त्रे
णार्द्रवाहुः सूर्योपस्थानं कुर्यात् ततो दधितिलान् दक्षिणाहस्तगतगोमलीर्थेन प्रा-
श्य जटालोमनखानिः सृत्य वपनेभिन्तर्कशीतलोदकेन स्नात्वा आचम्य ततः द्वादशां
गुल अनृपुलदीर्घेण कनिष्ठिकाग्रस्थूलेन उदुम्बरकाष्ठेन ब्राह्मणक्षत्रियवैश्यक
मणादन्तधावनं कुर्यात् अन्नाद्यायेत्यादिमन्त्रेण कृमि रनुष्टुप्छन्दः सोमोदेवता दन्तधा
वनेविं० ॐ अन्नाद्यायव्यूहध्वं सोमो राजा मागमत् समेमुखं प्रमार्ष्टेत अग्नासाचम
जेन च इतितत आचम्य मृगान्धिद्रव्यलेपेन कटुतैलमेवादि-पूर्वेण शरीरोद्वर्तनं कृत्वा
तेप्रादकेन मस्तकं स्नात्वाचम्य चन्दनाद्यनुलेपनं गृहीत्वा गृहवेदीसमीपमागत्य
उपविश्याचम्य अनुलेपनेन हस्तावुपलिप्य नासिकयोर्मुखस्य चोपगृह्णीत मन्त्रेण
प्राणापानाविति प्रजापतिर्ऋषि यजुष्छन्दः प्राणापानादिलिंगोक्तदेवताः चन्दनोप
संग्रहणे विनियोगः ॐ प्राणापानौ मे तर्प्यस्य नासिकाभ्यां चक्षुर्मे तर्प्यस्य चक्षुर्भ्यां-
श्रोत्रं मे तर्प्यस्य श्रोत्रभ्यां ततः अपसव्यं विधाय पाणीप्रक्षाल्य तदवनेजनं दक्षिणं मुख
पितृतीर्थेन दक्षिणास्यां दिशि निषिञ्चेत् पितरइति प्रजापत्यश्चि सरस्वतीन्द्रऋषि
र्यो यजुष्छन्दः पितरो देवतानि मे चेनाविं० ॐ पितरः मुन्धध्वम् इति पाराशर्यो वनेजनज
लं भूमौ निषिञ्चेत् पित्र्यत्वात्सव्येनोदकस्पर्शः ततानुलेपनानन्तरं केशवादिनाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिद्वादशतिलकान्धारयेत् यथा ॐ केशवायनमो ललाटे ॐ नारायणायनमः उरसि ॐ माधवा
यनमो हृदये ॐ गोविन्दायनमः कण्ठकूपके ॐ विष्णवेनमो दक्षिणकुक्षौ ॐ मधुसूदनायन
मो बाहौ ॐ त्रिविक्रमायनमः कर्णमूलयोः ॐ वामनायनमो वामकुक्षौ ॐ श्रीधरायनमो
वामबाहौ ॐ पद्मनाभायनमः पृष्ठे ॐ दामोदरायनमः ककुदि ॐ वासुदेवायनोमूर्ध्नि
इतिललाटेवंशापत्राकृतिकं मध्यशून्यंधारयेदितिच एवंतिलकंधृत्वा जपेत् सावित्री
इतिप्रजापतिर्ऋषिः जगतीछन्दो लिंगोक्तोदेवता जपेविनियोगः ॐ सावित्री ब्रह्मसिद्ध्यां
भूयासं सावित्र्यामुखेन मुष्टुत्कर्णाभ्यां भूयासमिति अथोपकल्पितं महतंवासः परि
धत्ते परिधास्यइत्यार्षत्रिष्टुभाऋषिः पंक्तिश्छन्दोवासोदेवता वासःपरिधानेविनियोगः ॐ
परिधास्ये यशोधास्ये दीर्घायुत्वाजरदष्टिरस्मि शतंजीवामिशरदः पुरूचीरायस्पोषमभि
संव्ययिष्ये अथोत्तरीयं यज्ञसामेत्यार्षत्रिष्टुभाऋषिः पंक्तिश्छन्दो लिंगोक्तोदेवता
उत्तरीयपरिधानेविनियोगः ॐ यज्ञसामाद्यावापृथिवी यज्ञमेन्द्राबृहस्पति यज्ञोभगस्य
माविदद्यज्ञोमाप्रतिपद्यताम् इतिएकवस्त्रधारणे तदा पूर्वोत्तरेणाच्छादयेत् ततोद्विराच
म्य द्वितीययज्ञोपवीतधारणंकुर्यात् ब्रह्मचारिणा एकतन्तुजातकस्य द्वेधकृतिचेति
वचनात् केचित्तु पूर्वकृतमुत्तार्य्य जलेप्रक्षिप्य परंनवं उक्तलक्षणं उपवीतद्वयं यज्ञोप
वीतमितिमन्त्रेणायमितिवदंति ततश्चाचम्य मालारूपाः स्रक्मनसोगृह्णति याश्चाहर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दितिभारद्वाज कृमि रनुष्टुप्छन्दः स्रक्मनसोदेवता पुष्पमाला ग्रहणेविनियोगः ॐ ग्राह्यज
मदग्निः श्रद्धावेकामोयेद्विद्याम ताग्रहं प्रतिगृह्णामि यशसा च भगेन च यथावभीते मय
गोपसरसामितिभारद्वाज कृमि रनुष्टुप्छन्दः स्रक्मनसोदेवता पुष्पमाला बंधनेविनियोगः
ॐ यद्यगोपसरसामि दृष्ट्वकार विपुलं पृथुतेन संयच्छिताः स्रक्मनस ग्रावध्नामि यशोम
यि यथो जीमेण शिरोविमृज्यते अवासक्वासाइति विश्वामित्र कृमि रनुष्टुप्छन्दो बृह
स्पतिर्देवता शिरोविमृजनेवि० ॐ अवासक्वासापरिधीत ऽ अग्नाद् मयुभ्रेमोभवति जाज
मानः तन्धीरासः कवय उन्नयन्ति साध्योमनसोदेवयन्तः इति ततोन्यान्यपि कञ्चुका
दीनिवासांसिधारयाम कर्णवेमृकोपरिधेत अलङ्कारणमभिभूयोलङ्कारणंभूयात्
इतिमन्त्रेणकुण्डलेनकर्णयोर्ददाति अथास्मीरीयं अञ्जनेनाक्ते वृत्रस्यातिप्रजापतिर्कृ
मि रनुष्टुप्छन्दः अञ्जनंदेवता अक्षञ्जनेवि० ॐ वृत्रस्यास्मिकनीनक ऽ अक्षर्दा ऽ अति
चक्षक्ष्मेदेहि तत आत्मानमादर्शे प्रेक्षते रोचिष्णुरसि प्रजापतिर्कृमि रनुष्टुप्छन्दः आ
दर्शोदेवता आदर्शप्रेक्षणेवि० ॐ रोचिष्णुरसि ततश्छत्रं प्रतिगृह्णाति बृहस्पते छदिरसि
गौतमकृमि बृहतीछन्द छत्रंदेवता छत्रग्रहणेवि० ॐ बृहस्पते छदिरसि पाप्मानो
मामन्तेर्दुहि तेजसोयशोसोमामन्तेर्दुहि ततउपानहौ अगपत्प्रतिमुञ्चते प्रतिमुञ्चस्व
इति जमदग्निर्कृमि र्विराट्छन्दो लिंगोक्तोदेवता उपानत्प्रतिमोकेवि० ॐ प्रतिमुञ्चस्वो
विष्ण्वनोमायातामृ ततोवैरावंदण्डमादत्ते विष्ण्वाभ्यइति याज्ञवल्क्य कृमि र्यजु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथास्तत्कर्म्मणः साङ्गफलप्राप्त्यर्थं साङ्गतायार्थं यथोपपन्नेन सिद्धान्नेनामान्नेनवा
यथासंख्याकान् ब्राह्मणान्भोजयिष्ये इतिसंकल्प्य नवग्रहादीनां विसर्जनम् मन्त्रः
ॐ उस्रावेतौ धूम्राहौ जुन्येथामनः सुचूवीरणो ब्रह्मचोदनौ स्वस्तिमज मोनस्य
गृहान् गच्छतम् यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् इष्टकामसमृद्ध्य
र्थं पुनरागमनायच गच्छ गच्छेति पठेत् यस्यस्मृत्येति च पठित्वा ॐ अच्युताय नमः
प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति
श्रुतिः ॐ विष्णवे नमः ब्राह्मणेभ्यो दक्षिणां दत्वा अभिषेकतिलकरक्षाबंधन
घृतक्षाद्यामंत्रपाठादिकारयित्वा ततः मंगलतूर्य्यं छंदादिवादित्रे वह्निज्वालातः
त्रिविकादियोनन स्वस्तिवाचनं पठन् गृहं गत्वा जीवमातॄणां पूजनं कुर्य्यात् सु
मुखश्चेत्यादि पठित्वा आसन उपविश्याचम्य अर्घ्यं संस्थाप्य पूजासंकल्पः
अद्येत्यादि अमुकोहं अमुकगोत्रः पुत्रस्य चूडोपनयनवेदारम्भसमावर्तन
कर्म्मणां उत्तरांगत्वेन गृहप्रवेशकर्म्मणि सर्वाभ्युदयप्राप्तये भित्तिलिखितानां
कल्याणादिसप्तजीवमातॄणां यथाभिलितोपचारैः पूजनं करिष्ये एतन्त
इत्यादि ॐ भूर्भुवः स्वः कल्याणादिसप्तजीवमातर इहागच्छत सप्रतिष्ठिता
वरदा भवत इति प्रतिष्ठाप्य ध्यानम् कल्याणी भगवती भद्रा पुरात्मा पुराणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

खी तथा जयाचविजयाचैव सप्तैतानीवमातरः इतिध्यात्वा नामसन्त्रेणपाद्यादिनीराज
जान्तंसम्पूज्य पसोधाराः पातयित्वा ब्रह्मार्पणीतिसम्प्रार्थ्य दक्षिणासंकल्पः अद्येहाम
कोहं एतत्कर्मणा उत्तरांगत्वेन जीवमातॄणां पूजनकर्मणः साङ्गतासिद्ध्यर्थं कुमारदक्षिणां
ब्राह्मणावदास्ये ॐ तत्सत् इतिरक्षात् ततश्चाचार्यान्मातृभ्यस्तु भगिन्यादिभिर्वटोः
महानीराजनंतिलकादि कार्यम् ततोब्राह्मणान्भोजयित्वा इष्टबंधुभिः सहभुञ्जी
त यथासुखंविहरेत् इतिसंस्कारपद्धतौ चूडोपनयनवेदारम्भसमावर्तनपद्धतिः
अथविवाहपद्धतिः अथपूर्वांगविधिः विवाहदिनात्पूर्वदिने तस्मिन्नेवदिनेवा पित्रा
दिः पत्न्यासहे कृताभ्यंगस्नानः अहतोष्णीषादि सितवासाः शुभासनेप्राङ्मुखउप
विश्याचम्य पत्नीसहितं संस्कार्यमपत्यं चोपवेश्य गणेशमुक्तविधिनासम्पूज्य
प्रधानसंकल्पंकुर्यात् अद्यं संस्थाप्य अद्येहेत्यादि अमुकगोत्रो ऽमुकराशिरमुक
शर्माहं अमुकराशेः रस्याः कन्यायाः वीजगर्भसमुद्भवेनो निर्वहणद्वारा श्रीपरम
ध्यरप्रीत्यर्थं भर्त्रासह धर्मप्रजोत्पादन द्रव्यपरिग्रह अधिकारसिद्ध्यै पुत्रपक्षे अ
मुकराशेरस्यपुत्रस्य पत्न्यासहधर्मप्रजोत्पादन पूर्वकसकलगार्हस्थसिद्ध्यै इत्या
दिसंकल्प्य मातृपूजाभ्युदयिक पुण्याहवाचनानिविधाय कलशस्थापनंकृत्वा
तत्रग्रहानावाह्य सम्पूज्य लेप्यचन्दनादिना लिखितयोर्गौरीहरयोः पूजनंक-
न्याहस्तेनकारयेत् संकल्पः अद्येहेत्यादि अमुकराशिरमुकी अहं सर्वसौभाग्यस

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by Gaurav Jaiswal Sarayu Trust. Funding IKS-MoE-Grant-2

मृदुभे विवाहकर्म्मणः पूर्वांगत्वेन लेखनगौरीहरयोः पूजनं करिष्ये एतन्नाम्नि ॐ भूर्भुवः
स्वः गौरीहरौ कृप्रतिमिमौ वरदौ भवतम् ध्यानम् सिंहासनस्थां देवेशीं सर्वालंकारसं
युताम् पीताम्बरधरां देवं चन्द्रार्द्धकृतशेखरम् १ करणाधः कृधापूर्णां कलशं दक्षिणे
नतु वरदं चाभयं वामे नाम्नि लिख्य चतुःप्रियाम् एवं ध्यात्वा पूज्य मन्त्रैः पुराणभाज
स्तथास्त्रियः पूजामंत्रः गौरीहरमहाभाग सर्वमंगलदायक पूजां गृहाणदेवेशा सर्वदा
मंगलं कुरु इति मन्त्रेण पाद्यादि नीराजनान्तं सम्पूज्य कन्यादहप्रमाणेन सप्तविंशति
तन्तुभिः वर्त्तिकां दीपयेत् पश्चा द्धृतसम्पत्तिहेतवे एवं वर्त्तिकां प्रज्वाल्य सम्प्राप्ते-
भोजनीयान्ब्राह्मणाश्च कृवासिन्यः कृपूजिताः दद्याम्पंचयुग्मं वा हिरण्येनाथ
नोभयेत् अत्रकात्यायनी महालक्ष्मी इन्द्राणीपूजनमपि कार्य्यम् ततः कन्याह
स्तेकंकणं वध्नीयात् तिलकाद्याशिषं वदयात् इति कन्यापक्षे पूर्वोक्तविधिः अथ
वरपक्षे वरपितृविवाहात्पूर्वदिने तद्दिने वा नित्यं कर्म्म वेम्यदेवानां कृत्वा शुचिः भु
क्तवासाः वरं अभ्यंगपूर्वकं मंगलद्रव्यैः संज्ञाप्य शुभासने प्राङ्मुखउपविश्याच-
म्य अर्घस्थापनं विधाय प्राणानायम्य देशकालस्मरणान्ते अमुकोहं अमुकगोत्र
रस्य पुत्रस्य विवाहकर्म्मणि निर्विघ्नताकाम्यसिद्ध्ये पूर्वांगत्वेन श्रीभगवतो गणे
श्वरस्य पूजनं करिष्ये इति यथाविधि गणेशं सम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्ये
हेत्यादि देशकालकीर्त्तनान्ते अमुकगोत्रो अमुकराशिः अमुकशर्म्मा सपत्नीकोहं अमु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करोमि अस्मत्पुत्रस्य देवपितृमनुष्याणां पाकरोहतु धर्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वर
प्रीतये विवाहाख्यं संस्कारं करिष्ये तत्पूर्वाङ्गत्वेन मातृपूजानान्दीश्राद्ध पुण्याहवाचनानि
करिष्ये इति मातृपूजानान्दीश्राद्ध पुण्याहवाचनानि विधाय कलशस्थापनं तत्र ब्रह्म
वरुणसहितानादित्यादि नवग्रहानावाह्य सम्पूज्य रक्षाविधानेन कंकणमभिमंत्र्य प्र
तिमुक्तपेयत् वरहस्ततन्मातृहस्ते न्यवध्वा स्वस्तिनं कुर्यात् चतुर्थीकर्मदिवसे मोच
येत् कंकणमधयस्य दूर्वामवाङ्कुराभ्येव वालकं चूतपल्लवैः हरिद्राद्यभिषिक्ते
ष्टे शिखिपत्रोरगत्वचः कंकणो अधयस्येनाः कौतुकाख्यानवस्मृताः ततो ब्रह्म-
णान्भोजनदक्षिणादिभिः संतोष्य ततः एकं ज्योतिर्विदं समीपं मंगलादिद्रव्यस
हितं घटिकापात्रयुतं पुरुषं विवाहलग्ननिश्चयार्थं कन्यापितृगृहं प्रति प्रथमं प्रे
षयेत् ततो वरं सात्विकाहारं भोजयित्वा नेदिष्ठे वधूगृहे दिवा विवाहलग्ने अभोज
यित्वा सर्वां विवाहसामग्रीं उपकल्पयित्वा वरं रक्ततूल कंचुकोष्णीष कटिवेष्टो
त्तरीय कुण्डलग्रैवेयकाद्यलंकारैः मुकुटादिभिश्चालंकृत्य शिविकादिषु आनमा
रोहयित्वा उपकल्पितां सर्वां विवाहसामग्रीं अग्रतः कृत्वा वस्त्रालंकारादिभूषित
मुक्तिवान्धवापृष्ठतः सपुरोहितादिद्विजो मंगलतूर्यघोषेण कन्यापितृगृहं व्रजे
त् अथ कन्यापितामाग्रगतं वरं श्रुत्वा उपकल्पितां वरपूजासामग्रीं स्वसविधेऽग्रा
नीय स्थलिप्राङ्मुखं उपविश्य त्रिराचम्य प्राणानायम्य कलशविधिनाकल्प

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शंसंस्थाप्य तत्रब्रह्मनावाह्यसम्पूज्य वरागमनंप्रतीक्षेत् अथवरस्यपितामार्गागतस्यवर
स्य जनतादिवृत्तांतनि वेदनार्थं सफलेदधिपात्रसहितं सोम्यवेशंमनुष्यहस्तं वराभ्यंगायाशि
मृ हरिद्रारंजितं तैलकुनुपकं कतिकापट्टसूत्रहस्तं नापितादिकंच प्रेषयति ततः कन्यापिता
पितृप्रेषितंगृहीत्वा मनुष्यसोमनुष्याणांवा अर्चांकृत्वा यथाशक्तितघोरमद्रव्यंदत्वा-
स्कभोज्यंभोजयित्वा स्वयमपिस्वीयमाप्ते मनुष्यहस्तं फलसहितं वरस्यशीघ्रमाकरणा
र्थं प्रेषयति ततः कन्यापितानिजमंदिरा दद्वागतं समाज्यमध्य स्थितंवरंविलोक्य
जनतयासह वरमानेतुं कतिचित्पदानिगत्वा द्वारमानाय्य द्वारेयथाशक्ति वराध्युमित-
यानंवोढ्वा वरंयानादुत्तार्य्य वरहस्तात् श्रीफलादिसादरं गृहीत्वा स्वानीयस्वस्ति का-
दिशोभितायां भद्रासनायां भुद्धायांभूमौ स्वासनेप्राङ्मुखमुपवेश्य स्वयमुदङ्मु
ख उपविशेत् वरस्यदक्षिणांत आचार्य्य आचार्य्यवरस्य पादप्रक्षालनार्थं पात्रमु
र्गंप्रयच्छति मंत्रः ॐ आपद्धनध्यांतसहस्रमानभूः वः समीहितार्थाध्यराकामधे
नवः समस्ततीर्थाम्बु पवित्रमूर्तये रक्षन्तुमांब्राह्मणपाद पांसवः १ समस्तसंपत्
समवाप्तिहेतवः समुत्थितांगाः कुलधूम्रकेतवः अपारसंसारसमुद्रसेतवः पुनन्तुमां ब्रा-
ह्मणपादपांसवः २ आधिव्याधिहरंनृणां मृत्युदारिद्र्यनाशनम् श्रीपुष्टिकाम
दंवन्दे विप्रः श्रीपादपंकजम् ३ इत्याचार्य्यवरयोः पादप्रक्षालनंकृत्वा ततः कन्या
पिता आचम्य प्राणानायम्य अर्घ्यंसंस्थाप्य प्रथमंवाग्दानसंकल्पं कुर्यात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अद्य हेत्यादि अमुकराशि अमुकशर्माहं करिष्यमाणाकन्यादानांगत्वेन वाग्दानं करिष्ये इ
तिसंकल्प्य कुंकुमाक्तानि पंचपूगीफलान्यादाय अमुकगोत्रो अमुकप्रवरो अमुकवेदान्त
गतामुकशाखाध्यायी अमुकशर्माहं अमुकगोत्रस्यामुकशर्मणः प्रपौत्राय अमुकश
र्मणः पौत्राय अमुकशर्मणः पुत्राय अमुकशर्मणे विष्णुस्वरूपिणे कन्यार्थिनेवराय
अमुकगोत्रस्यामुकप्रवरस्यामुकवेदान्तगतामुकशाखाध्यायिनो अमुकशर्मणः प्रपौ
त्रीं अमुकशर्मणः पौत्रीं अमुकशर्मणः पुत्रीं अमुकनाम्नीं श्रीरूपिणीं वरार्थिनीं कन्यां
ज्योतिर्विदादिष्टे मुहूर्ते तुभ्यं दास्ये तत्प्रतिग्रहार्थं एभिर्गंधाक्षत पुष्पपूगीफलद्रव्य
भूमणाद्युपचारैस्त्वामहं वृणे वृतोस्मीति प्रत्युक्तिः इतिवाग्दानम् ततः पुनरर्घ्यं संस्थाप्य
वराणसंकल्पं कुर्यात् अद्य हेत्यादि अमुकगोत्रो अमुकराशिरमुकशर्माहं करिष्यमा
णाकन्यादानप्रतिग्रहार्थं द्वादशागतस्य पूजनपूर्वकं वरणं करिष्ये तत्पूर्वांगत्वेन वरक
न्ययोः पाणिग्रहणाकर्मणि आचार्यकर्मकर्तृ आचार्यस्य पूजनपूर्वकं वरणं च
करिष्ये भूमिदेशेत्यर्घं दत्वा गंधद्वारमितिगंधं नमोस्त्वनन्तायेति अक्षतपुष्पैः स
म्पूज्य सम्पादिताक्षतेनाक्षिणा आचार्यसम्मुखः अर्घोर्घोर्घः प्रतिगृह्यताम् ॐ
अहं प्रतिगृह्णामीत्याचार्यः प्रतिब्रूयात् ततः कन्यापिता वरणसामग्रीं करे कृत्वा एभि
र्गंधाक्षत पुष्पपूगीफलयज्ञोपवीत द्रव्यवासोलंकरणा पुष्पमालाभिर्वरकन्ययो
र्विवाहकर्मणि आचार्यकर्म कर्तृ आचार्यत्वेनत्वामहं वृणे आचार्यस्य तत्प्रति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गृह्य वृतोस्मीतिप्रतिब्रूयात् आचार्य्यस्तु यथास्वेगे इतिसम्प्राप्ते पुनरुक्तिदोषात्
गोधोधोः प्रतिगृह्यताम् अहंप्रतिगृह्णामि इति ततः कन्यापिता सम्पादितमर्घ्यागमर्घं
हस्तयोः कृत्वा उत्थाय वराचार्य्याभिमुखस्तिष्ठेत् तत आचार्य्यप्रमुखाः वरमासीन
मेनं मंत्रंयथाश्रुत मुच्चैः पठेयुः ॐ अथवरं वृणीते बलवद्वै देवास्तस्यगृहस्मेहो
मेप्रेप्संतित्ते तस्मादेनंवरं समृद्धयति क्षिप्रेणाऽऽमंगृहंजुहुवरिति तस्माद्वरं वृणी
ते १ अथवरं वृणीते ह्यष्ठहेवे फञ्चसुकुमारा वरंवृणीते सास्मैसर्वंसमृद्धयते त
स्माद्वरंवृणीते २ अथवाराह्या ऽऽपानहा ऽऽपमुञ्चते अग्नेर्हवेदेवाघृतकुम्भं
प्रवेशयांचक्रुः ततोवराहः संबभूव तस्माद्वाराहोमेद्रोघृताद्धि संबभूव तस्माद्वाराह
हगावः सञ्जानते स्वमेवेनद्रसंसञ्जानते तत्वपूतोमे वै तद्रसं प्रतितिष्ठति तस्मा
द्वाराह्या ऽऽपानहा ऽऽपमुञ्चते ३ स ऽऽजगामगोतमो यत्रप्रवाहणस्य जैवले
रास तस्मादासनमाहार्य्या दकमहारस्माञ्चकार आस्माकमर्घञ्चकार सेहावाच
वरंभवते गोतमाप्रदेशइति सेहावाचप्रतिज्ञायते मभस्मवरोयान्त्र कुमारस्यैनो
वाचमभाषतस्तेमब्रूहिति सेहावाचेदेवेषु गोतमतद्वरंमानुषाणांब्रूहीति
सेहावाचविज्ञायते हंतिहिरण्यस्यपात्रे गाऽऽश्वानां दासीदासानांपरिधा
राणां परिधानानां मानोमहान्तमर्यंत स्याव्यवधान्योभूयासं सर्वेगोतमतीर्थे
गोक्रास ऽऽत्युपहेमहम्भवतामितिवाचाहमस्मे व दूकमुपनयनिसेहावाच

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नकीर्त्या उवाचवाचा स्फवाच ४ इति पठेत्परान्य अभृंगमहं निवेदयेत् यथा अद्भिः
क्षीरैः कुशाग्रैश्च दध्यावदरतण्डुलैः यवैः सिद्धार्थकैश्चैव अभृंगोऽयं प्रकीर्तितः अभृं
गानि तु नाभौ हृदि स्कन्धशिरसि पादयोः जानुभ्यामुदरे वक्त्रे अभृंगोऽयं प्रकीर्तितः
अर्घदानमन्त्रः श्रीगणेशाय नमः श्रीमन्महागणपतये नमः सर्वकामाय नमः सुखे प्रतिगृह्णामि अर्घं गृह्णा
नमोस्तुते ॐ अमोघास्ताम्राऽअरुणाऽउतबभ्रुः सुमङ्गलः येचेनं रुद्राऽअभितो
दिक्षु श्रिताः सहस्रशो वैषां हेडऽईमहे १ ॐ अमोघो वर्षपति नीलग्रीवो विलो
हितः उतेनङ्गणाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृश्रो मृडयातिनः २ एवमर्घं दत्वा नमो
स्त्वनन्तायेति गन्धाक्षतपुष्पमालादिभिर्वरं सम्पूज्य वरणसामग्रीं हस्ते गृहीत्वा ए
भिर्गन्धाक्षतपुष्पपूगीफल दूर्वायज्ञोपवीत ताम्बूल पादुकोपानह पुष्पमाल्यो
लीमकंचुक कटिबन्धोपसंख्यान हस्तभूषणकर्णविभूषक वरमुद्रिकादिभिः करिष्य
माण कन्यादानप्रतिग्रहाङ्गं अमुकगोत्रं अमुकप्रवरं अमुकशाखिनं अमुकवे
दाध्यायिनं अमुकशर्म्माणं विष्णुस्वरूपिणं कन्यार्थिनं वरं वरयिष्ये त्वामहं वृणे
वृतोस्मीति वरः प्रतिवदेत् ततो वरः वस्त्रयज्ञोपवीतभूषण पुष्पमाला वरमुद्रिका
धारणं विधाय स्फचक्षाहं मंत्रं जपेत् ॐ स्फचक्षाहमक्षिभ्यां भूयासं स्फर्चक्षुषे
नस्फ श्रुत्कर्णाभ्यां भूयासं इति ततश्चाचार्य्यः वरश्च उत्थाय यजमानाय तिलका
शीदानादिकं कुर्य्यात् मंत्राश्च ॐ अग्नये त्वा महं वरुणाय दद्यात् सोमाय त्वा

प्रदातव्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रीय ऽ आर्द्रहस्त ऽ एधिमयोमहं प्रतिगृहीत्रे १ ॐ कद्रायत्वामहं वरुणोददातु सो
ऽ मृतत्वमग्नीय प्राणोदात्र ऽ एधिमयोमहं प्रतिगृहीत्रे २ ॐ बृहस्पतेत्वा महं
वरुणोददातु सो ऽ मृतत्वमग्नीय त्वग्दात्र एधिमयोमहं प्रतिगृहीत्रे ३ ॐ प्रजाप्त-
त्वामहं वरुणोददातु सो ऽ मृतत्वमग्नीय हृदोदात्र ऽ एधिमयोमहं प्रतिगृहीत्रे ४
ॐ कोदात्कस्मा ऽ अदात्कामोदात्कामायादात्कामोदाता कामः प्रतिगृहीता कामैत
त्ते इति मंत्रात्रिभिः प्रतिगृह्य दास्यादिभिः स्त्रवासिनीभिर्वरस्य महानीराजनं कारयेत्
इति धूर्त्यघविधिः ततऽभ्यपक्षीयाद्वाद्यपुरस्सरं स्वस्तिवाचनं पठंतो विवाह
शालायां प्रविशेयुः ततः कन्यापितरौ पांडुकंबलास्तृतस्थाने समुपवेश्य वराच्चा
र्घ्यत्रोस्तिलकं कृत्वा मत्प्रवसेवरपित्रादीनां मत्प्रेमानेदिमृबांधवादीनां च नि
त्यकर्मानादिभिः पूजनं विधाय मुखोपविष्टान्कुर्यात् ततः प्राङ्मुखं वरं पश्चि
माभिमुखीं कन्यां समुपवेश्य स्वयं दाता उदङ्मुखो भूत्वा अपेक्षितां विवाह
सामग्रीं यथास्थानमासाद्य रक्तकंबलादिना अन्तर्पटं विधाय स्वासनऽउपवि
श्य मधुपर्केणार्घ्यं दद्यात् दीपं प्रज्वाल्य आचम्य अद्यसंस्थाप्य प्राणायामं
कृत्वा अमेहत्यादि संकीर्त्य अमुकगोत्रोऽमुकशर्म्माहं कन्यादानप्रतिग्रहार्थं
गृहागतं ज्ञातकेवरं मधुपर्केणार्चयिष्ये तथावरापि अद्यसंस्थाप्य अमुक
गोत्रोऽमुकशर्म्माहं धर्मप्रजावृद्ध्यर्थं यज्ञः शास्त्रोक्तविधिना विवाहकर्म करिष्ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इतिसंकल्प्य मधुपर्कंगृह्णीयात् मधुपर्कविधिस्तु वरश्चाग्रेवाक्तः कार्य्यः अथ यज
मानः पीठसनमाहार्य्यैः साधुभवानास्तामर्चयिष्यामो भवंतमिति ॐ अर्च
यइति वरस्योक्तिः ततोर्घकपुरुषः विष्टरं पाद्यं पाद्यार्घ्यमुदकं अर्घ्यं अर्घ्य
नीयं मधुपर्कं दधिमधुघृतं अपिहितं कांस्येनन्यस्तं कांस्येतस्मीपमानयति
अथयजमानएकंविष्टरमादाय तिष्ठति यजमानपत्नीयोन्यः कश्चिद्ब्राह्मणो
विष्टरोविष्टरोविष्टरः इति त्रिः श्रावयति प्रतिगृह्यतामितिसकृदुक्त्वा यजमाना
वरस्यहस्तेनोदधाति वरस्य प्रतिगृह्णामीत्युक्त्वा उदग्रंविष्टरं तूष्णीमादाय व
ओस्मीत्यार्षेण वाक्तृमि रनुष्टुप्छंदा विष्टरोदेवता उपवेशनेवि० ॐ वर्चोस्मि
समाना मुखतामिवसूर्य्यः इमंतमभितिष्ठामि योमाकश्चाभिदासति अनेन
मन्त्रेणविष्टरं मुदग्रमासनेनिधाय तदुपरि उपविशति ततः पाद्यं प्रतिगृह्य
तामितित्रिः श्रावितेवरः प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्य तत्पात्रंभूमौनिधाया
ञ्जलिना जलमादाय दक्षिणांपादंप्रक्षालयति विराजोदोहोसीतिप्रजापति
र्वृहमिर्वजुरुष्टुप् आपोदेवता दक्षिणपादप्रक्षालनेविनियोगः ॐ विराजोदो
होसि विराजोदोहमशीय मयिपाद्यायै विराजोदोहः इतिमन्त्रेणप्रथमंदक्षि
णांपादंप्रक्षाल्य अनेनैववामपादंप्रक्षाल्यमेत् क्षत्रियादीनांतु वामंप्रथमंपृ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रावसरे यथाशक्ति कलशद्रव्यं दत्वा तद्द्रव्यमानीय अर्घ्यहस्तकोहं दशायाम
न्तर्हस्तो गोचरे मम कवर्गे सर्वतोभद्रे नैर्ऋतो वर्मफलेषिवा यत्र कुत्रस्थान-
स्थितानां आदित्यादिनवग्रहाणां दुष्टानां दुष्टदोषोपशान्त्यर्थं शुभानां शुभफ
लाधिक्यप्राप्त्यै इदं कवर्गं कवर्गनिष्क्रयीभूतं द्रव्यं त्वा कन्या पक्षीयपुरोहि
ताय ददामि इति कलशद्रव्यं दत्वा पुनर्द्वितीयं विष्टरं प्रतिगृह्णीयात् ॐ विष्टरो-
विष्टरो विष्टरः प्रतिगृह्यतामिति कुलकरः अहं प्रतिगृह्णामीत्युक्त्वा पूर्ववद्ब्रह्मोस्मी
ति मन्त्रेण आसनेप्राग्ग्रं पादयोरधस्तान्निदधाति ततो यजमानः अर्घोर्घार्घ-
प्रतिगृह्यतामिति वदेत् वरः अहं प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्य आपः स्थेति
प्रजापतिर्ऋषिरनुष्टुप्छन्दः आपोदेवता अर्घ्यग्रहणे वि० ॐ आपः स्थ युष्मा
भिः सर्वान्कामान्वाप्नुयाम् वाम् इत्यर्घमभिमंत्रयते अग्रिमं मंत्रेणाद्यया सम्
द्रमित्यार्घेण ऋषिरनुष्टुप्छन्द आपोदेवता अर्घाभिमंत्रणे विनियोगः
ॐ समुद्रवः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टाः सर्वहायसा मा
चिभत्पमः इति अथ आचमनीयं २ प्रतिगृह्यतां वरस्य प्रतिगृह्णामीत्युक्त्वा
हस्ताभ्यां प्रतिगृह्य आमागन्निति परोमात्रो ऋषिर्बृहती छन्द आपः देवता
आचमने वि० ॐ आमागन्यशसा सह सृजवर्चसा वसुभिः कृतप्रियं प्रजाना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मधिपतिं भूतानामरिष्टं तनूनाम् इतिमन्त्रेणप्रक्षदाचम्य ततः तूष्णींस्थाप्योपसंकु
र्यात् अथमधुपर्को मधुपर्कः प्रतिगृह्यतामित्युक्त्वा दधिमधुघृतंकांस्य
पात्रस्थापितंकांस्येनपिहितं मधुपर्कंनिवेदयति वरस्यप्रतिगृह्णामीत्युक्त्वा यजमान
हस्तोद्घाटितं मधुपर्कमीक्षमाणोमंत्रंपठति मित्रस्यत्वाइति बृहस्पतिर्ऋषिर्यजुष्छ
न्दो मधुपर्कोदेवता मधुपर्कप्रेक्षणेवि० ॐ मित्रस्यत्वा चक्षुषासर्वाणिभूतानि समि
क्षन्तामित्रस्य चक्षुषासर्वाणिभूतानिसमीक्षे मित्रस्य चक्षुषा समीक्षामहे इति
प्रतीक्ष्य देवस्यत्वेतिबृहस्पतिर्ऋषिर्यजुष्छन्दः सविताद्देवतामधुपर्कग्रहणेवि०
ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामि इत्युक्त्वा
मधुपर्कपात्रंगृहीत्वा स्ववामपार्श्वेनिधाय दक्षिणाहस्तानामिकया त्रिःप्रयोवम
तिमिश्रयति नमः शम्भवेति प्रजापतिर्ऋषिर्यजुष्छन्दः सविताद्देवतामिश्रणेवि०
ॐ शम्भवायमयोभवायनमःशंकराय मयस्कराय नमःशिवाय शिवतराय नमः इतिमन्त्रेणमधुपर्कं सक्त
प्रदक्षिणमालोड्य अङ्गुष्ठानामिकाभ्यां सक्तूनां बहिर्निक्षिपति एवंहिकारमा
लोडनंनिरूक्तानां वक्तव्यं ततः त्रिःप्राश्नाति यन्मधुनइति कुत्सऋषिर्जगती छ
न्दो मधुपर्कोदेवता मधुपर्कप्राशनेविनियोगः ॐ यन्मधुनोमधव्यं परमरूपमन्ना
द्यं तेनाहंमधुनो मधव्येन परमेण रूपेणान्नाद्येन परमोमधव्यो भूयासमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनामिकाङ्गुष्ठाभ्यां प्राश्नाति एवं पुनर्द्विवारं मंत्रवत्प्राशनम् मधुवाता ऋतायते इत्यादिति
स्तृभिर्ऋग्भिः प्रत्यृचं प्रतिमंत्रं वा त्रिः प्राशनं कृत्वा प्राशितशेषं शिष्याय पुत्राय वोत्तरत
आसीनायदद्यात् सर्वं वा प्राश्नीयात् पूर्वं स्वांदिशि असंचेरपाक्षिपेत् तत आचम्य प्राणा
नायम्य अंगान्युपस्पृशति यथादक्षिणाकराग्रेण संहताभिस्तिसृभिः तर्जनी मध्यमा
नामिकाभिः वाङ्मे आस्येस्तु इति मुखं स्पृशेत् अंगुष्ठप्रदेशिनीभ्यां नासोर्मे प्राणो-
स्त्विति नासिकारन्ध्रम् अंगुष्ठप्रदेशिन्यनामिकाभिः अक्ष्णोर्मे चक्षुरस्त्विति चक्षु
षी तथैव कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ संहतांगुल्यग्रे वाहोर्मे बलमस्त्विति वा
हू असंहतांगुलिभ्यां पाणिभ्यां ऊर्वोर्मे ओजोस्त्विति जुगपदूरू अरिष्टानि मे गा
नि सन्तु तनूस्तन्वा मे सह इति शिरः प्रभृति पादपर्यन्तं आलभेत् ततो द्विराचामेत्
ततो यजमानः खड्गप्रतिनिधिं कुशतरुमादाय गौर्गौर्गौः आलभ्यतामित्याह व
रयमालभ्यतामित्युक्त्वा मंत्रं पठेत् मातरुद्राणामिति बृहन्मात्रभिस्त्रिष्टुप्छं
दो गौर्देवता गोरभिमंत्रणे विनियोगः ॐ मातरुद्राणां दुहितावसूनां स्वसादि
त्यानाममृतस्य नाभिः प्रणु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्टं
मम मृकं जनमानस्य च पापमाहतः इत्युपांशु उत्सृजेत् तृणान्यनु इत्युच्चैर्ब्रूयात्
ततः कुशपत्रस्योत्सर्जनस्यालम्भनम् कलौ गवालम्भनस्य निमित्तत्वात् गोनि
ष्क्रयीभूतस्य गोदानं तन्निष्क्रयीभूतद्रव्यदानं वा उत्सर्गः तत्र संकल्पः अग्रेध

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हेत्यादि-अमुकोहं मधुपर्कोपयोगि गोरूपसंगकर्मणः साङ्गतासिद्ध्यर्थं गोप्रत्याम्नायीभूतं सुवर्णाद्रव्यम्या ब्राह्मणाय दास्ये ॐ तत्सत् इतिसंकल्प्य ब्राह्मणायदद्यात् इतिमधुपर्कविधिः अस्मिन्नवसरे कश्चिद्वरपक्षीयोब्राह्मणो बहिःशालायामागत्य वेद्यांपञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य प्रतिक्षापयेत् अस्मिन्स्थापनानन्तरं कन्यापितावराय वस्त्रचतुष्टयंददाति तत्रसंकल्पः अद्येह अमुकगोत्रोहं कन्यादानकर्मणः पूर्वांगत्वेन वराय सदक्षिणं वस्त्रचतुष्टयंसम्प्रददे इतिदद्यात् वाच्यस्वस्तीत्युक्त्वा प्रतिगृह्य नेकुपस्त्रेकुपस्त्रकुर्यं कन्यायैप्रयच्छति वस्त्रद्वयंस्वयंपरिधत्ते तत्रप्रथमंकन्यायावस्त्रपरिधानमंत्रो जरांगच्छतिप्रजापतिऋषिस्त्रिष्टुप्छन्दो वासोदेवतावस्त्रपरिधानेविनियोगः ॐ जरांगच्छपरिधत्स्ववासो भवाक्षतीनामभिशस्तिपावा शतञ्जीवासिशरदः सुवर्चाराविंचपुत्रा ननुसंव्यय स्वायुष्मतीदंपरिधत्स्ववासः अथोत्तरीयमंत्रः या आकृतान्निति प्रजापतिऋषिस्त्रिष्टुप्छन्दः वासोदेवता उत्तरीय परिधानेविनियोगः ॐ याः आकृत्न्नवयंयाः आतन्वन्नाप्वदेवीस्तवूनभिनो ततन्थ नास्त्वादेवी जरसेसंव्यय स्वायुष्मातीदंपरिधत्स्ववासः अथवरःस्वयंपरिधत्ते परिधास्येत्यामंत्रयेत्ऋषिः पंक्तिछन्दो वसोदेवता वासः परिधानेविनियोगः ॐ परिधास्ये यशोधास्ये दीर्घायुत्वायजरदष्टिरस्मि शतञ्जीवासिशरदः पुरूचीरायस्पोषमभिसम्व्ययिष्ये अ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओत्तरीयं यज्ञसामित्यार्थर्वणऋषिः पंक्तिश्छन्दो लिंगोक्तादेवता उत्तरीयपरिधानवि॰
ॐ यज्ञसामाद्यापापृथिवी यज्ञोसद्रावृहस्पती यज्ञोभगश्च माविदघ्नोमाप्रतिपद्य
ताम् ततोद्विराचमनम् अथकन्यापितांकन्यावरौ परस्परंसमञ्जेथामिति प्रेष्य
मित्वा सम्मुखीकुर्यात् ततोवरः सम्मुखीभूतः पठयन्नेवमंत्रंपठति समञ्जन्त्विति
आथर्वणऋषिरनुष्टुप्छन्दो लिंगोक्तादेवताः परस्परसमञ्जनेवि॰ ॐसमञ्जन्तु
विश्वेदेवाःसमापो हृदयानिनौ सम्मातरिश्वासन्धाता समुष्ट्रीदधातनो अथ
वंशगोत्रप्रवरसापिण्ड्यनिश्चयार्थं गोत्रोच्चारःकर्तव्यः तत्रप्रथमंकन्यापक्षीयः
आशिर्वादश्लोकंपठति जेतुंत्रिपुरं हरेण हरिणा व्याजाद्बलिंबध्नता सम्भु
वारिभवोद्भवेनभुवनं ग्रसेणार्थ्रुंधराम् पार्वत्यामहिमाकरप्रमथनेसिद्धादि
भिर्मुक्तये ध्यातः पञ्चशरेणविश्वविजये नागाननः पातुवः १ किंगोत्रस्य किं
प्रवरस्य किं शाखिनः किं वेदाध्यायिनः किंशर्म्मणः प्रपौत्राम किंगोत्रस्य
किंप्रवरस्य किं शाखिनः किं वेदाध्यायिनः किंशर्म्मणः पौत्राम किंगोत्रस्य
किंप्रवरस्य किं शाखिनः किं वेदाध्यायिनः किंशर्म्मणः पुत्राम आत्मु
भ्रेतकन्यार्थिने विष्णुस्वरूपिणोकिन्नाम्नेपराम अमुकवरपक्षीयोपाह्म
णाः आशिर्वादंपठति कौपीनंपरिधाम्यपन्नगपतिं गौरीपतेश्चीपते रम्भ
रीसमुपागते कमलजासार्द्धंस्थितस्यासने आयाते गरुडे उपपन्नगप

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तो त्रासाद्वहिर्निगते शम्भुर्वीक्षादिगम्बरं जल्पमुवः स्मेरंस्मितं पातुवः २ अमुकगोत्र
स्येत्यादि अमुकनाम्ने वराय किंगोत्रस्येत्यादि श्रीरूपिणीं वराधिनीं किंनाम्नीं
कन्यां अथकन्यापक्षीयः पठेत् श्रुतौमिन्दोरेखा रतिकलहभर्गच्चवलयं ध्वं
चक्रीकृत्य प्रहशितमुखीशोल्लतनमा अवोचच्चंपर्वते त्यवतुसक्रियः साचगिरिजा
सचक्रीडा चन्द्रादयानकिरणपूरितनुः ३ अमुकगोत्रस्येत्यादि अमुकनाम्नीं कन्यां
किंगोत्रस्येत्यादि किंनाम्नेवराय अथवरपक्षीयः अग्रिवादिपठेत् रासोल्लास
भरणविभ्रममृता माभीरवामभुवा मम्भरणं परिरम्भनिभरमुरः प्रेमान्धमाराधयाम
कृत्यहृदनं मधाभवमिति व्यात्तत्मगीतस्तुति व्याजालिङ्गनदुम्बिनः स्मितमनो
हारीहरिः पातुवः ४ अमुकगोत्रस्येत्यादि अमुकनाम्ने वराय किंगोत्रस्येत्यादि
श्रीरूपिणीं वराधिनीं किंनाम्नीं कन्यां अथकन्यापक्षीयः पठेत् दिव्यंवारिकमं
यतः स्मरकनी भोलोकयं पावको दीव्यंतद्विलोचने कथमहि दीव्यंसर्वांगेतव
तस्माद्भूतविधो त्वयाद्यमुवित्तो हारः परित्यज्यता मित्थंशोलसकनाविहस्यलपि
तः शम्भुः शिवाशास्तवः ५ अमुकगोत्रस्येत्यादि अमुकनाम्नीं कन्यां किंगोत्र
स्येत्यादिकिंनाम्नेवराय अथवरपक्षीयः पठेत् सानन्दनन्दिहस्ता हतमुरजैरवा
हूतकोमारवर्हि त्रासाल्लासाग्रस्थं विसातिफणिपतौ भोगसंकोजभाजि गंडोडी ना
त्तिमाला मुखरित ककुभस्ताडवे शूलपाणौ वैनायकपश्चिरवो यदनविधातमः पान्तु
चीत्कारवत्यः ६ अमुकगोत्रस्येत्यादि अमुकनाम्नेवराय किंगोत्रस्येत्यादिकिं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाम्नीकन्यामृ इतिवारं शाखोच्चारविधाय पश्चाद्वेद्याशिर्वादश्लोकपाठः देववर्याय
स्वसूतिस्त्रिजगतिविदिता रुक्मिणीधर्मपत्नी पुत्राः प्रद्युम्नमुख्या स्मरनरगणिनो वाह
नंपक्षिराजः कृष्णाख्यांविहीनो व्रजपुरवनिता वल्लभाराधिकाद्या यत्कंविख्यातम
संसजयति जगतां स्वस्तयेनन्दसूनुः ७ कोशल्याविग्रहाल वालजानिमः सीता
लताल्लिङ्गितः सिक्तः पंक्तिरथेन सोदरमहा शाखाभिर्संवर्द्धितः रक्षस्त्रीवृनिदाघ
पाटनपटु म्छाखाश्रितानन्दकृ घुम्माकंसविभूतयेस्तभगवान् श्रीरामकल्पद्रुमः ८
इतिपठित्वा कन्यापितात्रिवारंददाति ३ वरंप्रतिवदेत् ततःपश्चाद्वेद्यशाखोच्चारदक्षि
णासंकल्पः अद्येहेत्यादिअमुकगोत्रोहं विवाहकर्मणि द्विजद्वारकारितस्यशा
खोच्चारकर्मणः सांगतासिद्ध्यर्थं दक्षिणांद्रव्यमेतदाभ्यो दास्ये ॐ तत्सत् द
क्षिणांदद्यात् ततःकलशनमस्कारमंत्रपाठान्ते कन्यांवस्त्रभूषणादिभिर्भूषयित्वा
गंधाक्षतपुष्पादिभिस्तांपूजयेत् ॐ श्रीर्वेतेलक्ष्मीश्च ॐ अम्बेअम्बिके ॐ स
मस्थे इतिमंत्रैः कन्यांपूजयेत् अत्रकन्यादानलग्नानुरोधेन कन्यादानात्पू
र्वंपश्चाद्वा आचारात्कौलिकाभरणंकुर्वन्ति अथपाणिग्रहणंहे लग्नसमागते
उभयपक्षयोः लग्नदानविधानम् वरपिता अद्येहामुकोहं अमुकगोत्रस्यवर
स्य विवाहलग्नात् अत्रकुत्रस्थानेस्थितानांग्रहाणां दुष्टफलनिरास पूर्वक
शुभफलप्राप्तये आदित्यादिनवग्रहाणांप्रीतये इदंकंकणं तन्निष्क्रयीभूतं
द्रव्यम्वा ब्राह्मणायदास्ये ॐ तत्सत् अथकन्यापिता अद्येहेत्यादि अमुको

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हं अमुकगोत्रोऽस्याः कन्यायाः कन्यादानलग्नात् चन्द्रबलमानमुक्तं दक्षिणादत्वा इति लग्न
नदानं विधाय ततः शंखघंटातूर्यमंगलघोषपुरस्सरं प्राङ्मुखोपविष्टः कन्यापिता
प्रत्यङ्मुखोपविष्टायाः कन्यायाः दक्षिणहस्तांगुष्ठं गृहीत्वा प्राङ्मुखोपविष्टा
य वराय दातुं कन्यादानसंकल्पं कुर्यात् कुशतिलयवजलान्यादाय ॐ विष्णुः ३ नमः
परमात्मने श्रीपुराणपुरुषोत्तमाय ॐ तत्सत् श्रीहरिः सच्चिदानंदरूपिणे ब्रह्म
णोनिर्वाच्य मायाशक्तिविजृम्भिता विद्यायोगात्कालकर्म स्वभावाविर्भूत महा
तत्वोदिताहंकारतृतीयोद्भूत विषयादि पंचकेन्द्रियदेवता निर्मिताण्ड कटाह चतुर्द
शलोकात्मके लोके लीलयातन्मध्यवर्ति भगवतः श्रीनारायणस्यांगनाभिकम
लोद्भूतेन सकल लोकपितामहेन ब्रह्मणासृष्टिं कुर्वता तदुद्धरणाय प्रजापति
प्रार्थितेन महापुरुषरूपिणा सितवाराहावतारेण ध्रियमाणायामस्यां भूर्लोक
संज्ञितायां धरित्र्यां सप्तद्वीपमण्डितायां क्षीराब्धिद्विगुणद्वीपवलयीकृत लक्ष
योजनविस्तीर्णे जम्बूद्वीपे भरतखण्डे स्वर्गस्थिताद्याश्रासितावतार गंगादिसुरि
द्भिः पावितनिखिलजनपावने शौनकादिमुनिक्लृप्त निवसति नैमिषारण्ये आ
र्यावर्ते पुण्यक्षेत्रे हिमवत्पर्वतैकदेशे श्रीभगवन्मार्त्तण्ड कृपापात्र कालचित
पक्ष गंगवाराहाचार्यादि गणितायां पाण्डुयादिसंख्यायां श्रीब्रह्मणोह्नि
यपरार्द्धस्य द्वितीययामे तृतीयमुहूर्ते श्रीश्वेतवाराहनाम्नि प्रथमकल्पे स्वायंभु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वस्वोरुचिमोत्तम नामसैरवत चाक्षुषेति मन्वन्तरेषु सम्प्रति सप्तमेवैव
स्वतमन्वन्तरे अष्टाविंशतिकलियुगस्य प्रथमचरणे श्रीमन्नृपतिविक्रमार्के समया
तीतसम्वत्सराणां समयेनातिक्रान्तानां मध्ये अमुकनामसम्वत्सरे अ
मुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकना
मदिवसनक्षत्रे अमुकनामहानक्षत्रे अमुकयोगे अमुकनामकरणे अमुकनाम
मुहूर्ते अमुकस्थसूर्ये अमुकस्थचन्द्रे भौ॰ पु॰ जी॰ भुक्ते॰ शनौ॰ राहौ॰ अमुकस्थिके
तौ स्वगुणविशेषविशिष्टायां अस्यामुकभावस्थायां अमुकगोत्रो अमुकराशिर
मुकशर्माहं सपत्नीकोहं अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनो अमुकवे
दाध्यायिनो अमुकशर्मणः प्रपौत्राय अमुकशर्मणः पौत्राय अमुकशर्मणः
पुत्राय आजन्मतेविजुस्वरूपिणे कन्यार्थिनेवराय अमुकनाम्ने पराय अमु
कगोत्रस्यामुकप्रवरस्यामुकशाखिनो मुकवेदाध्यायिनो मुकशर्मणः प्रपौ
त्रीं अमुकशर्मणः पौत्रीं अमुकशर्मणः पुत्रीं आजन्मतीं श्रीरूपिणीं व
रार्थिनीं अमुकनाम्नीमिमां कन्यां यथाशक्त्यलंकृतां यथाशक्त्युपकल्पित
यौतुकयुतां प्रजापतिदैवत्यां पुराणोक्तगुणिकां ज्योतिष्टोमातिरात्र
समस्तफलप्राप्तिकामः ममसमस्तपितॄणां निरतिशयसानन्द ब्रह्मलोका
वाप्त्यादि कन्यादानकर्त्योक्तफलावाप्तये अनेनवरेणास्मैकन्यायां प्रतीद

रामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वमाराधितत्वाद्वादशावरान् पितॄन्पवित्रीकर्तुं आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये
देवाग्निगुरुब्राह्मणसन्निधौ अग्निसाक्षिकतत्वासह धर्मचरणाय तुभ्यमहं सम्प्रदद्मि प्र
तिगृह्णातु भवान् इति दाता उत्थाय सकुशाक्षतजलं कन्याहस्तं वरहस्ते समर्पयेत् क
न्यापिता उत्थाय दानवाक्यं पठेत् कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् दास्या
मि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया १ विश्वंभराः सदेहिनः साक्षिराज्यः सर्वदेवताः
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च २ गौरीं कन्यामिमां विप्र यथाशक्ति विभू
षिताम् गोत्राय ब्रह्मणे तुभ्यं दत्तां विप्र समाश्रय ३ कन्यालक्ष्मीः समाख्याता वे
दानारायणः स्मृतः तस्मात्कन्याप्रदानेन कृष्णो मे प्रीयतामिति ४ इति कन्यादान
वाक्यानि ततः कन्यां प्राप्नुयात् कन्ये मम अग्रतो भूत्वा कन्ये मे दक्षिणपार्श्वयोः कन्ये मे
पृष्ठतो भूत्वा स्वदानान्मोक्षमाप्नुयाम् इति पठित्वा श्रीलक्ष्मीनारायणप्रीतये वर
कन्ययोः पूजनं कृत्वा प्रार्थयेत् त्रैलोक्यनाथ देवेश सर्वभूतदयानिधे दानेनाने
नक्रप्रीतः सदा शान्तिं प्रयच्छ मे ततो वरः ॐ देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहु
भ्यां पूष्णो हस्ताभ्यां प्रजापतेः प्रतिगृह्णामि वो स्वाददात् पृथिवीत्वा प्रतिगृ
ह्णातु ॐ स्वस्ति इत्युक्त्वा दक्षांगुष्ठं गृहीत्वा कामस्तुतिं पठेत् ॐ कोदात्कस्मा
ऽ अदात्कामोदात् कामायादात्कामो प्रतिगृहीता कामैतत्ते ततो दाता पुनः पठेत्
कन्यामम कुले जाता पालिता वत्सरा कृकम् तुभ्यं विप्र मया दत्ता पुत्रपौत्रविवर्द्धि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नी धर्मेचार्थे चकामेच नातिचरितव्यात्वया ॐ नातिचरामीति वरः प्रतिवदेत्
ततोदाताउपविश्य कन्यादानप्रतिज्ञांकुर्यात् तिलकुशजलान्यादाय अद्य
हअमुकोहं कन्यादानकर्मणः साकुशाक्षतं फलप्रतिज्ञामि कुर्यां इदं स्फवर्णं अ
ग्निदैवतं वराय तुभ्यं सम्प्रदेहि तथादास्यमानं गोतुकादिकं च वराय तुभ्यं सम्प्रदेहि
इति स्फवर्णं दद्यात् वरः ॐ स्वस्ती प्रतिवदेत् अथाचार्यः कन्यापिता तद्बान्धवादयो
पि यथाशक्ति गोतुकत्वेन स्फवर्णरजत ताम्रपित्तलपात्राणि गोमहिष्यश्च शय्या
दासीदासग्रामादिकं च वरकन्याभ्यां प्रयच्छन्ति केचिदेतद्धोमान्ते वदन्ति तद्
आचारतोधर्मतत्त्वम् अथाचारश्चिष्टाचारपरंपराप्राप्तं उभयोर्वरकन्ययोः कृत
रीतप्रान्तग्रन्थिकरणं मंगलद्रव्यसहितमामनन्ति तत्रद्रव्यपूगीफल सर्षपाक्षत
हरिद्राभिर्वरकन्ययोर्वस्त्राञ्चल ग्रन्थिं यज्ञोपवीतेन दृढं बध्वा कलशोपरि सं
स्थाप्य एतन्नाम्नादि ॐ भूर्भुवः स्वः अंचलग्रन्थे स्फप्रतिज्ञितो भव इति प्रति
ज्ञाप्य चतुर्थीकर्मदिवसे मोचयेत् ततोवरवध्वोः अंगुलीयकं लग्नात्पूर्व
सम्भवे अथावसरे छोलिकाभरणं वा ततोयथाशक्ति गोतुकादिकं दद्यात् तत्र प्र
थमं कन्यापक्षे एकस्मिन्कांस्यपात्रोपरि सर्वफलानि सम्भृत्य वा तदुपरि पिष्ट
तिलमोदकादि निखद्रव्याणि संस्थाप्य फलानि द्राक्षादाडिमपूगीफल जातीफ
ल नारिंगनालीकेर कदलीफलबीजपूर जम्बूजम्बीर निम्बूफलाम्रफल पनस

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातृकुलोक्त दण्डोत्तरणि रौप्यादि कांस्यपात्रोपरि स्थापितानि पति पुत्रवतीनां
स्त्रीणां हस्तेन कुमारी छोलिकां दद्यात् मन्त्रः ॐ आः फलिनि ऽ अफला ऽ अ
पुष्पाया अपुष्पिणीः बृहस्पति प्रसूतास्तानो मुञ्चन्त्वंहसः इति गृहीत्वा भद्रंक
र्णाभिरिति मंत्रं पठित्वा कन्यावराय प्रयच्छति अथ कन्यापितावरपिता च आचार्य
ह पंचसपूलडुकानि सद्रव्याणि ब्राह्मणेभ्यो दद्यात् ततो वरपक्षेपि आचार्य प्रा
पूं महालडूकादि छोलिकाभरणं कुर्यात् शाल्यादि पिष्टघटित लवंगेलामरि
च कर्पूरजातीफल जातीपत्रादि सुगंधिद्रव्यमिश्रित पिष्टतिलमहालडूका
नि अपूपशष्कुली मोहालिका फेणिकादि विविध पक्वान्न युत सर्पिघृत
पाचितानि रौप्यादि कांस्यपात्रोपरि स्थापितानि पति पुत्रवती हस्तेन गृही
त्वा प्रयच्छेत् मंत्रः ॐ अन्नपते ऽ न्नस्येना धेह्यनमीवस्य शुष्मिणः प्रप्रदाता
रंतारिष ऽ ऊर्जं नो धेहि द्विपदे चतुष्पदे ततो वासांसि हरितपीताश्वेतरक्तनील
भाङ्गिष्ठ कौसुम्भकाश्मीरयक्षकर्दम मृगमदादि नानारागरंजितानि विचित्र
कार्पास कौशेय पट्टसूत्रतूलनस्वर्ण सूत्रान्वितानि नानादिदेशजातानि बहुक्रय
क्रीतानि बहुमोल्यानि नानानामधेयानि दुकूलोत्तरीय कञ्चुकादीनि रौप्या
दि कांस्यपात्रोपरि स्थाप्य मंत्रः ॐ यदश्वाजवासउपस्तृणन्त्यधिवासं याहि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राजान्यस्मै संदानमर्थं पट्टी श्रं प्रियादेवेभ्यावामयंति परिधेयभूषणानि मणिमो
क्तिकहीरक गारुत्मत मरकत पुष्परागनीलमहानीलेन्द्र वैडूर्यगोमेदादि महार्घवि
विधोपलशोभित स्वर्णरत्नकटकेमूर्ध्यादांगुलीयक काञ्चीहारग्रैवेयकग
सिकाभरण तिलक तांटक स्वर्णपुष्पकंकण करांगुलीयक बाहुबन्धकिरीटशिरः
पुष्पादीनिविविधस्वर्णशृंखला पट्टसूत्रग्रथितानि नानानामधेयानिभूषणानि
रौप्यादिकांस्यपात्रोपरिस्थाप्य मन्त्रः ॐ रूपेणवोरूपमभ्यागांत योपोविश्वेवदा
विभजत ऋतस्यपथाप्रचर चंद्रदक्षिणाविश्वेः पश्यन्तारिक्षं वतस्वसदस्ये ॐ
स्वर्णाधर्मः स्वाहा ॐ स्वर्णार्कः स्वाहा ॐ स्वर्णज्योतिः स्वाहा स्वर्णसूर्यः स्वाहा
इतिछोलिकाभरणम् अथकन्यापितादक्षिणासंकल्पकर्म्यात् अद्येहेत्यादि
अमुकगोत्रो अमुकशर्मा सपत्नीकोहं श्रुतिस्मृतिपुराणोक्त फला
वाप्तये श्रीलक्ष्मीनारायणप्रीतये कन्यादानकर्मणः साङ्गफलप्राप्तये इमांभू
षसींदक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्योदीनानाथेभ्यो नटनर्तकगाम
केभ्यश्च विभज्यदास्ये ॐ तत्सत् इतिसंकल्प्य ब्राह्मणेभ्योदक्षिणांदत्वा अभि
षेकतिलक मंत्रपाठादिकंकारयेत् अत्रावसरेगायंत्रोवृद्धाः पुरंध्रयोवरदत्तानि
भूषणानिवासांसिच कन्यांपरिधापयंति सम्यक्शृंगारादिना भूषयंतिच
अथवरःपित्राप्रत्तामादाय निष्क्रामयति अस्माकः पित्राजनकेन प्रत्तांसंक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्यदत्तां आदाय प्रतिग्रहविधिना प्रतिगृह्य हस्तगृहीत्वा गृहामध्यान्मंडपा दावाग्निस
मीपंगन्तुं निष्क्रामतीति अथाग्नेः समीपंगच्छन्तौ वधूवरौ कन्यापिता परस्परं समीक्षे
थामिति प्रैषेण समीक्षयति ततः प्रेषितोवरः समीक्षमाणौ कन्यां अनुरागेण समीक्ष
माणाः चतुरो मंत्रान्पठति अघोरचक्षुरित्यादीनां च तुर्णां मंत्राणां प्रजापतिर्ऋषि
स्त्रिष्टुप्छन्दः कुमारीदेवता परस्परमीक्षमाणौ विनियोगः ॐ अघोरचक्षुरपतिघ्न्येधि
शिवापशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामास्योना शन्नो भव द्विपदे शं चतुष्पदे ।
ॐ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनु
ष्यजाः २ ॐ सोमो ददद्गंधर्वाय गंधर्वो ददग्नये रयिं च पुत्रांश्चादादग्निर्मह्य
मथो इमाम् ३ ॐ सा नः पूषन्निह वतमोमैरयसा सुशेवातीविहरः यस्यामुशन्तः
प्रहरामशेवं यस्यामुकामा बहवो निविष्टे ४ एवं मंत्रचतुष्टयं पठित्वा निष्क्र
मणीकुर्यात् ततो मंत्रः यदेमीत्याथर्वणाऋषि रनुष्टुप्छन्दोलिंगोक्तदेवता
निष्क्रमणे विनियोगः ॐ यदेमि मनसा दूरं दिशो पवमानो वा हिरण्यपर्णो वै
कर्णः सत्वामन्मनसा कोतु अस्तो अमुकीलकमीति सम्बुध्यन्तं नाम गृह्णीयात्
ततः स्वदक्षिणाहस्तेन वध्वा वामकरं गृहीत्वा विवाहशालातोऽग्निसमीपंगन्तुं
बहिर्निष्क्रामति अत्र निष्क्रमणात्पूर्वं आमूर्द्धाभिषेकात् कश्चिद्ब्राह्मणः जल
पूर्णकुंभं स्कन्धे धृत्वा वाद्यतत्परतस्तिष्ठेत् अथ वरो वध्वाः सह बहिः शाला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भागत्याग्निं प्रदक्षिणीं कृत्य वधूं दक्षिणतः कृत्वा दक्षिणस्मै तृणपुत्रिकां वटेषा
प्रहृत्योल्लंघ्य दक्षिणपादमग्रतः कृत्वा उपविशति ततोवरस्त्रिराचम्य त्रिः प्राणाना
यम्य वधूं दक्षिणत उपवेश्य अर्घ्यं संस्थाप्य प्रधानसंकल्पं कुर्यात् अद्येह
त्यादि अमुकगोत्रो अमुकराशिरमुकशर्माहं धर्मार्थकामसिद्धिद्वारा ॐतत्सत्
श्रीपरमेश्वरप्रीतये ब्राह्मविधिनापितृदत्तामिमां गौरीं कन्यां विवाहयिष्ये
तत्पूर्वाङ्गतया विवाहहोमकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मकर्तुं ब्रह्म
णः पूजनपूर्वकं वरणं करिष्ये इति संकल्प्य भूमिदेवायेति ब्रह्मणे अर्घं
दत्वा गन्धाक्षतपुष्पैः सम्पूज्य वरणसामग्रीं करे कृत्वा एभिर्गंधाक्षत पुष्प
पूगीफल द्रव्यवासोभिः विवाहकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मक
र्तुं अमुकशर्माणं ब्रह्मत्वेन त्वामहं वृणे वृतोस्मीति प्रत्युक्तिः एवमुत्तरासने
वृतो ब्रह्मा पूर्वकल्पितदक्षिणासने उपविशेत् ततो ब्रह्मोपवेशनादि पर्यु
क्षणान्तं कर्म कुर्यात् ततः प्रणीताप्रणयनाज्यासादनान्ते विशेषोपकल्प
नीयानि वस्तून्यासादयेत् शमीपालाशमिथाः लाजाः अखण्डाक्षतान्लोहित
मानडुहं चर्म कुशाग्रभ्रातानवीनं तृणम् आचार्योपयोगद्रव्यम् ततः पर्यु
क्षणान्तं कर्म कृत्वा यथादेवताभिध्यानं करोति अद्येह अमुकोहं विवाहकर्म
णि तत्र प्रजापतिमिन्द्रमग्निं सोममग्निं वायुं सूर्यं अग्निवरुणावग्नि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वरुणावग्निंवरुणंसवितारं विष्णुंविश्वान्मरुतः सर्वान्वरुणमिति प्रजापतिंऋतुनासाह
ऋतधामानिंअग्निं गंधर्वं ४ ओषधीप्सरसोमुदः २ सञ्जहितविश्वसामानं सूर्यं
गंधर्वं ४ मरीचीप्सरस आवृः २ सुकुर्मांसूर्यरश्मिं चन्द्रमसंगंधर्वं ४ नक्षत्राण्य
प्सरसोभेकुरीः २ इन्द्रिरंविश्वव्यचसंवातंगंधर्वं अपोः अप्सरस ऊर्ज्जः २ भुज्यंक
पर्णं वर्क्षंगंधर्वं ४ दक्षिणाअप्सरसस्तावाः २ प्रजापतिंविश्वकर्म्माणं मनोगंधर्वं ४
ऋतवसामान्यप्सरसस्कूः २॥ ४२ चित्तं १ चित्तिं १ आकूतं १ आकूतिं १ विज्ञातं १ विज्ञातिं १
मनः आक्कूतिं १ दृष्टं १ पौर्णमासं १ बृहतं १ रथंतरं १ प्रजापतिं १ जयं १ इन्द्रं १ १५ अग्निंभू
तानामधिपतिं १ इन्द्रंभ्रातानामधिपतिं १ यमंपृथिव्यानामधिपतिं १ वायुमंतरिक्ष
स्याधिपतिं १ सूर्यंदिवाधिपतिं १ चन्द्रमसंनक्षत्राणामधिपतिं १ बृहस्पतिंब्रह्म
णोधिपतिं १ मित्रंसत्यानामधिपतिं १ वरुणमपामधिपतिं १ समुद्रंस्रोत्यानाम
धिपतिं १ अन्नंच साम्राज्यानामधिपतिं १ सोमंओषधीनामधिपतिं १ सवितारं
प्रसवानामधिपतिं १ रुद्रंपशूनामधिपतिं १ त्वष्टारंरूपाणामधिपतिं १ विष्णुं
पर्वतानामधिपतिं १ मरुतोगणानामधिपतीन् २ पितॄन् २ पितामहान् २ प्रपितॄन् १
अवरान् २ तत्तान् २ तत्तामहान् २ २२ अग्निं १ अग्निं १ अग्निं १ वैवस्वतं १ मृत्युं
चाजमेनाहंयक्षे अत्रावसरकन्यादेवताभिध्यानंकरोति अर्य्यमाणमग्निं १
अर्य्यमाणमग्निं २ अर्य्यमाणमग्निं २ भगं ४ लाजैरहंयक्षे पुनर्वरः प्रजापतिं १

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्निं स्विष्टकृतं २ चाज्येनाहुयक्षे इदमाज्यं मयापरित्यक्तं यथादेवतमस्तु इमेला
जाप्यमयापरित्यक्ता यथादेवतमस्तु एवं कृत्वा आगं विधाय अग्निं प्रज्वाल्य
नन्तरं इत्यादि ॐ भूर्भुवः स्वः योजकनामाग्नेस्त्वं प्रतिमृतो भव वरदो भव ॐ अग्नि
प्रज्वलितं ॐ चत्वारि इति मंत्राभ्यां अग्निध्यानादि नीराजनान्तं सम्पूज्य दक्षि
णां जान्वाच्य ब्रह्मणा वाचयिष्यामि मनसा प्रजापतिं ध्यात्वा आघारावाज्यभागौ जुहु
यात् ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वाहा इदमिन्द्राय ॐ अ
ग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय ततो महाव्याहृतिहोमः
कार्यः ततो दक्षिणासंकल्पः अद्येह अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं
आघारावाज्यभागौ महाव्याहृतिसर्वप्रायश्चित्तहोमस्य सांगतासिद्ध्यर्थं इमां द
क्षिणां आचार्यब्रह्मभ्यां विभज्य दास्ये ॐ तत्सत् इति दद्यात् आचार्यब्र
ह्मणौ च मन्त्रान्निमंत्रयेतां यथा उत्सर्गे चतुर्थे च कर्मणि विघ्नानां सह
तुम्भिपुम्भिकेतनित्य मुभयोः स्त्रीकुमारयोः इति अथ राज्ञ्यभ्यां होमः ऋतावा
डिति प्रजापतिर्ऋषिः अनुष्टुप् छन्दः ऋतावाजुतधामाग्निर्गंधर्वो देवता होमे वि
ॐ ऋतावाजुत धामाग्निर्गंधर्वः सनः इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्
इदमृतसाहे ऋतधाम्ने अग्नये गंधर्वाय पुनः ऋतावाडिति प्रजापतिर्ऋषि
र्मिथुनः छन्दः ओमधयो मत्सोमदेवता होमे ॐ ऋतावाजुतधामाग्नि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गंधर्वं स्तस्यौमधयो मरसो मुदो नामताभ्यः स्वाहा इदमोमधीभ्योमरोभ्यो मु
दभ्यः मश्च हितइतिप्रजापतिर्ऋषिः मंजुष्छन्दः मश्च हितोविश्वसामा सूर्योगंध
र्वो देवताहोमे वि० ॐ मश्च हितोविश्वसामासूर्यो गंधर्वः मनइदं ब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट् इदंश्च मश्च हिताभ्य विश्वसामे सूर्याय गंधर्वाय पुनः म
श्च हितइतिप्रजापतिर्ऋषिः मंजुष्छन्दः मरीचयोमरसऽआयवोनामताभ्यः
स्वाहा इदं मरीचिभ्योमरोभ्य आयुभ्यः मुञ्जा मुञ्जाइति प्रजापतिर्ऋषिः मं
जुष्छन्दः मुञ्जाः सूर्यरश्मिश्चन्द्रमागंधर्वो देवताहो० ॐ मुञ्जाः सूर्य
रश्मिश्चन्द्रमागंधर्वः मनइदं ब्रह्मक्षत्रं पातुतस्मै स्वाहावाट् इदं मुञ्जाभ्य
सूर्यरश्मये चन्द्रमसेगंधर्वाय पुनः मुञ्जाइतिप्रजापतिर्ऋषिः मंजुष्छन्दः
नक्षत्राण्यप्सरसो भेकुरयोदेवताहो० ॐ मुञ्जाः सूर्यरश्मिश्चन्द्रमागंधर्व
स्तस्यनक्षत्राण्यप्सरसो भेकुरयो नामताभ्यः स्वाहा इदं नक्षत्रेभ्योमरोभ्यो
भेकुरीभ्यः इमिरइतिप्रजापतिर्ऋषिः मंजुष्छन्दः इमिरोविश्वव्यचा वातोगं
धर्वो देवताहो० ॐ इमिरोविश्वव्यचा वातोगंधर्वः मनइदं ब्रह्मक्षत्रं पातु त
स्मैस्वाहावाट् इदमिमिराय विश्वव्यचसे वाताय गंधर्वाय पुनरिमिरइति
प्रजापतिर्ऋषिः मंजुष्छन्दः आपोमरस ऊर्जोदेवता होमे वि० ॐ इमिरोवि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्वव्यचावातोगंधर्वः स्तस्मापोपसरस ऊर्जोनामताभ्यः स्वाहा इदमद्भ्योपसरोभ्य
ऊर्ध्वभ्यः भुज्युरिति प्रजापतिर्ऋषिर्मंत्रोक्तः भुज्युरुक्षपर्णो मंत्रोगंधर्वो देव
ताहोमे ॐ भुज्युरुक्षपर्णो मंत्रोगंधर्वः सनइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्
इदं भुज्यवेक्षपर्णाय मंत्राय गंधर्वाय पुनः भुज्युरिति प्रजापतिर्ऋषिर्मंत्र
ऋक्छन्दो दक्षिणापसरसस्तावा देवताहोमे वि० ॐ भुज्युरुक्षपर्णो मंत्रोगंधर्व
स्तस्मै दक्षिणापसरसस्तावा नामताभ्यः स्वाहा इदं दक्षिणाभ्योपसरोभ्य स्ता
वाभ्यः प्रजापतिरिति प्रजापतिर्ऋषिर्मंत्रोक्तः प्रजापतिर्विश्वकर्मामनो
गंधर्वो देवताहोमे विनियोगः ॐ प्रजापतिर्विश्वकर्मा मनोगंधर्वः सनइदं
ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट् इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय
पुनः प्रजापतिरिति प्रजापतिर्ऋषिर्मंत्रोक्तः ऋक्सामान्यप्सरसो एमृ
ता देवताहोमे वि० ॐ प्रजापतिर्विश्वकर्मा मनोगंधर्वस्तस्य ऋक्सामा
न्यप्सरस एमृता नामताभ्यः स्वाहा इदमृक्सामभ्योपसरोभ्य एमृताभ्यः
अत्रापि दक्षिणा अद्येह अमुकगोत्रो अमुकशर्मा सपत्नीकोऽहं कृतैतद्व्रतसाङ्गतासि
द्ध्यर्थं साङ्गफलप्राप्तये साङ्गतासिद्ध्यर्थं इमां दक्षिणां आचार्यब्रह्मभ्यां
यथासंख्येन दास्ये ॐ तत्सत् मंत्रपाठः गोविन्दोगोकुलेशेय गोपीभिश्चहेः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सह नुम्भिपुम्भिकरोनित्य मुभयोः स्त्रीकुमारयोः इतिराक्षुभ्हामः प्रक्षेजयोहामः चित्तं
चेत्यादीनां त्रयोदशानां त्राणां परमेष्ठी ऋषि अनुष्टुप्छन्दः चित्तादयोमंत्रास्तता देवताः
प्रतिमंत्रं होमविनियोगः प्रत्यक्षं चित्तंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः चित्तंदेवताहोमे०
ॐ चित्तं चस्वाहा इदंचित्ताय ॐ चित्तिभ्येति परमेष्ठी ऋषिरनुष्टुप्छन्दः चित्तिर्देवता
होमवि० ॐ चित्तिभ्यस्वाहा इदंचित्तिभ्य आकूतंचेति परमेष्ठी ऋषिरनुष्टुप्छन्दः आकू
तंदेवताहोमवि० ॐ आकूतंचस्वाहा इदमाकूताय आकूतिभ्येति परमेष्ठी ऋषिरनु
ष्टुप्छन्दः आकूतिर्देवताहो० ॐ आकूतिभ्य स्वाहा इदमाकूतिभ्य विज्ञातंचेति परमेष्ठी
ऋषि अनुष्टुप्छन्दः विज्ञातंदेवताहो० विज्ञातंचस्वाहा इदंविज्ञाताय विज्ञातिभ्येति
परमेष्ठी ऋषिरनुष्टुप्छन्दः विज्ञातिर्देवताहो० विज्ञातिभ्यस्वाहा इदंविज्ञातिभ्य मन
भ्येतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः मनोदेवताहो० ॐ मनसभ्यस्वाहा इदंमनसाय
शक्वरीभ्येतिपरमेष्ठी ऋषि अनुष्टुप्छन्दः शक्वर्योदेवताहो० ॐ शक्वरीभ्यस्वाहा
इदंशक्वर्यै दर्शंचेतिपरमेष्ठी ऋषि अनुष्टुप्छन्दः दर्शोदेवताहो० ॐ दर्शंचस्वाहा
इदंदर्शाय पौर्णमासंचेतिपरमेष्ठी ऋषि अनुष्टुप्छन्दः पौर्णमासदेवताहो० ॐ पौ
र्णमासस्य स्वाहा इदंपौर्णमासाय बृहच्चेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः बृहद्दे
वताहो० ॐ बृहच्चस्वाहा इदंबृहते रथंतरंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः रथं
तरंदेवता होमः रथंतरंचस्वाहा इदंरथंतराय प्रजापतिरितिपरमेष्ठी ऋषिरनु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जुष्टं दः प्रजापतिर्देवतोहो॰ ॐ प्रजापतिर्जयानिन्द्राय वृत्रे प्रायच्छदुग्रः पृतनाजयेषु
तस्मै विशः समनमन्तसर्वाः स उग्रः स उ हव्यो बभूवः स्वाहा इदं प्रजापतये जयानि
न्द्राय उदकस्पर्शः तेनादक्षिणां ग्रेवहं अमुकगोत्रोऽमुकप्रवरोऽमुकशर्मासवर्मा वा चित्रादिहोमक
र्मणः साङ्गफलप्राप्तये साङ्गुल्याद्यं इमां दक्षिणां आचार्याय ब्रह्मभ्यो यथांशेन
दास्ये ॐ तत्सत् अभिषेकः चैरंजीव्यं महोगजाश्विनाद्याश्च दिवौकसः प्रकृत्य
नुकेवा ऽच्छा मुभयोः स्त्रीकुमारयोः इति जयाहोमः अथ भ्यातानेहोमः अग्नि
भूतानामधिपः तीत्यादि पितरः पितामहा इत्यन्तानामभ्रादशमेत्राणां प्रजा
पतिर्ऋषिः त्रिष्टुप्छन्दोमंत्राम्नाता अग्न्यादिदेवताः प्रतिमन्त्रं होमे विनियोगः
अन्यच्च अग्निभूतानामधिपतिरिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निभूतानां
मधिपतिर्देवतोहो॰ ॐ अग्निभूतानामधिपतिः समावत्वस्मिन् ब्रह्मराजन्यस्मि
न्क्षत्रे ऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याम् स्वाहा
इदमग्नये भूतानामधिपतये इन्द्रोऽग्नेभूतानामधिपतिरिति प्र॰ त्रि॰ इन्द्रोऽग्नेभूता
नामधिपतिर्देवता होमे ॐ इन्द्रोऽग्नेभूतानामधिपतिः समावत्वस्मिन् ब्रह्म
राजन्यस्मि॰ देवहूत्याम् स्वाहा इदमिन्द्राग्नेभूतानामधिपतये यमः पृथि
व्यानामधिपतिरिति प्र॰ त्रि॰ यमः पृथिव्यानामधिपतिर्देवता होमे ॐ यमः पृ
थिव्यानामधिपतिः समावत्वस्मिन्॰ देवहूत्याम् स्वाहा इदं यमाय पृथि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यानामधिपतये पित्र्यत्वादुदकस्यः वायुरंतरिक्षस्याधिपतिरिति प्र॰ त्रि॰ वा
युरंतरिक्षस्याधिपतिर्देवता हो॰ ॐ वायुरंतरिक्षस्याधिपतिः समा॰ देवकृत्वा
स्वाहा इदं वायवे अन्तरिक्षस्याधिपतये सूर्योदिवोधिपतिरिति प्र॰ त्रि॰ सूर्यो
दिवोधिपतिर्देवता हो॰ ॐ सूर्योदिवोधिपतिः समावत्यस्मिन्॰ इदं सूर्यायदि
वोधिपतये चन्द्रमानक्षत्राणामधिपतिरिति प्र॰ त्रि॰ चन्द्रमानक्षत्राणामधिपति
र्देवता हो॰ ॐ चन्द्रमानक्षत्राणामधिपतिः समा॰ इदं चन्द्रमसेनक्षत्राणामधिप
तये बृहस्पतिर्ब्रह्मणोधिपतिरिति प्र॰ त्रि॰ बृहस्पतिर्ब्रह्मणोधिपतिर्देवता हो॰
ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समा॰ इदं बृहस्पतये ब्रह्मणोधिपतये मित्रः
सत्यानामधिपतिरिति प्र॰ त्रि॰ मित्रः सत्यानामधिपतिर्देवता हो॰ ॐ मित्रः स
त्यानामधिपतिः समा॰ इदं मित्राय सत्यानामधिपतये वरुणोमपामधिपति
रिति प्र॰ त्रि॰ वरुणोमपामधिपतिर्देवता हो॰ ॐ वरुणोऽपामधिपतिः समा॰ इदं
वरुणायापामधिपतये ॐ समुद्रः स्रोत्यानामधिपतिरिति प्र॰ त्रि॰ समुद्रः स्रो
त्यानामधिपतिर्देवता हो॰ ॐ समुद्रः स्रोत्यानामधिपतिः समा॰ इदं समुद्रा
य स्रोत्यानामधिपतये अन्नश्च साम्राज्यानामधिपतिरिति प्र॰ त्रि॰ अन्नश्च
साम्राज्यानामधिपतिर्देवता हो॰ ॐ अन्नश्च साम्राज्यानामधिपतिः समा॰

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदमन्नाय साम्राज्येनाधिपतये सोमश्चौषधीनामधिपतिरिति प्र॰ त्रि॰ सोम
श्चौषधीनामधिपतिर्देवता हो॰ ॐ सोमश्चौषधीनामधिपतिः समा॰ इदं सोमाय
चौषधीनामधिपतये सविता प्रसवानामधिपतिरिति प्र॰ त्रि॰ सविता प्रसवाना
मधिपतिर्देवता हो॰ ॐ सविता प्रसवानामधिपतिः समा॰ इदं सवित्रे प्रसवाना
मधिपतये ॐ रुद्रः पशूनामधिपतिरिति प्र॰ त्रि॰ रुद्रः पशूनामधिपतिर्देवता हो॰
ॐ रुद्रः पशूनामधिपतिः समा॰ इदं रुद्राय पशूनामधिपतये त्वष्टा रूपाणा
मधिपतिरिति प्र॰ त्रि॰ त्वष्टा रूपाणामधिपतिर्देवता हो॰ ॐ त्वष्टा रूपाणामधि
पतिः समा॰ इदं त्वष्ट्रे रूपाणामधिपतये विष्णुः पर्वतानामधिपतिरिति प्र॰ त्रि॰
विष्णुः पर्वतानामधिपतिर्देवता हो॰ ॐ विष्णुः पर्वतानामधिपतिः समा॰ इदं वि
ष्णवे पर्वतानामधिपतये मरुतो गणानामधिपतिरिति प्र॰ त्रि॰ मरुतो गणाना
मधिपतिर्देवता हो॰ ॐ मरुतो गणानामधिपतिः समा॰ इदं मरुद्भ्यो गणाना
मधिपतिभ्यः पितरः पितामहा इति प्रजापतिर्ऋषिः त्रि॰ पितरः पितामहा
परपरस्तता तत्तामहा देवता हो॰ वि॰ ॐ पितरः पितामहाः परे परस्ता स्तता
महा स्तमावत्यस्मिन्॰ इदं पितृभ्यः पितामहेभ्यः परेभ्यो परस्तेभ्य
स्तत्तामहेभ्यः एतेऽष्टादशमन्त्राः अग्न्यातानसंज्ञाः पूरणोदकस्य गोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रापिदक्षिणा अग्नेहित्यादि अमुकगर्भा सवधूकोहं अभ्यातानेहोमस्य साङ्गफ
लप्राप्त्यै साङ्गतासिद्ध्यर्थं इमांदक्षिणां आचार्यब्रह्मभ्यां अहंसांप्रदास्ये ॐतत्स
त् मंत्रपाठः उत्सर्गचतुर्णांच करणोक्तिनामह नुक्तिनुक्तिकरणनित्य सुभगाः
स्त्रीकुमारयोः अथपरान्नादिपञ्चकहोमः अग्निरत्वित्यादीनां चतुर्णां मंत्रा
णां प्रजापतिऋषिर्यजुश्छन्दो ग्निर्देवताहोमेवि० अन्यत्र अग्निरतुरितिप्रजा
पतिऋषिर्यजुश्छन्दः अग्निर्देवताहो० ॐ अग्निरेतुप्रथमोदेवानाꣳ सोस्ये
प्रजामुञ्चतु मृत्युपाशात् तदग्नि राजावरुणोऽनुमन्यतां यथेयꣳ स्त्रीमघ
वन्नपोदात्स्वाहा इदमग्नये इमामग्निरिति प्रजापतिऋषिर्यजुश्छन्दः अग्निर्दे
वताहो० ॐ इमामग्निस्त्वायतां गार्हपत्यः सोस्ये प्रजामस्यै नयतु दीर्घमायुः
अमून्यो पत्न्या जीवतामस्तु मातापौत्रमानन्दमभिबुध्यतामियꣳ स्वाहा
इदमग्नये स्वस्तिनइतिप्रजापतिऋषिर्यजुश्छन्दः अग्निर्देवताहोमेवि०
ॐ स्वस्तिनोअग्नेदिवा पृथिव्याविश्वानिधेह्यथा यदत्र यदस्मासिहिदि
वि जातंप्रशस्तं तदस्माभूद्रविणंधेहिचित्रꣳ स्वाहा इदमग्नेय सगन्निति
प्रजापतिऋषिर्यजुश्छन्दः अग्निर्देवताहो० ॐ सगन्तुपन्थाम्पृदिशान्नः ए
हि ज्योतिष्मन्मध्ये कृजानुः आजुः अपेतमृत्युरमृतम्नः आगाद्वैवस्वतोनो
ऽअभयंकरोतुस्वाहा इदंवैवस्वताय अत्रग्निमृचाराष्ट्रधूं वस्त्रेणान्तर्धाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनसामन्त्रंपठन् परंमृत्यवितिसंक भुकत्रृमि स्त्रिष्टुप्छन्दो मृत्युर्देवताहो॰ ॐ परंमृत्यो
ऽनुपरेहिपन्थां यस्तेऽन्यऽइतरोदेवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजां
रीरिषोमोतवीरान्स्वाहा इदंमृत्यवे प्रणीतोदकस्पर्शः अत्रापिदक्षिणाग्रेवह अमुक
ग्राम्यामपत्नीकोहं कृतेतदग्न्यादि पञ्चकेहोमस्य साङ्गफलप्राप्त्यै साङ्गुरायां
मं इमांदक्षिणां आचार्य्यब्रह्मभ्यां यथाशक्तिनदास्ये ॐ तत्सत् मंत्रपाठः गोविन्दो
गोकुलनिलयः गोपीभिर्विहरन्सह नृभिः पुम्भिः कीर्णानित्य मुभयोः स्त्रीकुमारयोः
तत आचम्य अथपाणिग्रहणांगभूतो लाजाहोमः अत्रकन्याः कर्तृत्वम् आ
ज्यभानस्तुमेपतिरिति मन्त्रलिङ्गात् संहितेनानिमृती जुहोतीतिवचनात् तत्रानि
मृतीकुमारी अञ्जलिंविदधाति वरश्चतिमृत्युकुमार्य्या अञ्जलिमालभते अथकु
मार्य्या ज्येष्ठः कनिष्ठोवाभ्राता लौकिकाग्निमिद्धान् लाजान् घृतेनाभिघार्य्य
सम्प्रोक्ष्य नवीनसूर्पेचतुर्द्वाक्षत्वा तेभ्येकंभागंकुमार्य्यञ्जलावावपति कुमारी
चताञ्जलिनागृहीत्वा प्राङ्मुखीतिष्ठती मन्त्रंपठन्ती जुहुयात् अर्य्यमणमि
त्याथर्वणात्रृमि रनुष्टुप्छन्दः अर्य्यमादेवता लाजाहोमविनियोगः ॐ अर्य्य
मांदेवं कन्याग्निमयक्षत सनोऽअर्य्यमादेवः प्रेतोमुञ्चतुमापतेस्वाहा
इत्यमर्य्यमो इत्यञ्जलिस्थलाजानां तृतीयांसंजुहोति नात्रसंभ्रवधारणं
ग्रोअस्यहोमस्यमाणत्वात् कुर्यान्नारीत्याथर्वणात्रृमि रनुष्टुप्छन्दः अर्य्यमा
देवतालाजाहोमवि॰ ॐ इमेनाऽऽपवृते लाजानावपन्तिका आयुष्मानस्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेपति रेधंताज्ञातयोममस्वाहा इदमग्नयेइदं जुहोति इमाँल्लाजानित्मा-
थर्वणात्रृषिरनुष्टुप्छन्दोग्निर्देवता लाजाहोमेवि० ॐ इमाँल्लाजानावपाम्यग्नौ समृ
द्धिकरणंनव ममनुभवंचसंवदनं तदग्निरनुमन्यतां मियश्च स्वाहा इदमग्नये इतिस
वारलाजान् जुहोति अथवेरावध्वाः सांगुष्ठं दक्षिणाहस्तमुत्तानंकृत्वा गृह्णाति तत्र
मंत्राः गृह्णामीत्यादीनां चतुर्णांमंत्राणां याज्ञवल्क्यभारद्वाजा अथर्वणाप्रजापतऋ
षयः त्रिष्टुपनुष्टुबुष्णिग्जगत्यश्छन्दांसि भगोर्यमासविता पुरन्ध्र्योदेवताः वधू
पतिग्रहणेवि० ॐ गृभ्णामिते सौभगत्वायहस्तं मयापत्याजरदष्टिर्यथासः भगो
र्यमासविता पुरन्धिर्मह्यन्त्वा दुर्गार्हपत्यायदेवाः ॐ अमोहमस्मि सात्वं
सात्वमस्यमोऽहम् सामाहमस्मि ऋक्त्वं द्यौरहंपृथिवीत्वम् ॐ तावेहि
विवहावहै सहरेतोदधावहै प्रजांप्रजनयावहै पुत्रान्विदावहैबहून् ॐ तेसन्तु
जरदष्टयः संप्रियोरोचिष्णू सुमनस्यमानौ पश्येमशरदः शतंजीवेमशरदः शतं
शृणुयामशरदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतंभूयश्चशरदः
शतात् अग्नेनयसुपथाराये अस्मान् अमोहमस्मि अग्नेरुत्तरतः स्थित्वेऽग्नि वेरावध्वाः दक्षि
णांपादं स्वदक्षिणहस्तेनगृहीत्वा मंत्रपठन् स्थापयेत् अमोहमस्मीत्यस्याथ
र्वणात्रृषि रनुष्टुप्छन्दोवधूर्देवता अश्मारोहणेविनियोगः ॐ आरोहेममश्मा
नमश्मेवत्वं स्थिरोभव अभितिष्ठपृतन्यतो ववाधस्वपृतनायतः इतिताम्रश्मा
न्यारोप्य तस्याः शिरसिहस्तंनीत्वा वरोगायांगायामि सरस्वतीप्रेदमिनिवि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वामित्रऋषिरनुष्टुप्छंदः सरस्वतीदेवता गाथागानेविनियोगः ॐ सरस्वतीप्रेदभव
सुभगेवाजिनीवति यांत्वाविश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यांभूत सुसमभव
घस्यांविश्वमिदंजगत् नामघगाथांगास्यामि यास्त्रीणामुत्तमंयशः इति गाथागा
नंवरस्यैव त्रयवधूवरौ प्रदक्षिणामग्निंपरिक्रामतः वरएवमंत्रंपठेत् तुभ्यमग्न
इत्यामंत्रणऋषिरनुष्टुप्छन्दो ग्निर्देवता परिक्रमणेवि० ॐ तुभ्यमग्नेनपर्यवह
न्सूर्यां वहतुनासह पुनः पतिभ्योजायांदा ऽग्नेप्रजयासह इतिपठेत् सवधू
कः परिक्रामेत् एवंपुनर्वारद्वयं लाजाहोमपाणिग्रहणाश्मारोहण गाथागानि
परिक्रमणानिकृत्वा तृतीयपरिक्रमणानन्तरं कुमार्याभ्रातास्तूष्णीकोणप्रदेशेन
सर्वान्लाजान्कुमारीहस्तेददाति साचतीमृतौ जुहोति ॐ भगायस्वाहा इदंभगा
य इतिकृत्वा ततः समाचारं तूष्णीं चतुर्थपरिक्रमणंकृत्वा यथास्थानमागत्वो
पविश्य ब्रह्मणान्वारब्धो मनसाप्रजापतिंध्यात्वा ॐ अग्नेप्रजापतेस्वाहा
इदमग्नेप्रजापतये इतिकृत्वा अथाचारात् समस्वेनाः कुशाः घृताक्ताः सप्त
वर्त्तिकाः प्रज्वाल्य तराडुलमध्येस्थाप्य कोपवर्यांदक्षिणापादक्रमेण मंत्रान्प
ठन् एनामुदीचीं सप्तपदानिनिक्रामयति मन्त्राः ॐ एकमिषेविष्णुस्त्वानयतु
ॐ द्वेऊर्जेविष्णुस्त्वानयतु २ ॐ त्रीणिरायस्पोषायविष्णुस्त्वानयतु ३ ॐ च
त्वारिमायोभवायविष्णुस्त्वानयतु ४ ॐ पञ्चपशुभ्योविष्णुस्त्वानयतु ५ ॐ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मद्भ्यो विष्टुस्त्वानयतु इति मन्त्रैः मद्वर्तिकाः क्रमेण निर्वाप्य सप्तमीं ज्वलं
नीमेवस्यापत्यतिवधूः तत्र सप्तमो मन्त्रः ॐ सर्वे सप्तपदा भव सामामनुव्रता भव वि
ष्टुस्त्वानयतु ७ अथ वरः निष्क्रमणात्पूर्वं स्वरक्षितान् उत्तरोपाग्मनस्थित
द्विजस्कंधस्थितान् उदकुम्भानुदकमादाय पिञ्जूलेन दूर्वामुद्धृत्य पल्लवितशाख
यावा वधूं मूर्द्धन्यभिषिञ्चति ॐ आपः शिवाश्चेति प्रजापतिर्ऋषिः प्रतिष्ठा छन्दः आ
पोदेवता वधूमूर्द्धाभिषेचने विनियोगः ॐ आपः शिवाशिवतमाः शान्ताः शान्ततमा
स्तास्ते कृण्वन्तु भेषजम् ॐ आपो हि ष्ठेति तृचस्य सिन्धुद्वीपऋषिर्गायत्री छन्दः
आपोदेवता वधूमूर्द्धाभिषेके विनियोगः ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधा
तन महेरणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः अथ दक्षिणावि
वाहे सूर्यमुदीक्षयेति वरेण प्रमिता वधूः सूर्यमुदीक्षयति तच्चक्षुरिति दध्य
ङ्ङाथर्वणऋषिः त्रिष्टुप्छन्दः सूर्योदेवता सूर्योदीक्षणे विनियोगः ॐ तच्च
क्षुर्देवहितम्पुरस्ता च्छुक्रमुच्चरत्पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्
अथ वरो वध्वाः दक्षिणां मस्योपरि स्वदक्षिणहस्तं नीत्वा तस्मात्हृदयमालं
भेत ममव्रते तेहृदयं प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता वधूहृदया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लम्भनेविनियोगः ॐ ममव्रतेतेहृदयन्दधामि ममचित्तमनुचित्तंतेऽस्तु ममवाचमे
कमनाजुषस्व प्रजापतिस्त्वानियुनक्तुमह्यम् अथवोवधूमभिमंत्रयेत सुमङ्गलि
रिति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दोलिंगोक्ता देवतावध्वभिमंत्रणेविनियोगः ॐ
सुमङ्गलीरियंवधूरिमा ॐ समेतपश्यत सौभाग्यमस्यैदत्वा यथास्ताव्यपरेतन
इतिमन्त्रेणावध्वाः सीमन्तेसिन्दूरमपि दापयंतिवृद्धाः अत्रावसरेशिष्टाचारात्
वरस्यवामभागेवधूमुपवेशयन्ति सापिवरस्याञ्चलं प्रतिगृह्य तंयथास्थानं
निवेशयति अथोमेः पश्चादुदग्वा पूर्वकल्पित अनुगुप्ते आगोर उत्तरेनाग्नि
प्राक्शीर्षे आनडुहेचर्मणि आस्तीर्णे रक्तवस्त्रखण्डेवा कश्चन दृढपुरुषोवा
एववा मंत्रपठन् वधूमुत्थाप्योपवेशयति तत्रमंत्रः इहगावश्चेति प्रजापतिर्ऋषि
र्त्रिष्टुप्छन्दोलिंगोक्तादेवता वधूपवेशनेविनियोगः ॐ इहगावोनिषीदन्तु
इहाश्वा इहपुरुषाः इहासहस्रदक्षिणोयज्ञ इहपूषानिषीदतु इतिसमंत्र
कमुपवेश्य तूष्णीमुत्थाप्य पूर्ववद्यथास्थान मुपवेश्य स्वयंचोपवेश्यब्रह्म
णान्वारब्धोजुहुयात् ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते
इतिस्विष्टकृद्धोमंविधाय ग्रामवचनंकुर्यात् ग्रामेतिस्वकुलवृद्धाः स्त्रि
यस्तेतिकथयन्ते ततोवधूहस्तेनवरस्य पादप्रक्षालनम् वरवध्वोः परस्परं
तिलकासतोरापणम् दधिगुडप्राशनं परस्परोच्छिष्टापनंच अथोदयाकु
लाचारकुर्यात् विवाहेग्रामवचनंप्रमाणमिति श्रुतिवचनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः संस्रवप्राशनम् सजलपवित्राभ्यामुखमार्जनम् पवित्रप्रतिपत्तिः पुरणीतविभो
कः ब्रह्मणे पूर्णपात्रदानसंकल्पः अद्येत्यादि अमुकशर्मा सवधूकोहं विवा
हांगहोमकर्मणः सांगफलप्राप्तये साद्गुण्यार्थं इदं पूर्णपात्रं सद्रव्यं ब्रह्मन्
भ्यं सम्प्रददे अक्रन्कर्मकर्मकृतः सहवाचामभोभुवा देवेभ्यः कर्मकृत्वाते प्र
तसचाभुव इति मंत्रपाठः अत्रैवस्वाचार्य्याय वरं ददाति गोब्राह्मणास्त्ववरः
ग्रामोराजन्यास्य अश्वोवैश्यस्य तत्तद्राभाव विभवानुसारेण सुवर्णादि द्रव्यं
दद्यात् तत्संकल्पः अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सवधूकोहं विवा
हांगहोमकर्मणः साङ्गफलप्राप्तये साद्गुण्यार्थं इमां गां इदं गोप्रत्याम्नाती
भूतं सुवर्णादि द्रव्यम्वा वरत्वेन आचार्य्याय तुभ्यं सम्प्रददे अङ्गसाधनभू
तया इत्यादिमंत्रेण आचार्य्याय गवादिकं समर्प्य भूयसीं संकल्पयेत्
अद्येत्यादि अमुकशर्मा सपत्नीकोहं विवाहकर्मणः साद्गुण्यार्थं इमां
भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो नटनर्तकगायकेभ्यो दीनाना
थेभ्यश्च विभज्य दास्ये ॐ तत्सत् इति संकल्प्य भूयसीं विभज्य अभि
षेकतिलक आयुष्यकरण रक्षासूत्रबंधन घृतछायादर्शन मंत्रपाठादि
कं कारयेत् अथ दिवा विद्विवाह स्तदा अस्तमिते रात्रौ चेद्विवाह स्तदा
वरदानानन्तरं वधूवरौ ध्रुवं दर्शयति अमुकी ध्रुवमीक्षस्वेति प्रेषितावधू

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्रुवमन्त्रेणप्रेक्षते ध्रुवमसीति प्रजापतिर्ऋषिः पंक्तिश्छन्दः ध्रुवोदेवता ध्रु
वादीक्षेणविनियोगः ॐ ध्रुवमसि ध्रुवंत्वा पश्यामि ध्रुवोधिपोऽध्वोमह्यं
त्वादाद्बृहस्पतिः मयापत्याप्रजावती सञ्जीवशरदः शतम् इतिवेरोचरि
तेन मन्त्रेणसहवधूः पश्येत् मायदि ध्रुवंनपश्येत् तथापिपश्यामित्येव
ब्रूयात् अथवरवधोः त्रिरात्रनियमाः अक्षारालवणौस्यातां अधःशयी
योतां संवत्सरं महारात्रं त्रिरात्रंवानमिथुनीभावमुपेयाताम् इतिनियमाः
ततः पञ्चघोषपूर्वकं विवाहमंडपादभ्यंतरे गत्वा जीवमातृपूजनंकुर्यात्
ततः श्वश्रूभिः स्त्रवासिनीभिर्महानीराजन पूर्वकं कृतपिष्टातकादिति
लको वधूवरोश्चालिंग्यिवरं स्ववध्वाएवसमीपे निधाय धौतमुनी
मं धौतेवाससीचपरिधाय स्वपक्षीयैः पुरुषैः सह श्वशुरगृहे पक्वविधमो
दनादिभक्षंभुक्त्वा रात्रौयथाक्रमंशयीत अर्द्धरात्रादूर्ध्वं विवाहलग्ने
सति भोजनानन्तरं विवाहलग्नंकुर्यात् ततः प्रभातेश्वशुरगृहात्स्वगृह
मानीय कृतमुकुटादिधारणं वधूमग्रतः कृत्वा स्वगृहे यथाविधि द्वारमा
तृणांपूजनंकुर्यात् जीवमातृणांपूजनंकुर्यात् भूमसींविभज्य तत्रव
रमात्राद्याः स्त्रवासिन्योवधूवरयोः तादिष्टानांबांधवानांच महानीराजन
पूर्वकंतिलकादिकुर्युः ततोभिषेकमंत्रपाठ घृतच्छटयादर्शनं कृत्वा
ततोवधूवरौ गुडदध्यादि प्राशनंकुर्याताम् ततोवरपिता स्त्रवासिनीभ्यः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिकेभ्योनरर्तकगायकेभ्यो वादिकादिभ्यश्च यथाशक्ति पारितो
मिकं द्रव्यवस्त्रभोजनादिदद्यात् इतियज्ञोपवीतादि व्याप्तिमाध्यंदिनशाखिनां
ब्रह्मविवाहपद्धतिः समाप्ता॥ अथ चतुर्थीकर्म्म॥ चतुर्थ्यामपरान्ते भ्यंतरतो
निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य
स्थालीपाकं श्रपयित्वा आज्यभागावित्याज्याहुतीर्जुहोतीति सूत्रम्
यथाविवाहचतुर्थदिवसे अपरान्ते ऽरुणोदयतः प्राक् उद्वर्तनपूर्वकं वधू
वरौ स्नापयित्वा अलंकृतस्य वरस्य दक्षिणतो ऽलंकृतां वधूं वध्या उत्तरतो
परमुपवेशयेत् अथ वरस्य शिरसि अर्घं संस्थाप्य प्राणानायम्य गणेशपू
जनं कुर्यात् तत्र संकल्पः अद्येह अमुकशर्म्मा सपत्नीकोहं करिष्यमाण
विवाहांग चतुर्थीकर्म्मण्यकर्म्मणि निर्विघ्नतया कार्य्यसिद्ध्यै श्रीभगव
तो गणेश्वरस्य पूजनं करिष्ये इति यथाविधि गणेशं सम्पूज्य प्रधानसंकल्पं
कुर्यात् अद्येत्यादि अमुकोहं मासस्यावध्याः सोमाद्युपभुक्ति दोषपरि
हारार्थं विवाहव्रतसमाप्तिविहितं विवाहांग चतुर्थीकर्म्म करिष्ये तत्पूर्वां
गत्वेन गणपतिसहितगौर्य्यादि षोडशमातॄणां पूजनं करिष्ये इति संकल्प्य
यथाविधि मातॄः सम्पूज्य वसोर्धाराः सम्पाद्य आचारात्कृतात्मा संध्या
वंदन ब्राह्मणद्वारा पुण्याहं वाचयित्वा होमवेदीं सम्पाद्य तत्र पंचभूसं
स्कारपूर्वकं अग्निं संस्थाप्य वेद्यां दशाने कलशं संस्थाप्य तत्र ग्रहानावाह्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पूज्य ब्रह्मणोर्वरणं कुर्य्यात् अद्येहत्यमुकशर्म्माहं करिष्यमाणचतुर्थीकर्म्मांगहोमकर्म्मणि कृताकृतावेक्षणाय ब्रह्मकर्म्मकर्तुं ब्रह्मणः पूजनपूर्वकं वरणं करिष्ये ब्रह्मणां ब्रह्मयज्ञानमिति गंधादिभिः सम्पूज्य वरणसामग्रीं करे कृत्वा एभिर्गंधाक्षत पुष्पपूगीफलद्रव्यैः करिष्यमाणचतुर्थीकर्म्मांगहोमकर्म्मणि कृताकृतावेक्षणाय ब्रह्मकर्म्मकर्तुं ब्रह्मन् त्वामहं वृणे वृतोस्मीति प्रत्युक्तिः तत पूर्वतस्थापिताग्नेः पश्चादुपविश्य दक्षिणतो ब्रह्मणमुपवेश्य प्रणीतास्थानादुत्तरतस्ताम्रोदपात्रं प्रतिसृष्ट्य ब्रह्मोपवेशनादि कुशैरास्तीर्य दीर्घाकाराकृती रित्वन्तं विधाय एतन्तइति शिरिवेनाग्निं प्रतिसृष्ट्य तेदवाग्निरिति ध्यानादि नीराजनान्तं सम्पूज्य देवताभिध्यानं करोति अद्येहेत्यादि अमुकशर्म्मा सपत्नीकोहं अस्यावश्यावीजगर्भसम्भवेनो निर्वहणाद्वारा ॐ तत्सत् श्रीपरमेश्वरप्रीत्यर्थं चतुर्थीकर्म्मणाचक्रे तत्र प्रजापतिमिन्द्रमग्निं सोमं अग्निं वायुं सूर्य्यं चन्द्रमसं गन्धर्वं आज्येन प्रजापतिं चरुणा विश्वान्देवान् चर्वाज्येन अग्निं वायुं सूर्य्यं अग्नीषोमयोरग्निं वरुणाग्निं वरुणं सवितारं विश्वान्देवान् मरुतः स्वर्काञ्चरुणा अदितिं प्रजापतिं चाज्येनाहुतीः दद्यात् आज्यं कुर्यं चरुं कुर्यं तत्तद्देवताभ्यो मन्त्रान्तिमन्त्रं यथोद्देशं तत्तद्देवतानां विधाय ब्रह्मणान्वारब्धोमनसा प्रजापतिं ध्यात्वा जुहुयात् ॐ प्रजापतये स्वाहा इदं न मम ॐ इन्द्राय स्वाहा इदमिन्द्राय ॐ अग्नये स्वाहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदमग्नये ॐ सोमायस्वाहा इदंसोमाय अन्वारभ्यंत्यक्त्वा आज्येनप्रधानेन
अग्नेप्रायश्चित्तइत्यारीनां पञ्चानांमंत्राणां परमेष्ठीऋषि स्त्रिष्टुप्छन्दांसि
गोक्तादेवता चतुर्थीकर्म्मांगाज्याहोमेविनियोगः ॐ अग्नेप्रायश्चित्तेत्वं देवानां
प्रायश्चित्तिरसि ब्रह्मणास्त्वानाथकाम उपदधामि आस्येपतिघ्नी तनूस्ताम
स्मैनायस्वाहा इदमग्नये उदपात्रेसंस्रवप्रक्षेपः ॐ वायोप्रायश्चित्तेत्वं देवा
नांप्रायश्चित्तिरसि ब्रह्मणास्त्वानाथकाम उपदधामि आस्येप्रजाघ्नी तनूस्ता
मस्मैनायस्वाहा इदंवायवे उदपात्रेसंस्रवप्रक्षेपः ॐ सूर्य्यप्रायश्चित्तेत्वंदेवा
नां प्रा० आस्येपशुघ्नी तनूस्तामस्मैनायस्वाहा इदंसूर्य्याय उदपात्रेसंस्रव
प्रक्षेपः ॐ चन्द्रप्रायश्चित्तेत्वं देवानां प्रा० आस्येगृहघ्नी तनूस्तामस्मैनायस्व
स्वाहा इदंचन्द्रमसे उदपात्रेसंस्रवप्रक्षेपः ॐ गन्धर्वप्रायश्चित्तेत्वं देवानां प्रा०
आस्येयज्ञघ्नी तनूस्तामस्मैनायस्वाहा इदंगंधर्वाय उदपात्रेसंस्रवप्रक्षेपः
इत्याज्येनकृत्वा स्थालीपाकमाज्येनाभिघार्य्य स्रुवेणादाय जुहोति ॐ प्रजा
पतयेस्वाहा इदंप्रजापतये उदपात्रेसंस्रवप्रक्षेपः ततआज्यचरूणी गृहीत्वा
अन्वारब्धुं जुहुयात् ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ततो
ब्रह्मणान्वारब्धुं भूराद्यानवाहुती राज्येनजुहुयात् ॐ अग्नयेप्रजापतयेस्वा
हा इदमग्नयेप्रजापतये ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते
ततः संस्रवप्राशनमृ पवित्रयोरग्नौ प्रतिपत्तिः प्रणीतावियोगः ब्रह्मणोपूर्णा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पात्रदानम् अथ हे अमुकगर्भमासपत्नीकोहं कृतस्यास्य चतुर्थीकर्मणः होमक
र्मणः सांगतासिद्ध्यै इदं पूर्णपात्रं सदक्षिणं ब्रह्मणेऽहं सम्प्रददे इति संकल्प्य
ब्रह्मणे पूर्णपात्रं दद्यात् ब्रह्मा च अक्रन्क्रमेत्यादि मंत्रं दद्यात् अथ पूर्वस्मापि
तोदुदपात्रादुदकमादाय वरोपवधूमूर्द्धन्यभिषिञ्चति आतनूति प्रजापतिर्ऋषि
र्त्रिष्टुप् छन्दो वधूर्देवता अभिषेचने विनियोगः ॐ आतनूति पत्नी प्रजाघ्नी
पशूघ्नी गृहघ्नी अन्नाघ्नी निन्दितातनूर्जारघ्नी ततः स्वांकेऽभि साजीर्य्य त्वं
मयासह अमुकीदेवि इत्यनेन मंत्रेण अत्रेयवध्वा आचारप्राप्तं वरोक्तस्य
नुकूलं द्वितीयं नामकरणं कुर्यात् अथ वरोपवधू कृतगोमंस्थालीपाकं प्राश्य
वनिसंकल्प प्राणेस्तनूति प्रजापतिर्ऋषि मंत्रुष्टुप् छन्दः वधूर्देवता वध्वाः स्था-
लीपाकप्राशने विनियोगः ॐ येन्नेकसीमेत्यादि दिविचन्द्रमसि श्रितम्रेव
दाहं तन्मो तद्विद्यात्पत्येमशरदः शतञ्जीवेमशरदः शतं शृणुयामशरदः
शतम् इति अग्न्याचारात्कलशं त्रिःप्रदक्षिणीकृत्य गजदंतादिनिर्मितमा
ऽभिनवकंकतिकया वध्वाः सीमन्तोन्नयनं च विधाय शिरिवनाभ्यां पूर्णा
हुतिं च कृत्वा अग्न्यन्वितग्रन्थिं कंकणं च मोचयेत् कंकणविचेन मंत्रः कंकणं
मोचमोम्यत्र रक्षोघ्नं रक्षणं मम भवि संगाद्विरक्तं कृत्वा स्वस्थानं गच्छ कंक
णः ततः पाणिप्रतपनाद्यङ्गलग्नमनान्तं कर्मसमाप्त दक्षिणासंकल्प्य कु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्व्यात् अद्येह अमुकगोत्रोऽमुकपत्नीकोऽहं कृतस्यास्य चतुर्थीकर्मणः सांगतासिद्ध्यर्थं
इमां दक्षिणां आचार्याय तुभ्यमहं ददे तथान्येभ्यो ब्राह्मणेभ्यश्च दास्ये ॐ तत्सत् इ
ति संकल्प्य ब्राह्मणेभ्यो दक्षिणां दत्वा आयुष्मत्सावर्णेन घृतछायादर्शनाभिमेक
तिलकमंत्रपाणिग्रहणादीनि विधाय आचम्य अस्य स्मृत्यनिपठित्वा ॐ अच्युता
यनमः इति त्रिरुच्चार्य्य नमस्कृत्य द्विजान्प्रणम्य वह्निरागत्य सूर्य्यं प्रणमेत् ततो गृहं
प्रविश्य दुर्मैः सहयथासुखं विहरेत् ततो मध्याह्नादर्वाक् वरमातृकभूषणैः संग
ताः गायन्तीः स्त्रवासिनीरग्रतः कृत्वा मातृकाश्चित्रफलकमुत्थाप्य वंशपात्रे निधाय
शुद्धरक्तवस्त्रेणाच्छाद्य दास्यादिमूर्द्ध्नि निधायाग्रतः कृत्वा वह्न्यञ्चलौ धृतमुकुट
दिभूषणो वधूवरौ शंखघंटातूर्य्यादि वादकाग्रतः कृत्वा वाप्यादिजलाशयां
गत्वा जलमातृणां यथाविधिपूजनं कुर्य्यात् अथ नानागीतानि गायन्त्यस्तास्त्रि
स्त्रोपवधूवराभ्यां सह जलाशयाद्गृहं प्रत्यागच्छेयुः ततस्तावधूवरौ गृहाङ्गणे उ
पविश्य तन्मध्ये गोमयोदकेनोपलिप्ते तत्र नाडुलापिष्टोदकेन श्यामादेवीं विलि
ख्य गायन्त्यस्तां सम्पूजयेयुः इति चतुर्थीकर्मपद्धतिः अथ द्विरागमनविधिः
शुभे द्विफेणिकादिकं पाचयित्वा पेटायां निधाय शिबिकाद्यं यानमारुह्य श्वशु
रगृहं गत्वा श्वशुरावभिवंद्य ताभ्यां कृततिलकः तत्कृतनाचामुरीकृत्य भोजनं वि
धाय गणपतिं सम्पूज्य शुभे लग्ने वधूं प्रस्थाप्य श्वशुरावभिवंद्य ताभ्यां कृत
तिलकः पुरस्कृत तद्दत्तयौतुक सवधूकोनिजगृहमागत्य स्वदेशरीत्यादिहल्ली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समीपे मिश्रोज्ज्वलग्रन्थिं सम्पाद्य स्वासनेसम्प्रविश्य स्ववामभागे पृथक् पीठे व
धूमुपवेश्य आचम्य अर्घसंस्थाप्य अर्घसंस्थाप्य प्राणानायम्य संकल्पं कुर्यात्
अद्य अमुकशर्म्मोसपत्नीकोहं ममद्विरागमनांग गृहप्रवेशकर्म्मणि श्रीगणप
तेर्द्वारमातृणांचपूजनं करिष्ये इतिसंकल्प्य यथाविधि गणेशद्वारमातृपूजन
ज्य लग्नदानं कुर्यात् अद्य अमुकशर्म्मोसपत्नीकोहं ममद्विरागमनांग गृह
प्रवेशलग्ना धन्वकुत्रस्थानस्थितानां आदित्यादिनवग्रहाणां शुभानां शुभफला
धिक्यप्राप्त्यै दुष्टानां दुष्टदोषोपशान्त्यर्थं इदं फलं तन्निष्क्रयीभूतं द्रव्यम्वा
पुरोहितदैवज्ञादि ब्राह्मणेभ्यो दातुमहमुत्सृजे ॐ तत्सत्ममेति संकल्प्य दक्षि
णांदत्वा स्वस्तिवाचनपुरस्सरं गृहंप्रविश्य भित्तिलिखित जीवमातृणां सविधे
गत्वा विधिवत्ताः सम्पूज्य आचारात्कलशंसंस्थाप्य वस्त्रासकलंप्रदक्षिणीकृ
त्य दक्षिणासंकल्पं कुर्यात् अद्य अमुकशर्म्मासवधूकोहं द्विरागमनांग
गृहप्रवेशकर्म्मणा उत्तरांगत्वेन भित्तिलिखित कल्याणादि जीवमातृपूजा
कर्म्मणः साङ्गतासिद्ध्यै इमां दक्षिणां ब्राह्मणायदास्ये तत्पत् दक्षिणांद
त्वा अभिषेकतिलक मंत्रपाठादिकारयित्वा अज्ज्वलग्रन्थिं विमोच्य तत्रै
वदधिगुडफेणिकादिभुक्त्वा सुखंप्रशान्त्य वधूवरौ यथासुखंविहरेतां
इतिद्विरागमनविधिः अथविष्णुप्रतिमाविवाह कन्यायाजन्मकालीनग्र
हादि सूचितवैधव्ययोग हरणाय विष्णुप्रतिमाविवाह पूर्वं कृत्वा पुनः पाणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहणमाचरेत् तत्रकर्त्ताः स्नातः स्वाचान्तः स्वासन उपविश्य प्राङ्मुखः पू
र्वं विष्णुप्रतिमाविवाहांगत्वेन गणेशंसम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्येत्यादि
अमुकोहं अमुकगोत्रस्य कन्यायाः जन्मलग्नादिवैधव्य सम्भावनासूचके
ग्रहैः सूचितारिष्टनिवृत्तये सौभाग्यप्राप्तये विष्णुप्रतिमया सह विवाहं करिष्ये
प्रतिमादानं च करिष्ये तत्प्रतिग्रहार्थं आचार्य्यस्य पूजन पूर्वकं वरणं च करिष्ये
इति संकल्प्य आचार्य्यं सम्पूज्य हत्वा भाट्टपूजाभ्युदयिक पुण्याहवाचनानि
विधाय विष्णुप्रतिमया अग्न्युतारणपूर्वकं एतत्तदिति ॐ भूर्भुवः स्वः विष्णुप्रति
मायां विष्णोरुद्वाहागच्छ प्रतिमृतौ वरदा भव इति प्रतिमां विधाय अद्येत्या
दि अमुकगोत्रायाः मम अस्याः कन्यायाः जन्मसमयवर्त्तिलग्नादि वैधव्य स
म्भावना सूचकैर्ग्रहादिभिः सूचितारिष्टनिवृत्तये सौभाग्यसमृद्धये स्व
र्णप्रतिमायां श्रीविष्णोः पूजनं करिष्ये इति संकल्प्य ध्यानम् निर्म्मितांरूचि
रांगरुप गदाचक्राब्जसंयुताम् दधानां वाससी पीते कुमुदोत्पलमालिनीम्
इति ध्यात्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं
म् त्रीणि पदा विचक्रमे विष्णुर्गोपाऽ अदाभ्यः अतो धर्म्माणि धारयन्
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् इति वैदि
केन ॐ विष्णवे नम इतिनाममन्त्रेणाच आवाहनादिनीराजनान्तं सम्पूज्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राथमेतद् देहि विलोवरं देव कन्यांपालयदुः खतः पतिंजीवयकन्याया स्थिरं पुत्र
फलंकुरु १ वक्तांगस्वरूपस्त्वं जीवनानांसमाश्रय पतिंजीवयकन्याया स्थिरंपु
त्रफलंकुरु २ इतिसम्प्रार्थ्य परित्वित्यादिमन्त्रे रधस्तादुपरिस्थाप्य मंत्रावृत्या
कन्याप्रतिमांच दशतन्तुसूत्रेणवेष्टयेत् ॐ परित्वागीर्व्वरोगिर ऽइमाभवन्तुत्वि
ष्वतः हृद्धाजुभनुवृद्धयो जुभ्राभवन्तु मुद्दयः १ ॐ इन्द्रस्यस्वूरसीन्द्रस्य ध्रुवोसि
ऐन्द्रमसि वैश्वदेवमसि २ ॐ विष्णूरसिप्रवाहणो वह्निरसि हव्यवाहनः श्यात्रोसि
प्रचेतास्तथो सिविश्वेवेदा ऽउशिगसि ३ ॐ उशिगसिकविरङ्घारिरसि वम्भा
रिरवस्वूरसि दुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीय सम्राडसिकृशानुः परिलयोसि
पवमानोनभोसि पृतकामिक्षृसि हव्यसूदन ऽऋतधामासिस्वर्ज्योतिः ४ ॐ
समुद्रोसिविश्वव्यचाः अजोस्येकपादहिरसि बुध्नोवागस्येन्द्रमसि सदो
स्मृतस्यक्षरो मामासन्नाष्ट्रमद्रुपते प्रमातिरस्व स्तिमेसि पतिदेव योनेभूया
मित्रस्यमा ५ ॐ मित्रस्यमावक्षुश्च सद्भ्रमगुनमः सगरः सगरास्त्वसगरेण
नाम्नोरोद्रेणा श्रीकेनपातुमागुनयः पिपृतमाम्नयोः गोपायतमानमो वोस्तु
मामाहि ष्टसिमृ ६ ॐ ज्योतिरसिविश्वरूपं विश्वेजान्देवाना सुसमित्
त्वंसोमतनूकृद्भ्यो द्वेषोभ्यो न्यकृतेभ्य ऽउरुजन्तासिवरुश स्वाहा
जुमाणो ऽअप्रक्षराज्यस्य वेतुस्वाहा ७ ॐ अग्नेनयसुपथाराये ऽअस्मा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ८ ॐ त्रयन्नो अग्निर्घोरिवस्कृणो त्वयम्मृधः पुरएत प्रभिन्दन् अयं घोजाज्जयतु वाजसातावयं शत्रूञ्जयतु जर्हृषाणः स्वाहा ९ ॐ ऋद्धिश्चोद्धि क्रमस्वोरुक्षयायनं स्कृधिः घृतं घृतयोने पिब प्रप्रयज्ञपतिन्तिर स्वाहा १० इति मन्त्रैः सूत्रमोवेष्ट्य ततः किंचिद्रक्षित्वा प्रतिमां निस्सार्य्य दक्षिणामेकत्वं कुर्य्यात् अद्येह अमुकोहं अमुकराशेः कन्यासा वैधव्यादि अशुभफल निवृत्तिद्वारा सौभाग्यादि शुभफलप्राप्तये कृतस्य विष्णुप्रतिमाविवाहकर्म्मणः साङ्गतासिद्ध्यर्थं इमां दक्षिणां ब्राह्मणायदास्ये तथैतत्कर्म्मणो न्यूनातिरिक्तदोषपरिहारार्थं इमां दक्षिणां भूयसीत्वेन नानागोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये तथा अमुकसंख्यया ब्राह्मणाँश्च भोजयिष्ये ॐ तत्सत् ततो विष्णुप्रतिमादानम् अद्येहेत्यादि अमुकगोत्रा अमुकराशिरमुकीदेव्यहं मम जन्मसमयवर्त्तिलग्नादे वैधव्यसम्भावना सूचकैर्ग्रहादिभिः सूचितारिष्टनिवृत्तये सौभाग्यनिवृत्तये इमां सौवर्णीं रूपूजितां विष्णुप्रतिमां अमुकगोत्राय अमुकशर्म्मणे आचार्य्यायतुभ्यमहं सम्प्रददे ॐ तत्सत् नमम दानवाक्यम् यन्मया प्राचिजन्मनि घ्नन्त्यापतिसमागमम् विमोपविमशास्त्रोक्ते हेतोवापिविरक्तया १ प्राप्नुवन्त्यामहाघोरं जराः सौख्यधनापहम् वैधव्याद्यातिदुःखोघं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तन्नाशायक्षरवापूर्वे २ वक्रसोभाग्यवन्ध्येच महाविद्योरिमांनमु सौवर्णीनि
र्मितांशक्त्या तुभ्यंसम्प्रदेदक्षिण २ इतिद्विजकेप्रतिमांदत्वा अनघाहमस्मिशति
त्रिवदेत् ब्राह्मणाग्रयोस्त्वाददात् पृथिवीत्वाप्रतिगृह्णात् ॐ स्वस्ति कोदादिति
पठित्वा ॐ अनघाभवइतित्रिवदेत् ततः कृतेतत्प्रतिमादाने प्रतिमाप्रसिद्ध्यर्थं इ
दंस्फवर्णं स्फवर्णानिष्क्रयी भूतंद्रव्यम्वा ब्राह्मणायदास्ये इतिदत्वा अभिषेक
तिलकमंत्रपाठादिकारयित्वा यथाक्षरंविहरेत् इतिविष्णुप्रतिमाविवाहप
द्धतिः प्रतिमादानविधिश्च अथप्रथमरजोदर्शने शान्तिप्रकारः चन्द्रताराजुकूले
शुभेदिने भर्तापातरुत्थाय पूर्वकंकलात्वा शुभासनउपविश्यमावस्य स्वस्तिपाठ
मंपठित्वा गणेशपूजनंकुर्यात् पूजनसामग्रींसम्पाद्य अग्रेसंस्थाप्य संक
ल्पंकुर्यात् अद्येहेत्यादि अमुकाहं ममास्यावध्वा निन्द्यतिथिवार नक्षत्रादि
ष्विति यथायोगमुल्लेखंकृत्वा प्रथमरजोदर्शनदोषोपशान्त्यर्थं शान्तिकर्म
णि निर्विघ्नताप्राप्तये पूर्वांगत्वेनभगवतोगणेश्वरस्य यथाभिलितोपचारैः पू
जनंकरिष्ये इतिसंकल्प्य यथाविधिसम्पूज्य प्रधानसंकल्पं कुर्यात् अद्ये
हेत्यादि अमुकाहं ममास्यावध्वा दुर्मासकेनिन्द्यतिथिवारयोग मुहूर्तसमयपर्यन्त
प्रथमरजोदर्शनजनितारिष्टनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नारदसंहिता
क्तप्रकारेण शान्तिंकरिष्ये तत्पूर्वांगत्वेन संकल्पमंगलाभिवृद्ध्यर्थं मातृपूजा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding-IKS-MoE-Grant-2

नान्दीश्राद्धं पुराण्याहवाचनानि करिष्ये इति संकल्प्य यथाविधि मातृपूजादिवि
धाय आचार्य्यं वरयेत् अद्येत्यादि करिष्यमाणे प्रथमरजोदर्शनशान्तिक
र्म्मणि आचार्य्यकर्म्म कर्तुं आचार्य्यस्य पूजनपूर्व्वकं वरणं करिष्ये इति संकल्प्य
नमोस्त्वनन्तायेति नमो ब्रह्मणे देवायेत्यादिना गंधपुष्पाक्षतादिभिः सम्पू
ज्य वरणसामग्रीं कृत्वा एभिर्गंधाक्षतपुष्पपूगीफल द्रव्यवासोभिः प्रथ
मरजोदर्शनशान्तिकर्म्मणि आचार्य्यकर्म्म कर्तुं आचार्य्यत्वेन त्वामहं वृणे
इति वृत्वा आचार्य्यस्त्वित्यादि प्रार्थयेत् ततआचार्य्यः पञ्चभूसंस्कारपूर्व्व
कं स्थण्डिलेग्निं संस्थाप्य ब्रह्मवरणं कुर्य्यात् अद्येत्यादि संकीर्त्य प्रथम
रजोदर्शनशान्तिकर्म्मणि ब्रह्मकर्म्म कर्तुं ब्रह्मत्वेन त्वामहं वृणे इति वृत्वाय
आचन्तु भवन्त्वित्यादिना प्रार्थयेत् ततो यजमानः अग्नेरीशाने कलशविधिना
कलशं संस्थाप्य तत्र उक्तरीत्या ब्रह्मवरुणसहितादित्यादि नवग्रहानावाह्य
सम्पूज्य रक्षाविधानेन रक्षां चाभिमंत्र्य स्वर्णप्रतिमायां इन्द्राणीमावाह्य
पूजयेत् ॐ अदित्यै राज्ञ्यै नमः इन्द्राण्यै नमः पूजयामि धर्म्मायदीव्य इ
ति वेदमन्त्रेण ॐ इन्द्राण्यै नमः इति नाममन्त्रेणाच पाद्यादिनीराजनान्तं सम्पू
जयेत् ततो यजमानो द्रव्यत्यागं कुर्य्यात् अद्येत्यादि प्रथमरजोदर्शनशा
न्तिकर्म्मणि अहं यजे तत्र इदमाज्यं आघारान्तभागदेवताभ्यः नमः इदं घृतान्न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दूर्वा तिलाक्षतद्रव्यं पृथक्पृथक्मन्त्रोत्तरसंख्यया सवित्रे इन्द्राग्नये च शेषं स्वि
ष्टकृते महाव्याहृतिदेवताभ्यः सर्वप्रायश्चित्तदेवताभ्यः प्रजापतये च समाप्य
रित्यर्थं यथादेवतमस्तु ॐ तत्सत्सम इति यजमानेन कृते द्रव्यत्यागे आचा
र्यः आघारान्तभागौ कृत्वा प्रकृतहोमं कुर्यात् ॐ भूर्भुवः स्वः प्रचोदयात् स्वा
हा इति गायत्र्या इदं सवित्रे १०८ ॐ अदितेऽनुमतेऽसीन्द्राय त्वा ऽऽदित्यैः
पूषासि घर्मासि दीप्तं स्वाहा इदमिन्द्राग्नये ततः प्रकृतहोमानन्तरं ब्रह्मणा
चार्द्धो भूरादिनवाहुति होमं सर्वप्रायश्चित्तहोमं स्विष्टकृतं च जुहुयात् ततः
मंत्रवप्रायानम् पवित्राम्भोमुखमार्जनम् पवित्रमोरग्नौ प्रतिपत्तिः प्रणीताविमो
कः ब्रह्मणे पूर्णपात्रदानम् अद्येहेत्यादि अमुकोहं कृतस्य प्रायश्चित्तो
दर्शन शान्तिहोमकर्मणः साङ्गतासिद्ध्यर्थं अपूर्णपूर्णार्थं च इदं पूर्णपात्रं ब्रह्म
णे तुभ्यं संसम्प्रददे अक्रन्कर्मेति मन्त्रपाठः ॐ तदूषाग्नेसीत्यादिभिरुद
न्यालभेत् ततः पूर्णाहुतिं जुहुयात् न्यायमंकृत्वा दक्षिणासंकल्पः देश
कालकीर्तनानो अमुकोहं ममास्योपध्याः दुर्भासतिथिनक्षत्र वारयोगक
रण मुहूर्तसमयवशेन जातप्रायश्चित्तोदयेन सूचितातिकृनिवृत्तये सक
लसौभाग्यप्राप्तये एतद्धोमकर्मणः सांगतासिद्ध्यै इदं रूपवर्णं तथाकलशो
श्रावाहितानां आदित्यादिनवग्रहाणां ब्रह्मादिदेवानां रूपवर्णा प्रतिमाभ्यां इ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वाराचार्य्यपूजाकर्म्मणः साङ्गतासिद्धये तमामुद्दिश्य मिमांदक्षिणां तमामुद्दिश्य
वर्णं मिन्द्राणीप्रतिमांच आचार्य्यायदद्यात् महमुत्सृजे तमाग्नानिकाध्याय
पाठकर्म्मणः साङ्गतासिद्धये तमानवावृत्तिचराडीपाठ कर्म्मणः सा
ङ्गफलप्राप्तये तमाकेदेकादशिन्याः साङ्गतासिद्धये च इमांदक्षिणांब्राह्मणे
भ्योदास्ये तमामकलकर्म्मणः सांगतासिद्धये तमासंख्याकान्ब्राह्मणा
नृभोजयिष्ये इतिसंकल्प्य दक्षिणांदत्वा देवाग्निंचविसृज्य क्षमापयेत्
ततआचार्य्यादयः कुम्भजलेन समुद्रजेमृत्स्नादि कृतास्त्वा मभिषिञ्च
न्त्वित्यादि वैदिकैः पौराणैश्चमंत्रैः सपत्नीकंयजमानमभिषिञ्चेयुः तिल
कल्कासूत्र बन्धनादिकंचकुर्य्युः यजमानश्च घृतछायादर्शन दानविधा
य ब्राह्मणानृभोजयित्वा स्वबंधुभिः सह भुञ्जीत इतिप्रथमरात्रोस्त्री
नग्नानिप्रयोगः इतियजुःग्रामीय गृह्यपद्धतिः समाप्ताः श्रीमच्छा
के १८२८ माघशुक्लभौमाद्यस्यां लिखित मिदंपुस्तकं पुरोत्तमपत्त
न शुभम्॥ ॥ तादृशंपुस्तकंदृष्ट्वा तादृशंलिखितंमया यदिशुद्ध मशु
द्धंवा ममदोषोनदीयते॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

संग्रह मेंट:-
तिथि - 4. 3. 1973
प्रेम स्वरूप शर्मा ग्रा० मही
की ओर से
पं० दुर्गा दत्त शर्मा जी०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूचीपत्र

स्वस्तिवाचन	१	अग्नि नामानि	२२	गर्भाधान	३९	चतुर्थी कर्म	९८
गणेश पूजा	२	अग्नि जिह्वा	२३	जातकर्म	३८	द्विरागमन	१००
मातृपूजा	४	क्रवधारणादि	२४	षष्ठी महोत्सव	४२	विष्णुप्रतिमाविवाह	१००
नांदीश्राद्ध	५	हव्य प्रमाण	२४	द्वारमातृपूजा	४२	प्रथमरजोदर्शनशांति	१०२
पुण्याहवाचन	८	मुद्रालक्षण	२५	नामकरण	४८		
कलश स्थापन	१०	आज्यलक्षण	२४	पंचगव्यविधि	४९		
रक्षाविधान	११	होमविधिः	२४	जीवमातृपू.	५२		
ग्रहस्थापन	१२	हव्यत्यागसंक.	२५	अन्नप्राशन	५३		
पूजनविधि		ग्रहाणां बलि		जन्मोत्सव	५४		
		दानविधिः	३०	कर्णवेधः	५६		
प्रधानसंकल्प	१३	अभिषेकमंत्राः	३१	अक्षरस्वीकार	५७		
कुशकंडिका	१६	पौराणिकमंत्राः	३२	चूडाकर्म	६०		
भूरादि हवन	२१	तिलक करण	३४	उपनयन	६३		
पूर्णाहुती	२२	मंत्रपाठः	३४	वेदारंभः	६८		
कुशकंडिकोपयोगी संग्रह	२३	घृतछाया	३५	समावर्तन	७०		
		अभिषेकमंत्र	३७	विवाह	७८		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding:IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh